उभयवेदान्तग्रन्थमाला

श्री अभिनवदेशिक वात्स्य सच्चक्रवर्ति उत्तमूर-
वीरराघवाचार्य विरचितः

“वेदान्तपुष्पाञ्जलिः”

“வேதாந்த புஷ்பாஞ்ஜலி”-(தமிழ் உரையுடன்)

VEDANTA-PUSHPANJALI

(SRINIVASA STOTRAM)

with Sanskrit Notes & Tamil Translation

By

VATSYA VIRARAGHAVACHARYA

Dedicated to the memory of

 Dr. E. V. SRINIVASAN

(Eye Surgeon)

Price] 1977 [Rs. 8/-

उभयवेदान्तग्रन्थमाला

श्री अभिनवदेशिक वात्स्य सच्चक्रवर्ति उत्तमूर्-

वीरराघवाचार्य विरचितः

"वेदान्तपुष्पाञ्जलिः"

"வேதாந்த புஷ்பாஞ்ஜலி"-(தமிழ் உரையுடன்)

VEDANTA - PUSHPANJALI

(SRINIVASA STOTRAM)

with Sanskrit Notes & Tamil Translation

By

VATSYA VIRARAGHAVACHARYA

Dedicated to the memory of

Dr. E. V. SRINIVASAN

(Eye Surgeon)

Price:] 19-7 [Rs. 8/-

சதாபிஷேக வெளியீடு

	ரூ. பை.
1. சதாபிஷேக மலர் (இரண்டு ஸம்புடம் Postage Free)	10—00
2. நடாதூர் அம்மாள் தத்துவ ஸாரம் (ஸம்ஸ்க்ருதம் தமிழ் உரைகளுடன்)	8—00
3. உபநிஷதர்த்த ஸங்க்ரஹம் (ஸம்ஸ்க்ருதம் தமிழ் உரைகளுடன்)	4—00
4. வேதாந்த புஷ்பாஞ்ஜலி (ஸம்ஸ்கருதம் தமிழ் உரையுடன்)	8—00
5. ஸ்ரீ வேங்கடேசாதி ஸ்தோத்ர காவ்யங்கள்	6—00
	36—00
6. UPAYUKTA SANGRAHA by Sri Koliyalam Swami (in English)	2—00
1. ஸ்ரீமத் ரஹஸ்யத்ரய ஸாரம் (விரிவான புதிய தமிழுரையுடன் முதல் பாகம்)	10—00
2. பரமத பங்கம் (விரிவான புதிய தமிழுரையுடன் முதல் பாகம்)	6—00

மற்ற க்ரந்தங்களெல்லாமும் கிடைக்கும்.
எழுதி வருவித்துக்கொள்க.

UBHAYA VEDANTA GRANTHAMALA
25, Nathamuni Street
T.Nagar, Madras - 600 017

DEDICATION

This Book

"VEDANTA PUSHPANJALI"

is Dedicated to the Reverential Memory of

Dr. E. V. SRINIVASAN

Eye Surgeon

and

Smt. KANNAMMAL SRINIVASAN

Parents of

1. Dr. E. V. Kalyani, *M.D.*, *(Lady Doctor)*
2. Mr. E. K. Srinivasan, *(Hercules Ins. Co.)* along with his son Mr. E.K. Parthasarathy
3. Mr. E. V. Rajagopalan, *(Paterson & Co.)*

and Uncle and Guru of

4. Dr. Major E. C. Srinivasan, *(Eye Surgeon)* along with his son Dr. E. C. Narasimhan, *(Eye Surgeon)*

and

Published with the Donation of Rs. 2,000/-
(Rs. 500/- from each of the above four donors.)
to cover the cost of this book.

THANKSGIVING

Ubhaya Vedanta Granthamala

25, Nathamuni Street, Madras - 17

and the


Author, Editor and Publisher of

"VEDANTA PUSHPANJALI"

Thank the family members of

Dr. E. V. SRINIVASAN, *Eye Surgeon,* for their kind donation of Rs. 2000/- to cover the cost of this book, and pray for the Prosperity, Health and Happiness of the Donors and their Families.

"May Lord SRINIVASA of the Seven Hills Shower His Choicest Blessings on them."



श्रीवेंकटाद्रिनिलयः कमलाकामुकः पुमान् ।
अभंगुरविभूतिर्नस्तरङ्गयतु मङ्गलम् ॥



பரமபரிவ்ராஜ ஸ்ரீரங்கராமானுஜ மஹா தேசிகன்
ஸ்ரீகோழியாலம் ஸ்வாமி பங்குனி அனுஷம்.

ஸ்ரீ:

நன்றியறிவிப்பு

வேதாந்தபுஷ்பாஞ்ஜலி என்னும் இந்த க்ரந்தம் உடைய வேதாந்த க்ரந்தமாலையைத் தொடங்கும் போதே, எல்லா உபநிஷத்துக்களிலும் ஓதப்பெற்ற ப்ரஹ்மவித்யைகளெல்லாம் திருவேங்கடமுடையான் விஷயமாக அவற்றைக் கொண்டு அவனை விளித்துத் துதி செய்து எழுதப்பெற்றது பத்து உபநிஷத்துக்கள் மட்டுமல்லாமல் முன்னோர் கையாண்ட மற்றும் பல உபநிஷத்துக்களின் பொருளும் இதில் சுருக்கமாகத் தெளிவிக்கப் பட்டுள்ளது. உபநிஷத் பாஷ்யத்தின் சுருக்கமாகவும் பல புதிய அர்த்தங்களை யடக்கியும் ஸ்ரக்தராவ்ருத்தத்தில் செய்த ஸ்துதியாகும் இது இப்போது தமிழுரையுடன் எல்லோரும் விசேஷார்த்தங்களை யறிந்து பகவானை ஸ்துதி செய்வதற்காக வெளியிடப்படுகிறது.

முப்பது வருஷத்திற்கு முன்னமே இவ்வாறு அச்சிட்டு ப்ரசுரிக்க வேண்டிய க்ரந்தம் இப்போதே இடம் பெற்றதற்கு இதற்குப் பணவுதவி புரிய முன் வந்த நல்லோரே காரணமென்னலாம். திருவேங்கடமுடையானிடம் விசேஷ பக்தியுடன் ஸ்ரீநிவாஸ னென்ற அவன் திருநாமத்தை இக் குடும்பத்தாரின் பெயர் ஒவ்வொன்றிலும் அவர்கள் சேர்த்துக் கொண்டிருப்பதால் இவர்களையே இதற்கு நன் கொடை யளிக்க முன் வருவிக்க அவன் திருவுள்ளம்

கொண்டான். உலக ப்ரஸித்தராய், கண்வைத்ய த்தின் கரை கண்டவராய், வெளிநாட்டாராலும் புகழ்ப்பெற்றவராய் ஏழையானவர்களுக்கு இலவச மாகவே கண்வைத்யம் செய்பவராய் வர்ணாச்ரம தர்மத்திலே விசேஷ ஊக்கமுடையராய் ஒருநாள் கூட விடாமல் விடியற்காலத்தில் ஸ்நானம் ஸந்தியை திருவாராதனம் செய்துவிட்டே கண்வைத்ய சாலை களுக்குப் போகின்றவராய் ஸ்ரீகோழியாலம் ஸ்வாமி திருவடியை யாச்ரயித்து ஆத்மாவை உய்வித்துக் கொண்டு நீடுழி விளங்கிய இ. வி. ஸ்ரீநிவாஸன் என்ற கண்டாக்டர் கண்கொடுக்கும் தெய்வம் என்னப் பட்டவர். ஆசார்யனுக்கும் கண்வைத்யம் செய்து கைங்கரியத்தி லீடுபட்டவர். இவர் குடும்பத்தைச் சார்ந்தவர்கள் தங்களுக்கு எல்லோருக்கும் இதில் ஸம்பந்தம் வேண்டுமென்று ஆசைப்பட்டு அவரு டைய ஞாபகார்த்தமாக இதை ப்ரசுரம் செய்ய உதவினார் அவர்களுடைய பெயர்களின் விவரம் முன் பக்கத்தில் விரிவாகக் குறிக்கப் பெற்றுள்ளது. திருவேங்கடமுடையானின் படமும் ஸ்ரீகோழியாலம் ஸ்வாமியின் படமும் ஸாத்விகத்யாகத்துடன் சேர்க் கப்பட்டுள்ளன. ஒரு ஸமயத்தில் ஸ்ரீகோழியாலம் ஸ்வாமியின் ஆச்ரமம் செப்பனிட இக் கண் டாக்டர் என்னிடம் ரூபாய் அளித்தார் பிறகு பார்த்தபோது த்ரவ்யம் அவசியமில்லை யென்றேற்பட்டதால் அவ ரிடமே திருப்பிக் கொடுத்து, இருப்பதைச் சொன் னேன். அவர் மஹோதாரரானபடியால் அந்த த்ர

வ்யம் விசேஷ வட்டியுடன் இப்போது இந்த மஹத் தான கைங்கர்யத்திற்கு அவர் ஸந்ததி மூலம் என்னிடமே சேர்ந்தது போலும்.

திருவேங்கடமுடையானுக்கு மேலான தெய்வமில்லை. உபநிஷத்தென்கிற வேதாந்தத்திற்கு மேலான க்ரந்தம் இல்லை. ஸ்தோத்ரம் செய்வதை விடச் சிறந்த தர்மம் வேறில்லை. ஸ்ரக்தராவ்ருத்தமென்னும் சந்தத்துக்கு மேம்பட்ட சந்தமில்லை உபநிஷத்திலுள்ள ஒவ்வோர் அம்சத்தையும் விடாமல், எம்பெருமானையே விளித்து அவனுக்கு அர்ச்சனையாகப் புஷ்ப்பங்களை ஸமர்பிக்க அமைக்கப்பெற்று மனத்தில் ஸுகமாய் தரிக்கக் கூடிய நடையிலிருப்பதால் இதை எல்விதத்திலும் பக்தஜனங்கள் ஆதரிப்பார்களென்று நம்புகிறோம். ஸ்ரீநிவாஸ குடும்பத்தார் மூலம் ஸ்ரீநிவாஸ ஸ்தோத்ரத்திற்கு த்ரவ்யம் பெற முயன்றவரும் ஆர். வெங்கடாசார்யரே. எல்லாம் அவரே. எல்லோரும் தெய்வகுருபக்தி புகழ் பணம் ஆயுள் ஸந்ததி முதலிய ஸம்பத்துடன் வாழ்க.

உத்தமூர்—தி. வீரராகவாசார்யர்

உபய வேதாந்தக்ரந்தமாலா ஸம்பாதகர்.

यं वेदाः पर इत्यनन्यहृदया यं व्यूह इत्यागमाः
यं प्रादुर्विभवं पुराणवचनान्यन्ये यमर्चामयम्
यं ध्यायन्ति च योगतन्त्रनिपुणा हार्दं कृपाद्राघवं
श्रीमान् अद्भुतभव्यरूपमहिमा देवोत्तमो दृश्यताम्''

என்று நாம் வேறிடத்தில் குறித்தபடி வேத-பஞ்சராத்ர-புராண-ப்ரபந்த-யோகசாஸ்த்ரங்களிலே முறையே பர-வ்யூஹ-விபவ-அர்ச்சா-ஹார்தரூபமாக விளங்கும் ஸ்ரீமந்நாராயணன் திருவேங்கடமலையில் நம் கண்ணுக்கிலக்காகி நிற்கிறான். இவனை உபநிஷத்துக்களில் ஓதிய பக்தி ப்ரபத்தி மார்க்கங்களைக் கொண்டு விரித்துரைப்பது இந்த வேதாந்த புஷ்பாஞ்ஜலி. உபநிஷத் பாஷ்யபரிஷ்காரம், உபநிஷத்ஸாரம், உபநிஷதர்த்த ஸங்க்ரஹம் என்ற மூன்று க்ரந்தங்கள் எழுதி ப்ரசுரம் செய்துளோம். இது நேரில் எம்பெருமானையே விளித்துப் துதிப்பதால் அளவற்ற பலன் அளிப்பதாகும். இதில் பெரியபிராட்டியாரை ஓதும் ஸ்ரீஸூக்தத்தின் சுருக்கமாக ச்லோகம் எழுதப்படவில்லை. அதை நமது ஸ்ரீவேங்கடேச கல்யாண சரித காவ்யத்தில் (2.ஸ) காணலாம். த்வயோபநிஷத்து ரஹஸ்ய விஷயமாகையால் அதை விவரிக்க ச்லோகம் எழுதவில்லை. இது எல்லோரும பாராயணம் செய்யவான உபநிஷத்ஸ்தோத்ரமாகும் முடிவில் பரவித்யைகளின் பெயர்களும் உபநிஷத்திலுள்ள பகவந்நாமங்களும் இங்கே சேர்க்கப்பெற்றன.

சுபமஸ்து.

நூலாசிரியர்

श्रीः

श्रीनिवासपरब्रह्मणे नमः

वेदान्तपुष्पाञ्जलिः

—o—o—

नत्वा श्रीरङ्गरामानुज.निगमशिरोलक्ष्मणाख्यौ मुनीन्द्रौ
श्रीमन्तौ रङ्गरामानुजमुनितिलकौ श्रीमदाचार्यरत्नम् ।
त्रय्यन्ताचार्यसंज्ञं यतिपतिभगवल्लक्ष्मणार्यं श्रियञ्च
श्रीशैलोत्तुङ्गशृङ्गस्थिरशुभविभवं श्रीनिवासं प्रपद्ये ॥ १ ॥
श्रीभाष्ये भक्तिमादावभिलषति गुरुर्ब्रह्मणि श्रीनिवासे
श्रुत्यन्ताचार्यघुष्टः 'श्रुतिनिकरशिरश्शेखरः श्रीनिवासः ।

ஸ்ரீ:

வேதாந்தபுஷ்பாஞ்ஜலிவிவரணம்

1 ஸ்ரீரங்கராமாநுஜமஹாதேசிகன் ஸாக்ஷாத் ஆசார்யன், ஆசார்யரும் ப்ராசார்யருமானவர் ஸ்ரீவேதாந்தராமாநுஜமஹாதேசிகன். மேலாசார்யன் ஸ்ரீரங்கராமாநுஜமஹாதேசிகன். (கேதாண்டபட்டி ஸ்வாமி). உபநிஷத் பாஷ்யகாரர் ஸ்ரீரங்கராமாநுஜ ஸ்வாமி. எம்பெருமான் மூலம் வேதாந்தாசார்யபிருதம் பெற்றவர் ஆசார்யரத்னம். தர்சந ஸ்தாபகர் பகவத் ராமாநுஜமுநிவர்—இவர்களையும் பிராட்டியையும் வணங்கி திருமலைமுடியில் நித்ய வைபவத்தோடு விளங்கும் திருமாலை சரணமடைகிறேன்.

2 ஸ்ரீபாஷ்யகாரர் ஸ்ரீபாஷ்யத்தின் தொடக்க

स्वामी श्रीरङ्गरामानुजमुनिरतनोत्पुच्छसच्छायमेनं
श्रृङ्गारस्याञ्जनाद्रेरनमदुपनिषद्भाष्यमारिप्समानः ॥ २ ॥
भक्तिन्यासप्रभिन्नाः भगवति कमलावल्लभे काङ्क्षितार्थे
विद्याः श्रुत्यादिसिद्धाः विविधतनुगुणस्थानक्लृप्तव्यवस्थाः ।
तत्र श्रुत्यन्तदृष्टाः परमिह गुरुभिः प्रेक्षितोऽहं यतिष्ये
सारोद्धारेण गृह्णन् रचयितुमुचितं श्रीनिधेः स्तोत्रमस्य ॥ ३ ॥

த்தில் ஸ்ரீநிவாஸனிடம் தமக்கு பக்தியை வேண்டிக் கொண்டார் ஸ்ரீமந்நிகமாந்த குருவும் அதிகரண ஸாராவளியில், 'வேதசிரோபூஷணமாயிருப்பவன் ஸ்ரீநிவாஸன், (98) என்றார். உபநிஷத்பாஷ்யகாரரும் अञ्जनाद्रीश्वर என்று திருவேங்கடமுடையான் விஷயமாக ச்லோகத்தை இயற்றித் தமது பாஷ்யாதிகளுக்கு மங்கள ச்லோகமாக்கினார். ஆகையாலும் முழு உபநிஷத்தையும் திருவேங்கடமுடையான் விஷயமாக இங்கே சொல்வது தகும்

3 ச்ரிய:பதியான பகவான் விஷயத்தில் அவரவர் இஷ்ட ஸித்திக்காக பக்தி ப்ரபத்தி யென்னும் இரு வகையான வித்யைகளும், அவன் குணங்கள், திருமேனி, இருக்குமிடம் இவற்றினுடைய வேறுபாட்டினால் வெவ்வேறாகப் பிரிக்கப்பட்டு வேதபாஞ்சராத்ர புராணாதி ப்ரஸித்தங்களாயிருக்கின்றன. அவற்றில் வேதாந்தங்களில் காணப்பெற்ற வித்யைகளை ஸாரமாகக் குறித்து ஸ்ரீநிவாஸன் விஷயமாக ஸ்தோத்ரம் இயற்ற ஆசார்யகடாக்ஷ மூலம் அடியேனது முயற்சி.

भक्तिर्मुक्त्यर्थविद्या स्मृति-विदि-दृशि-निध्यानमुख्याभिधाना
लक्ष्मीकान्तैकताना बहुविधचिदचिद्गोचरत्वेऽपि सर्वा ।
नामोद्गीथादिविद्याप्रभृतिनि विविधे वेदने क्वापि काम्ये
भाति ब्रह्म स्वतन्त्रे परवति च गुणाद्युज्झितं तद्युतं वा ॥४॥

---

4 **मुक्त्यर्थविद्यावत् फलान्तरार्थविद्याऽप्यस्ति। तत्र मुक्तिविद्या भक्तिः स्मृति-वेदन-दर्शन-निध्यान-उपासनादिवाचकैश्शब्दैः छागपशुन्यायेन सामान्यविशेषरूपेणोच्यते। मुक्तिविद्यायाः लक्ष्मीकान्तविषयकत्वं नियतम्। काम्यविद्या दृष्टि-अदृष्टिरूपेण वेदन-उपासनादिरूपतया च विविधा। तत्र कचित् ब्रह्मविषयकत्वमपि। तत्र काश्चित् विद्याः क्रतुप्रयोगान्तर्गतोद्गीथादिविषयकत्वात् पराधीनाः पृथक्कर्तुमशक्याः। यथा उद्गीथविद्या। 'नाम ब्रह्मेत्युपासीत' इत्यादिः नामादौ ब्रह्मदृष्टिरूपा तु क्रतुप्रयोगानपेक्षणात् स्वतन्त्रा। तत्र काश्चित् सत्यत्वादिस्वरूपनिरूपकधर्ममात्रविशिष्ट ब्रह्म विषयिण्यः। इदमेव तस्य गुणादुज्झितत्वम्। उद्गीथादिविषयाः काश्चित् विद्याः पुण्डरीकाक्षत्व-परोवरीयस्त्वादिगुणविग्रहादिविशिष्टपरब्रह्मविषयिण्योऽपि।**

4 மோக்ஷார்த்தமான பக்தியென்கிற வித்யையானது ஸ்மரணம், **वेदन**ம், தர்சநம், **निध्यान**ம், உபாஸநம், இவை முதலான சொற்களால் உபநிஷத்துக்களில் சொல்லப்படும். பல சேதநாசேதநங்கள் அவற்றில் விஷயமானாலும் முக்கியமாக ச்ரிய:பதியையே விஷயமாகக்கொண்டதாகும். காம்யமான உபாஸந த்தில் சிலவற்றில் திருமால் விஷயமாகிறான். உதார ணம்—த்ருஷ்டி விதியில், **'नाम ब्रह्मेत्युपासीत' 'उद्गीथं हिरण्मयपुरुषमुपासीत' इत्यादि**யாம். நாமோபாஸனம் கர்மா

ब्रह्म श्रीवासमेकं प्रथममुपनिषत्सूक्तिभिः सर्वहेतुं
व्याख्याय व्यासयोगी व्यभजत बहुधा भक्तियोगं तृतीये ।
शास्त्रस्तोमाभियुक्तैः शितशुभमतिभिः संप्रदायैकवेद्ये
का नस्तद्भक्तिमार्गे मतिरिह तदपि स्वादु यावत्तु लभ्यम् ॥५

श्रीमत्त्रय्यन्तसूरिप्रथितनिरुपमस्रग्धरास्रग्धराणां
पुंसां तत्पुण்யगन्धग्रहणपरवतां कीदृगस्मिन् रुचिः स्यात् ।

வுக்கு ஸம்பந்தப்படாமல் ஸ்வதந்த்ரமானது; இரண்டாவது கர்மாங்கமான உத்கீத விஷயமாயிருப்பதால் பரதந்த்ரம்—யாகாநுஷ்டானகாலத்தில் தான் செய்யப்படும். இது அதிகப்படி குணமில்லாமல் ப்ரஹ்மத்தை விஷயீகரிப்பதுமாகும். पुण्डरीकाक्षत्व-परोवरीयस्त्वादि-குணங்களோடு சேர்ந்த ப்ரஹ்ம விஷயமுமாகும். (4)

5 வ்யாஸபகவான் முதலில் உபநிஷத் வாக்யங்களைக் கொண்டு जगत्कारण லக்ஷணத்தினால் உபலக்ஷ்யமான ச்ரிய:பதியை விரிவாக நிரூபித்து அவன் விஷயமான பக்தியோகத்தை மூன்றும் அத்யாயத்தில் மூன்றும் பாதத்தில் பலவிதமாகப் பிரித்தருளினார். பல சாஸ்த்ரங்கள் பக்தியோக கல்பம் என்பவற்றில் இழிந்தவராய் கூர்மையான மநநசக்தியுள்ளவர்களுக்கு ஸம்ப்ரதாயத்தையும் கொண்டு பக்திமார்க்கம் செவ்வனே அறியப்படும். ஆயினும் இங்கு நமக்குக் கிடைக்குமளவும் சுவைக்கத் தக்கதென்று இதில் இழிக.

० स्रग्धरास्रग्धराणां = स्रग्धरावृत्तश्लोकरूपमालाधारिणाम् ।

इत्थं सम्यग् विदन्नप्यनघगुरुवरास्पृष्टपद्धत्यदृष्ट्या
तद्ग्रन्थाभ्यासनिर्यत्पदघटनपरस्त्वेष किञ्चित् करोमि ॥ ६ ॥

ईशावास्योपनिषत्

ईशा श्रीश ! त्वयेदं निखिलमपि जगद् वास्यतेऽन्तः स्थिते त्व-
य्येवं भोग्ये हतात्मा भ्रमति बत बहिर्मात्रगृध्नुर्जनोऽयम् ।

पद्धत्यदृष्ट्या इत्यनेन सर्वाऽपि गद्यपद्यमयी पद्धतिःएतदाचार्यसञ्चरितैव । तत् प्रकारान्तरावलम्बेऽपि अचमत्कारो मादृशवाक्येषु तुल्यः इति ज्ञाप्यते ।

7 ईशावास्यमित्यत्र पदद्वयम् । ईशेति ईट्शब्दः तृतीयान्तः यौगिक इति ज्ञापयितुं ईशा इति पृथगुक्तम् । अत्र श्लोके, भुञ्जीथाः, आत्महनो जनाः, मा गृधः कस्यस्वित् धनम्, तदन्तरस्य

6 ஸ்ரீதேசிகன் அருளிச்செய்திருக்கும் அற்புதமான ஸ்ரக்தரா வ்ருத்த ச்லோகங்களில் ஆழ்ந்து ரஸித்திருக்கும் மஹான்களுக்கு இந்த ஸ்ரக்தரா ச்லோகங்களை நோக்க எங்ஙனே ருசியுண்டாகும். ஆயினும் ஸ்ரீதேசிகன்தொடாத கத்யபத்யமார்கம் ஒன்றுமில்லை. அந்த ஸ்ரீதேசிக ஸ்ரீஸூக்திகளை அதிகமாக ஆவ்ருத்தி செய்து வருவதால் அந்த நடை சிறிதாவது இதற்கு ஏற்படுமென்றும் இந்த கிஞ்சித்காரத்தில் துணிவு. இனி, திருவேங்கடமுடையான் விஷயமாக ஒவ்வோருபநிஷத்தும் ஸமந்வயப்படுத்தப்பெறும்.

7 ஈசாவாஸ்யோபநிஷத்து—ஸ்ரீநிவாஸனே! இவ்வுலகெல்லாம் நியமிக்கும் உன்னால் வ்யாபிக்கப் பட்டிருக்கிறது. எங்குமுள்ளே யிருக்கும் நீ போக்ய

व्याप्तं शुद्धं सुकर्मा नियमितकरणस्त्वामुपास्योक्तमन्त्रो
दिव्यत्वद्रूपदर्शी गतशुगकलुषस्त्वत्पदे त्वां नमस्येत् ॥ ७ ॥
गीतासु ज्ञानयज्ञस्त्वयि खलु नवमेऽगीयतैकत्वयुक्ते
कृत्वादिव्यष्टिलोकात्मनि निखिलसमष्ट्यात्मके व्याप्तबीजे ।

सर्वस्य तदु सर्वस्यास्य बाह्यतः, कुर्वन्नेवेह कर्माणि, अविद्यया (कर्मणा) मृत्युं तीर्त्वा, संभूतिञ्च विनाशञ्च (विनाशः शमदमादिः) इत्यादिवचनं स्मर्तव्यम्। उक्तमन्त्रः= उक्ताः मन्त्राः येन सः। ते च हिरण्मयेन पात्रेण इत्यादयः प्रार्थनामन्त्राः । त्वद्रूपदर्शीति। 'यत्ते रूपं कल्याणतमं तत्ते पश्यामि' इति वचनम्। गतशुक्। 'तत्र को मोहः कश्शोकः' इति वाक्यम्। अकलुषः; युयोध्य स्मज्जुहुराणमेन इति। त्वत्पदे; सुपथा राये इति रैशब्देन परमपदं उक्तम्। त्वां नमस्येदिति। ते नम उक्तिं विधेम इति वचनम्। एवं प्रतिश्लोकं तत्तदुपनिषद्भागपठनेन तद्गतपदजातस्मारकत्वं श्लोकस्थपदानां यथायथं स्वयमेव परीशीलनीयम्। कर्मकाण्डान्तर्भावानुगुण एष आरम्भः।

மாயிருக்க அந்தோ! ஜீவராசி தன்னை யழித்துக் கொண்டு வெளி வஸ்துக்களிலெங்கும் பேராசை வைத்துத் திரிகின்றதே எங்கும் தங்கியும் அங்குள்ள தோஷங்களுக்கு இடமாகாத உன்னை இந்த்ரியங்களை யடக்கி உபாஸித்து மந்த்ரங்களைக் கொண்டு ப்ரார்த்தனை செய்து உனது திவ்யமங்கள விக்ரஹத்தைக் காண்பவன் சோகம் தீர்ந்து, நீ புண்யபாபங்களெல்லாம் தொலைப்பதால் பரமபதம் பெற்று உன்னைத் தொழுபவனேயாகிறான். கர்மகாண்ட இருப்புக்குத் தக்க தொடக்கம் இது.

8 गीतासु, ज्ञानयज्ञेन चाप्यन्ये, एकत्वेन पृथक्त्वेन बहुधा

8 ஸ்ரீபகவத்கீதையில் (9) अहं क्रतुः என்று

एवंरूपेण वेद्यः स वृषगिरिपते! वर्ण्यसे वासुदेवः
त्रैविद्यैः क्षुद्रकामैरिव भवविमुखैः संहितान्तेऽत्र सेव्यः ॥८॥

केनोपनिषत्

वश्यश्चेत् ब्रह्मगिर्याह्वयकरणगणः स्यात् परिच्छेदयोग्यं

विश्वतोमुखम्, अहं क्रतुरहं यज्ञः निधानं बीजमव्ययं इत्यादिकं स्मर्तव्यम्। अत्रापि ओं क्रतो स्मर, एकत्वमनुपश्यतः, याथातथ्यतोऽर्थान् व्यदधात् इत्यादि। वासुदेवः इति ईशावास्यमिति पदद्वयलब्धम्। इयमुपनिषत् कर्मकाण्डरूप संहितान्तिमानुवाकः। न तु बृहदारण्यकवत् वेदस्यान्तः। इतरवैलक्षण्येन संहितायामेव एतद्घटनं फलान्तरकामैरिव निष्कामैरपि कर्मकाण्डोक्तसर्वकर्माराध्यं ब्रह्म भवतीति ज्ञापनाय अयं तुरीयपादार्थः।

ஆரம்பித்து ப்ரளயத்தில் ஒருவனுயும் பிறகு ஸமஷ்டியும் வ்யஷ்டியுமான ஸர்வ வஸ்துவுக்கு அந்தர்யாமியாய் க்ரது யஜ்ஞாதி ஸ்வரூபனுமாக உன்னை வர்ணித்திருக்கிறது. அது தோன்றுமாறு இங்கும்வர்ணிக்கப் படுகிருய். இந்த ஈசாவாஸ்யோபநிஷத்து வேறு உபநிஷத்துக்கள் போல் தனிப்படாமல் சுக்ல யஜுர் வேத ஸம்ஹிதையில் கடைசியான நாற்பதாம் அத்யாயமாகத் திகழ்கிறது, இக் கர்மகாண்டத்தில் விதிக்கப்பட்ட கர்மாக்களெல்லாம் வேறு பலன்களை விரும்புகின்றவர்களால் போல், முமுக்ஷுக்களாலும் உன்னை ஆராதிக்க நிஷ்காமமாகச் செய்யப்படலாம் என்று இதனைலறிவித்ததாம். (8)

9 मनःप्राणवाक्चक्षुश्श्रोत्राणि पञ्च करणानि मुमुक्षूपयुक्तानि सर्वत्रोपनिषदि आदृतानि ऐतरेये ब्रह्मगिरिरिति नाम्ना निरूपितानीति वयमेव परिष्कारे विशदमवोचाम। शिष्यः तद्दर्शी-

कृत्स्नं ब्रह्मेति मत्या श्रुतिनिकरनुतेष्वेष्वधीशानुयोगे ।
प्रत्येकाधीशदूरो भवसि यदपरिच्छेद्यभूमा ततस्त्व-
य्याह श्रीकान्त ! तत्तत्करणयमयितृत्वाधिगत्यैव मुक्तिम् ॥९

करणेन भगवन्तं पूर्णं परिच्छिद्य दिदृक्षुराचार्यं पप्रच्छ, के तेषामधीशा इति । एवं तत्कृते अधीशविषयकेऽनुयोगे, हे श्रीकान्त ! तव तत्तदधीशदुर्गमत्वं अपरिच्छेद्यभूमत्वं तवैव सर्वकरणनिर्वाहकत्वं तावज्ज्ञानादेव मोक्षञ्चाचार्य उपदिदेश । पश्यत श्लो. -7.51.

9 **கேநோபநிஷத்து.** திருமாலே ! மனம் வாக்கு, ப்ராணன் கண் காது என்ற ஐந்து கருவிகளை வசப்படுத்தி அவற்றின் மூலம் உன்னைப் பரிபூர்ணமாய் அறியவேண்டுமென்று ஆசைப்பட்டு, அக் கருவிகளை ஏவும் தேவதைகள் யாவரென்று சீடன் ஆசார்யனைக் கேட்க, அவர், இது கூடிவராது, அவனுடைய மேன்மையானது அளவிடப்படாதது ; அக் கருவிகளின் தேவதைகளுக்கும் அவன் எட்டாதவனென்றும் அவர்களையும் அக் கருவிகளையும் நியமிப்பவன் அவன் என்றும் அவ்வாறு உபாஸித்தே மோக்ஷம் பெறலாமென்றும் உபதேசித்தார், இந்த ஐந்து கருவிகள் முமுக்ஷுவுக்கு மிகவும் உதவுகின்றனவென்றும் ஒவ்வொரு உபநிஷத்திலும் பல இடங்களில் இவை புகழப்படுகின்றன என்றும் இவற்றிற்கு ब्रह्मगिरि என்று பெயரும் அதன் கருத்தும் ஐதரேய உபநிஷத்தில் விளக்கப்படுமென்றும் யாரும் கூறாதது நமது பரிஷ்காரத்தில் காண்க ; இங்கும் 47-51. ச்லோகங்களில்.

यक्षं वह्न्यग्निवायुप्रभृतिपरिभवं यन्महेन्द्रोऽप्युमातो
बुद्ध्वा ब्रह्मामरेभ्यो विजयदमवदत् ; पञ्चके तं श्रुतीद्धे ।
प्राणादौ प्राणनाद्यावहमपि च परिच्छित्तिदूरं वनं त्वां
ध्यायन्तोऽनन्तलोके तव हतदुरिताः श्रीनिवासामृताः स्युः ॥१०

---

10 यक्षं = पूज्यं पुरुषमाविर्भूतम् । प्रभृतिपदेनेन्द्रग्रहणम् । उमातः = पार्वतीमुखात् । इन्द्रो बुध्वा, अमरेभ्योऽवदत्, अस्माकमसुरविजयः एतद्ब्रह्मानुग्रहादासीदिति । हे श्रीनिवास! उक्तप्राणनादिशक्तिप्रदत्व - अपरिच्छिन्नत्व - वनत्वा(वननीयत्वा)दिना त्वद्ध्यायिनां नाशरहिते तव लोके स्वर्गस्थितिः ॥

10 ஸ்ரீநிவாஸனே! அஸுரர்களை வென்று தேவர்கள் வாழும்படி நீ அருள் புரிந்திருக்க அதை யறியாமல் அஹங்காரிகளான அவர்களுக்கு உண்மையை உணர்த்த ஒரு யக்ஷனை (பூஜிக்கத் தகுந்த புருஷனை) ஆவிர்பவித்து நின்றாய். உன்னை அறிவதற்காக தேவர்கள் அக்னியை அனுப்பினார்கள். நீ எதிரில் வைத்த உலர்ந்த புல் ஒன்றைக்கூட அக்நி எரிக்கமாட்டாமல் வெட்க முற்றான். பிறகு அவர்கள் அனுப்பிய வாயுவும் அப் புல்லையே அடித்துக்கொண்டு போகமாட்டாமல் வெள்கினான். பிறகு இந்த்ரன் வந்தபோது அவனோடு பேசாமல் மறைந்தாய். அவன் வானத்தில் பார்வதி ஸஞ்சரிப்பதைக் கண்டு, நான் நெருங்க வாகாத இந்த யக்ஷன் யார் என்றான், அவள்மூலம் பரப்ரஹ்மமான உனது ப்ரபாவமறிந்தான். இப்படி ப்ராணாதி கருவிகளுக்கும் சக்தி யளிப்பவனும் எல்லா

कठोपनिषत्

शिष्यस्थैर्यं सतत्त्वाधिगममपि वशीकारवर्त्मापृथक्त्वं
सर्वस्योपासकाप्यं फलमतिशयितं योगदृष्ट्योत्क्रमञ्च ।
षड् वल्ल्योऽध्याययुग्मेऽभिदधति कठगाः तत्पितुः सौमनस्यं
श्रीशाग्निं नाचिकेतं त्वयि स दृढमतिर्मुक्तिविद्यां च वक्ते ॥११

தேவர்களுக்கும் அளவிடப்படாதவனுமான உன்னை வநமென்கிற நாமத்தோடு உபாஸிப்பவர் பாபங்கள் கழிய அழிவற்ற ஸ்வர்க்கமான பரமபதத்திற்குச் சென்று சாச்வதமாயிருப்பர். வநம் = பஜநீயம்— ஸேவ்யம். (10)

11 हे श्रीश! कठोपनिषद्वल्ल्यः षट् षडर्थान् अभिदधति वदन्ति। शिष्यस्य रागमूलकबुद्धिचलनाभावः प्रथमः । सतत्त्वशब्दः तत्त्व-पर्यायः। वशीकारः 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्युक्तानाम्। सर्वस्य अपृथक्त्वमित्यन्वयः। उत्क्रमः = देहान्निष्क्रमणम्। अग्निः इष्टकाभि-श्चयनेन निष्पाद्यमग्निस्थानम्। स एव नचिकेतसाऽनायासावगत-त्वात् नाचिकेतः।

11 ஸ்ரீநிவாஸா! இரண்டு அத்யாயமாயுள்ள கடோபநிஷத்தின் ஆறு வல்லிகளால் அடைவாக சிஷ்யனுக்கு வைராக்யத்தோடு ஸ்த்திரபுத்தியும், தத்துவத்தின் அறிவும், கருவிகளை வசிகரிக்கும் வழியும், எல்லாம் உன்னை விட்டுப்பிரியாமையும், உபாஸகனுக்கு உயர்ந்த பலனும். யோகத்தினால் உன்னைக் கண்டு புறப்படுவதும் சொல்லப்பெறும். நசிகேதஸ்ஸை யமனது இடம் சென்றவிடத்தில் தன்னிடம் பிதா நன்மனமுடையனாயிருக்க வேணுமென்றும், நாசிகேதாக்னியை நிரூபிப்பதையும் உன்னிடம்

चित्वाऽग्निं नाचिकेतं प्रशमितकलुषो ब्रह्मजज्ञात्मभूतं
मत्वा तं मुक्तिमेतीत्यधिगमितमतिः श्रीश ! पप्रच्छ मृत्युम् ।
मुक्तः सत्त्वात्मको निर्विकृतिरिति वदन्त्यन्यथाऽन्ये च तत् त्वं
तत्त्वं ब्रूहीति तस्मात् त्रय इह कथिताः गन्तृगम्यौ गतिश्च॥१२
सत्यं स्याद् ब्रह्मजो ज्ञस्तदपि न जडवज्जायते ; हर्षशोकौ
न स्तो मुक्ते विकारौ; स बहुसहजधीमोदभृत् श्रीश ! यस्मात्।

உறுதியான மனதுடன் மோக்ஷவித்யையும் வரனைக் கேட்டுப் பெற்றான்.

12 ब्रह्मणो जातत्वात् ज्ञत्वाच्च जीवो ब्रह्मजज्ञः अग्नौ तदात्मभूतत्वद्भावनया कलुषशमनान्मुक्तिरिति द्वितीयवरलाभेन ज्ञात्वा मृत्युं=यममप्राक्षीत्, 'येयं प्रेते' इत्यादिना। तदर्थश्च मुक्तात्मविषये बहुधा विवदन्ते ; तस्य तत्त्वं त्वमुपदिशेति। ततो यमः गन्तुर्जीवस्य गम्यस्य ब्रह्मणो गतेर्भक्तेश्च त्रयाणामुपन्यासमकरोत्।

12 ஸ்ரீநிவாஸா ! ப்ரஹ்மத்தினிடம் பிறந்த சேதனனின் ஆத்மாவாக அக்னியை பாவிக்கப் பாபம் போமென்றறிந்த பிறகு நசிகேதஸ்ஸு ம்ருத்யுவை மூன்றாவது வரனை, முக்தியில் ஆத்மா நிர்விகாரமா யிருக்கிறதென்றதில் பல விவாதங்கள் உள. உண்மை உணர்த்த வேணுமென்று கேட்க, ம்ருத்யுவும். ஜீவன் ப்ரஹ்மம் உபாயமென்ற மூன்றை உபதேசித்தார். அக்னியால் உபாய விரோதி பாபமே போம்.

13 ஸ்ரீநிவாஸனே ! ஜீவன் ப்ரஹ்மத்தினிடம் பிறந்தாலும், அசேதந வஸ்துவைப் போல் விகார முடையவனல்லன்; முக்தனுக்கு ஹர்ஷமும் சோக

पारं विष्णोः पदं ते कल्पितरथिरथाश्वादिक्लृप्तिः प्रपन्नो
ब्रह्मस्थो ग्रन्थिभेदी भजति स विरजाः स्वात्मनि त्वामुपास्य ॥१३
सर्वाम्नायाभिनन्द्यः समफलदमहातारमेयोऽन्तरात्मा
व्यापी त्वं वत्सलोऽत्ता श्रितरम । पुरुषो विष्णुरङ्गुष्ठमात्रः ।
साक्षात् स्वाप्नार्थकर्ता परिणमितजगद्बीज उक्तो विधाता
कामानां, सर्वभाक्त्प्रभ इह जगतः कम्पनोऽत्रैव वेद्यः ॥१४॥

மும் இல்லை; வெகுவிதமான ஜ்ஞானமும் ஆனந்தமுமே யாகையால். விஷ்ணுவான உனது பரமபதம் செல்ல எது ரதம், யார் அதற்கு உரியவன், எது குதிரை. கடிவாளமெதென்றெல்லாம் அறிந்து உன்னைச் சரணம் புகுந்து ப்ரஹ்மநிஷ்டனால் ராகத்வேஷாதி முடிச்சுக்களை யவிழ்த்துதறி உன்னை யுபாஸித்து ரஜோகுணமற்று உன்னைப் பெறுவான். (13)

14 **कठोपनिषद्वेद्याः भगवद्गुणा उच्यन्ते सर्वेति । श्रितरम श्रिता रमा येन सः । समफलदः = सर्वफलप्रदः, तारः = प्रणवः ।**

14 உனது குணங்களாவன—எல்லா வேதங்களாலும் ஓதப்பெற்றவன், எல்லாப் பலனுமளிக்கும் ப்ரணவத்தின் பொருள். அந்தராத்மா, எங்கும் பரவியவன். வாத்ஸல்யமுடையன். ஸம்ஹாரி, புருஷன், விஷ்ணு, கட்டைவிரலளவான ஹ்ருதயத்திலிருப்பவன். சொப்பன வஸ்துக்களைத் தானே படைக்கிறவன். உலகின் விதையை முளைக்கச் செய்கிறவன், இஷ்டங்களை யளிப்பவன். தேசுகளுக்கும் தேசு அளிப்பவன், உலகு நடுங்கவாகிறவன் என்றவாறும்.

प्रश्नोपनिषत्

हेतुं जातौ प्रजानां श्रितरम! परतां प्राणवायोः समृद्धिं
त्वाञ्च स्वापे प्रतिष्ठां प्रणवफलभिदां षोडशाऽऽप्तं कलाश्च ।
षट् प्रश्ने पिप्पलादोऽवददिति तव सप्राणभूताक्षजीव-
स्थस्य ध्यानं त्रिमात्रप्रणवकरणकं कल्पते त्वत्पदाप्त्यै ॥ १५ ॥

इष्टाद्यैर्धूमरात्र्याद्यधिगमितपथाश्चन्द्रलोकेषु भोगान्
दिव्यान् ब्रह्मावगत्या त्वपहतदुरिता देवयानेन मुक्तिम् ।
एते जीवा लभन्तामिति सहकरणांस्तान् पतिस्त्वं प्रजानां
आत्मा संयोज्य भूतैर्जनयसि बहुधेत्युक्तमाद्ये रमेश ! ॥१६॥

---

15 ப்ரச்நோபநிஷத்து. ஸ்ரீநிவாஸா ! ப்ரஜைகளின் பிறப்புக்குக் காரணத்தையும், ப்ராண வாயுவின் உயர்ச்சியையும் அதன் மேன்மையையும் உறக்கத்தில் உன்னிடத்தில் ஜீவன் நிலைத்திருப்பதையும் ப்ரணவத்தின் மாத்ரைகளுக்கீடாகப் பலனில் வாசியையும் பதினாறு கலைகளைப் பெற்றுள்ள ஜீவனையும் இவ் ஆறு விஷயங்களை ஆறுபேருக்கு பிப்பலாதர் ப்ரச்நோபநிஷத்தில் உபதேசித்தார். ஆக ப்ராணன் பூதங்கள் இந்திரியங்களென்பவற்றோடு கூடிய ஜீவனிடமுள்ள உன்னை வேறாக ப்ரணவத்தைக் கொண்டு உபாஸிக்க வேண்டுமென்றதாயிற்று.

16 யாகாதிகளைச் செய்து தூமாதிமார்க்த்தால் ஸ்வர்க்கத்தையும், உன்னை த்யானித்து அர்ச்சிராதி மார்க்கத்தினால் மோக்ஷத்தையும் ஜீவர்கள்பெறுவதற்காக அவர்களுக்கு தேஹேந்த்ரியாதிகளை யளித்துப் பல படி பிறப்பிக்கிறாய் ஸ்ரீநிவாஸனான நீயே.

मुख्यप्राणोऽक्षवर्गोऽप्युपकरणमिहाऽऽकाशमुख्योपक्लृप्ते
देहे वागादयः प्राक् विधरणनिपुणं प्राणमेवाधिजग्मुः ।
त्वत्तः प्राणस्य जन्म श्रितरम! तनुसंप्राप्तिमप्यक्षभावं
व्याप्तिञ्चाध्यात्ममेवं बहिरपि विदुषः स्यादहीनप्रजत्वम् ॥१७॥
तारं मत्वैकमात्रं भुवि महिततपोब्रह्मचर्यादिसंपत्
श्रीमन्! अस्मात् द्विमात्रात् शशिपदग उपैत्यन्तरिक्षे विभूतिम्।

---

17 **देहविधरणादिकं प्राणवाय्वायत्तमिति वागादयो ज्ञात्वा प्राणमस्तुवन् । हे श्रीनिवास त्वत्तः तस्य जन्म देहप्राप्तिः अध्यक्षत्वं अन्तर्बहिश्च व्याप्तिरिति पञ्चकज्ञाने प्रजासमृद्धिः फलम् ।**

17 ஸ்ரீநிவாஸா! பரஸ்பரம் விவாதம் செய்து தெளிந்த வாக்கு முதலான இந்த்ரியங்கள் ப்ராணவாயுவே சரீரத்தை தரிக்கிறதென்று அதனை யண்டின; உன்னிடமே ப்ராணனுக்கும் பிறப்பு, உடலில் இருப்பு, அரசு, உள்ளும் புறமும் பரவியிருக்கை யென்பவற்றை இத்துடனறிந்தவர்க்கு ப்ரஜைகளின் ஸம்ருத்தி சொல்லப்பெற்றது.

18 **एकमात्रप्रणवपूर्वकं कार्यभूतब्रह्मोपासनेन भूमौ तपःप्रभृतिसंपद्युक्तो भवति । महितेति पदे बहुव्रीहिः । द्विमात्रप्रणवेन कार्यब्रह्मोपासने चन्द्रलोकं गतः अन्तरिक्षलोके देवभोगभाक् भवति । जीवात्मनः प्रतिष्ठाभूतं परमपुरुषं कारणब्रह्मभूतं त्वां त्रिमात्रप्रणवेन उपास्य, पुण्यपापविनिर्मुक्तः शान्तममृतं त्वत्स्थानं प्राप्य त्वयैव भोगसाम्यं प्राप्नोति ।**

18 திருமாலே! ஒரு மாத்ரையாக ப்ரணவத்தைச் சொல்லி கார்ய ப்ரஹ்மமான உன்னை உபாஸிப்பவன் புவியில் தவம் முதலான ஸம்பத்தைப்

विज्ञानात्मप्रतिष्ठां परपुरुषमभिध्याय तु त्वां त्रिमात्रात्
धूताघः प्राप्तशान्तामृतभवदनघस्थानसाविंक्र्यभोगः ॥ १८ ॥
प्राणः श्रद्धां खमापो मरुदनल इला वीर्यमन्नं मनोऽक्षं
लोको नामात्र मन्त्रस्तप इतरकृतिः षोडशैताः कलाः स्युः ।
जीवस्तद्वान्; न तु त्वम्; त्वदयनमखिलं सिन्धुमज्जन्नदीवत्
सारूप्यं ते ह्यवाप्नोत्यहिवरमहिभृद्देव! वेद्यः परस्त्वम् ॥१९॥

பெறுகிறான். இரு மாத்ரைகளுடன் ப்ரணவத்தைச் சொல்லி யுபாஸித்தால் சந்த்ரலோகமான ஸ்வர்க்கத்தில் போகம். மூன்று மாத்திரையுள்ள ப்ரணவம் ப்ரயோகித்து பரமபுருஷனை உன்னை உபாஸிக்க, பாபமெல்லாம் உதறி சாந்தமும் அம்ருதமுமான உனது ஸ்த்தானமான பரமபதத்தில் ஸர்வஜ்ஞனுய் **भोग**ஸாம்யம் பெறுகிறான். (18)

19 **अहिवरमहिभृद्देव = शेषाद्रिनाथ । षोडशकलः क इति प्रश्ने आह-प्राणादयः षोडश कलाः। तद्वान् जीवः, न तु त्वम्। नद्यः समुद्रमिव त्वां प्रति आयाता इमा अस्तं गच्छन्ति, नद्यः समुद्रसावर्ण्यमिव त्वत्सारूप्यं = सुखरूपत्वमेव लभन्ते। अतस्त्वं वेद्यःइति॥**

19 சேஷாத்ரிநாதா! ஷோடசகலன் யாரென்ற கேள்வியில், ப்ராணன் ச்ரத்தை, வானம் நீர் காற்று அக்னி பூமி வீர்யம் அன்னம், மனம்-இந்திரியம், உலகம், பெயர், மந்த்ரம், தவம், மற்ற செயல் என்பவை பதினாறு கலைகள்; அவற்றையுடையவன் ஜீவனே. உன்னிடம் அவை ஓங்கா. கடலில் ஆறுகள்போல் உன்னிடம் மறைந்துவிடும். ஆறுகள் கடல்நிறம்

मुण्डकोपनिषत्

वाजिप्रोक्ताक्षरं त्वां श्रितरम! कथयन्मुण्डकं भूतयोनिं
कर्तारं रुक्मवर्णं प्रणवधनुरवष्टम्भक्लृप्तात्मबाणः ।

பெறுவதுபோல் உன்னைப்போல் அனுகூலத் தன்மை
யை அடைகின்றன என்று கூறி முடித்தார். (19)

20 वाजिप्रोक्तेति-वाजिभिः-वाजसनेयिभिः-शुक्लयजुर्वेदाध्यायिभिः प्रोक्तमक्षरम्। बृहदारण्यके गार्गीं प्रति याज्ञवल्क्येन 'एतद्वै तदक्षरं गार्गि' इत्यादिना उक्ता अक्षरविद्या अत्र मुण्डके 'यया तदक्षरमधिगम्यते' इत्युक्ता च एकेति ज्ञापनाय इदं विशेषणम्। अत्र श्लोके मुण्डकमिति कर्तृ। वक्ति इति क्रिया। कथयन्मुण्डकमित्यत्र कथयदिति पदच्छेदः। भूतयोनित्वादिना कथयदिति मुण्डकविशेषणं नपुंसकम्। अनन्त्यैः पदैः 'यद्भूतयोनिं परिपश्यन्ति' 'पश्यते रुक्मवर्णं कर्तारम्' 'प्रणवो धनुश्शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥' 'सत्येन पन्था विततो देवयानः' 'निरञ्जनः परमं साम्यमुपैति, इत्यादिवचनानि स्मार्यन्ते ।

20 ஹே ஸ்ரீநிவாஸா! முண்டகோபநிஷத்தானது ப்ருஹதாரண்யகத்தில் கார்கியைக் குறித்து யாக்ஞவல்க்யர் சொன்ன அக்ஷரமான உன்னையே சொல்லுகிறதாய் பூதங்களுக்கு உபாதாநகாரணமாயும் கர்த்தாவாயும் (நிமித்தகாரணமாயும்) ஸ்வர்ணவர்ணமாயுமுள்ள உன்னை விவேகம் விமோகம் முதலான ஸ்ரீபாஷ்ய லகு ஸித்தாந்தத்தில் விவரிக்கப்பட்ட ஏழு ஸாதநங்களைப் பெற்றவனாய் வெல்ல வேண்டுமென்கிற புத்தியுடன் ப்ரணவமாகிற வில்லை நாணேற்றி ஜீவாத்மாவாகிற அம்பைத் தொடுத்து குறி பார்த்து அடித்து அர்ச்சிராதிமார்க்கத்தாலே உனது

सप्ताऽऽप्तः साधनानि स्थिरजयमतिराध्याय संलक्ष्य लक्ष्यं
विध्वा लब्धार्चिरादिर्दिवि तव परमं साम्यमेतीति वक्ति ॥२०

श्लिष्टोपादानभावां श्रितरम! वदति त्वत्पृतां क्षुद्रलोक-
क्लिष्टक्षेमेच्छुसम्यक्कृतपुरुषमुदेकार्थकर्मेज्यतां ते ।
देवादिव्यष्टिसृष्टिं दिव इह हृदुपासत्तिमाध्येयतार्थां
त्वद्द्रष्टृवैभवं त्वत्पदभुवि समतां मुण्डके खण्डषट्कम् ॥२१

सप्त साधनानि आप्तः इत्यत्र भक्तिसाधनानि वाक्यकारोक्तानि सप्त विवेक-विमोक-अभ्यास-क्रिया-कल्याण-अनवसाद-अनुद्धर्षरूपाणि श्रीभाष्यलघुसिद्धान्तव्याख्यातानि विवक्षितानि । 'नायमात्मा बलहीनेन लभ्यः' इत्यादिवाक्यानि तद्दर्शीनि मुण्डके ।

21 **मुण्डके षट् खण्डाः क्रमेणेमान् षडर्थान् आहुः-हे श्रीनिवास! तवोपादानत्वसहितं निमित्तकारणत्वम्, क्षुद्रलोकेषु लब्धक्लेशैः मोक्षरूपक्षेमेच्छुभिः बहुश्रुतैः पुरुषैः क्रियमाणैः त्वत्प्रीत्येकार्थैः कर्मभिः तवाऽऽराध्यता, देवादीनां व्यष्टिसृष्टिः, ध्यान सौकर्याय उपासकहृदये स्थितिः, त्वद्द्रष्टृवैभवम्, परमपदे त्वत्परमसाम्यञ्चेति।**

இடம் சென்று உன்னோடு பரமஸாம்யம் பெறுகிறு னென்கிறது. (20)

21 இம்முண்டகத்தில் ஆறு கண்டங்கள் உனக்கு நிமித்த — உபாதாநகாரணத்வத்தையும் விரக்த ஜ்ஞாநி நிஷ்காம கர்மாக்களால் ஆராதிக்கப்படுகை யையும் தேவாதி ஸ்ருஷ்டியையும் உபாஸக ஹ்ருதய த்திலிருப்பையும் உன்னைக் கண்டவர்களின் வைபவ த்தையும் மோக்ஷத்தில் உன்னோடு பரமஸாம்யத் தையும் அடைவாகச் சொல்லுகின்றன. (21)

माण्डूक्योपनिषत्

आत्मा तावच्चतुष्पात् स्फुटबहिरनुभूः सुप्तिसुष्वापमोक्ष-
स्थानो(मुग्ध्युत्क्रमौ चा)मृत्युर्लयश्चाप्यमतिसमतया भाव्यसुष्वापकोटी।
श्रीमन्! वैश्वानरस्त्वं श्रुतिभिरभिहितो विश्वरूपोऽनिरुद्धः ;
प्राज्ञश्च त्वं सुषुप्त्याद्युपकृदविकला चात्मता ब्रह्मणस्ते ॥२२॥

---

22 माण्डूक्योपनिषदि, अयमात्मा चतुष्पादिति जीवात्मनश्चतुष्पात्त्वमुच्यत इति अयमिति पदात् ज्ञायते। उक्ताः जागरितस्वप्न.सुषुप्ति.मोक्षदशा उक्ताः जीवात्मन एव। तदुच्यते [illegible], बहिर्विषयानुभववान् स्वप्न.सुषुप्ति.मोक्षस्थानकश्चेति। यद्यपि मूर्च्छारूप मुग्धिः मरणरूपमुत्क्रमणमिति द्वे दशे अन्ये स्तः-अथापि तयोः अमतिसमतया-अज्ञानरूपत्वाविशेषात् सुष्वापकोटिर्भाव्या=सुषुप्त्यान्तर्भावो ज्ञेयः। अतः कथमत्र परमात्मनिरूपणमिति चेत्—उच्यते-हे श्रीमन् त्वं वैश्वानरत्वेन वैश्वानरविद्यादिषु उक्तः। अनिरुद्धस्य विश्वरूपत्वं प्रसिद्धम्। सुषुप्तिमरणयोः त्वं प्राज्ञेनात्मनेति प्राज्ञशब्देनोच्यसे। सर्वं ह्येतद् ब्रह्म इति ब्रह्मपदं श्रूयते। आत्मशब्दोक्तं व्यापित्वनियन्तृत्वरूपमात्मत्वं त्वय्येव पुष्कलम्। अतः उपनिषदियं त्वत्परा ; न केवलजीवपरा।

22 மாண்டூக்யோபநிஷத்து ஜீவனைச் சொல்லுகிற தென்னலாம்! இங்குச் சொல்லப்படும் நாலு பாதங்கள் (நாலு தசைகள்) வெளிவஸ்துவின் அநுபவமாம் ஜாக்ரத்தசை, ஸ்வப்நம் உறக்கம் மோக்ஷமென்பவை அவனுக்கேயாம். மூர்ச்சை மரணமென்ற இரு தசைகள் வேறு இருந்தாலும் அவற்றை உறக்கத்தில் சேர்க்கலாம். அறிவின்மை துல்யமாயிருப்பதாலென்பர், ஆனாலும் மேலே சொல்லும் வைச்வாநர

ओङ्कारो ब्रह्मवाची स्फुटमिह कथिता ब्रह्मता ब्रह्मवाक्त्वात्
तस्मात् आत्मा चतुष्पादिति भवति भवेत् तारसाम्यं तदर्थे।
विश्वं त्वां तैजसञ्च श्रितरम! वदति प्राज्ञमेवं तुरीयम्
व्यूहात्मत्वेन वृत्तीश्चिति दधतमहिर्बुध्न्यवत् श्रीशुकोऽपि॥२३

ப்ராஜ்ஞபதங்களும் கீழ்க்கூறிய ஆத்ம ப்ரஹ்ம பதங்களும் உனக்கே சேரும். விச்வரூபமான அநிருத்தன் வைச்வாநரனுகலாம்; ஸர்வஜநஸம்பந்தமிருப்பதால். உறக்கம் மரணம் இவற்றில் உபகாரம் செய்கிற உன்னை ப்ராஜ்ஞன் என்கிறது வேதம். உனக்கே பூர்ணமான ஆத்மத்வமும் ப்ரஹ்மத்வமுமென்றபடி.

23 अत्र ओमित्येतदक्षरमित्यारम्भः। ओंकारश्च ब्रह्मवाची। इह=ओंकारे ब्रह्मत्वकथनं ब्रह्मवाचित्वादेव। ओंकारश्चतुष्पात्। अतस्तस्य ब्रह्मत्ववत् ब्रह्मणस्तदर्थस्य तत्साम्यवर्णनं युक्तम्। किञ्च विश्वतैजसप्राज्ञतुरीयशब्दाः त्वां वदन्ति। अहिर्बुध्न्यसंहितायां 51. अध्याये विश्वादिशब्दार्थोक्तिविस्तरः। चिति=जीवे जाग्रदादिवृत्तिकरस्त्वमिति तत्रोक्तम्। श्रीभागवते (12-11] 21—2३ श्लोकाः द्रष्टव्याः। अतस्त्वमेवैतदुपनिषदर्थः। श्रीभाष्यस्वारस्यमपि 3.2.11.सू.

23 ஓங்காரம் தொடக்கத்திலுள்ளது, அது நான்கு பாதமுள்ளது. அதைப் போல் அதன் பொருளான உனக்கே நான்கு பாதங்களைச் சொல்வது பொருந்தும் விச்வ–தைஜஸ – ப்ராஜ்ஞ – துரீயபதங்கள் உன்னைச் சொல்வன, அஹிர்புத்ந்ய ஸம்ஹிதை (51) அத்யாயம், ஸ்ரீபாகவதம் (12—11) அத்யாயம் இவற்றில் இதன் விரிவு. ஆகையால் இவ்வுபநிஷத்து உன் விஷயமே யாகும். (23)

जाग्रत्त्वाद्याश्चतस्रोऽप्यकथिषत तथा तारमात्राः शिखायाम्
ब्रह्मा विष्णुश्च रुद्रः पुरुष इति मताः देवताः श्रीनिवास! ।
नाभेर्जातोऽनिरुद्धं निखिलजनमतिप्रेरकं त्वां प्रपन्नो
रुद्रः संकर्षणं त्वां त्वमसि सृजिकरो यः स चित्ताभिमानी ॥
जीवद्वारं सुबालोपनिषदिव बहिःप्रज्ञताद्यं तुरीये

---

24 वक्ष्यमाण जैव जाग्रदाद्यवस्थानिर्वाहकत्वादपि त्वमेतदुपनिषदर्थ इत्युच्यते । अथर्वशिखायां प्रणवार्थत्वेन जाग्रदाद्यवस्थाश्चतस्रोऽप्युक्ताः । तन्नियामकदेवताश्च ब्रह्मविष्णुरुद्रपुरुषरूपा उक्ताः । निखिलजनमतिप्रेरकानिरुद्धनाभिजातत्वात् स्वजनकं त्वां ब्रह्मा प्रपन्नोऽस्ति। संहारकसंकर्षणरूपञ्च त्वां रुद्रः संहारी प्रपन्नः। त्वं मनोभिमानिप्रद्युम्नरूपः सृष्टिकर्ता । अतस्त्वद्गतं देवतात्वं तयोर्ब्रह्मरुद्रयोरप्यंशतः ।

24 அதர்வசிகையில் ப்ரணவத்தின் மாத்திரைகளாக விழிப்பு சொப்பனம் உறக்கம் நான்காம் தசை என்ற நிலேகள் சொல்லப்பெற்றன ப்ரஹ்மா விஷ்ணு ருத்ரன் பரமபுருஷன் என்பவர் அவற்றின் தேவதைகளென்றது. ப்ரஹ்மா அநிருத்த மூர்த்தியின் நாபியினின்று பிறந்ததாலும் ருத்ரன் ஸம்ஹாரியாய் அச்செயலுக்கு மூலமான ஸங்கர்ஷண மூர்த்தியை யாச்ரயித்தவனைகயாலும் அவர்களும் தேவதைகளாகின்றனர், ஆக ஜீவனின் நிலேகள் மேலே சொல்வன சதுர்வ்யூஹனை உனக்கு அதீனங்களாகையாலேயாம். நீயே இவ்வுபநிஷத்தின் பொருளாவாய் (24)

25 जीवानां जागराद्यवस्थानिर्वाहकत्वेन तद्द्वारा तद्गत्वेन

25 ஜீவர்களின் விழிப்பு முதலான தசைகளுக்கு

मुक्तार्थे नित्यरूपे त्वयि विघटयति श्रीश ! माण्डूक्यवाक्यम् ।
प्रज्ञाप्रज्ञौ च (मृत्यु प्रलय) मुग्ध्युत्क्रमणवितरणौ; व्यूहमूर्तित्रयी प्राक्
उक्ताऽनूक्तैष सर्वेश्वर इति वचनैर्लौकिककार्यप्रवृत्ता ॥ २५ ॥
आदेर्ब्रह्मादिलोकः फलमिति शिरसि, ह्रस्वमुख्यस्य चान्यत्
प्रश्ने, वैश्वानरादिं विदुष इममकारादिवर्णं त्विदं स्यात् ।

त्वां व्यूहरूपेणावस्थितमुक्त्वा, अथ नान्तःप्रज्ञं न बहिःप्रज्ञमित्यादिना तद्द्वारा बहिःप्रज्ञत्वादिवैशिष्ट्यं त्वयि परवासुदेवरूपापन्ने नास्तीत्युच्यते, तथैव सुबालोपनिषद्यप्येवं वाक्यं श्रूयते । तद्रूपं हि मुक्तानामनुभवार्थम् । एवञ्च, नप्रज्ञं नाप्रज्ञमिति क्रमेणमूर्छावस्थामरणावस्थानिर्वाहकवैलक्षण्यपरं स्यात । इतः पूर्वम्, एष सर्वेश्वर इति पदत्रयं व्यूहरूपत्रयगतविशेषपरं सत् तान्निगमनं भवितुमर्हतीत्यर्थः ।

நீ வ்யூஹரூபியாய் நிர்வாஹகன் மேலே அந்தந்த தசைககு நிர்வாஹகமாகாத ரூபமென்றது பரரூபம் அதுமுக்தர்களின் அனுபவத்திற்கானது ஸுபாலோப நிஷத்திலும் இந்த **नान्तःप्रज्ञम्** *இத்யாதி வாக்யமுளது. அங்கும் இதே பொருள்* **न प्रज्ञं नाप्रज्ञम्** *என்பதற்கு மூர்ச்சை மரணமென்ற தசைகளுக்கு நிர்வாஹ மாகாதது பரரூபமென்ற பொருளாகும். இதற்கு முன்* **एष सर्वेश्वर** *இத்யாதி வ்யூஹரூபங்களின் நிகமன வாக்யமாகும்*

6 अकार—उकार मकाराणां ब्रह्मविष्णुरुद्रार्थकत्वं तत्तल्लोकप्रापकत्वञ्चाथर्वशिरस्युक्तम् । ह्रस्वदीर्घप्लुतमात्राफलमन्यत् प्रश्नोपनिषदि । अत्र तु अकारादिवर्णान् वैश्वानरभूतानिरुद्धत्वादिना

26 ஓங்காரத்தில் அகாராதி வர்ணங்களில் ப்ரஹ்ம-விஷ்ணு ருத்ரர்களை பாவித்தால் அவரவரின்

आदित्वज्ञानसंतत्यखिलमितिमुखं श्रीश ! ; तुर्यात्मलाभो
मात्रातीतैकनादप्रणवपरपरध्यानधन्यस्य च स्यात् ॥ २६ ॥

तैत्तिरीयोपनिषत्

शिक्षावल्ल्याह काम्याः महितरम ! महासंहिताः पञ्च, तारात्
ब्रह्मप्रावण्यसिद्धिं परत इह फलञ्चान्यदाप्तुञ्च मन्त्रान् ।
वेद त्वां सर्वदेवाङ्गकमिह, कलयेत् यश्चतस्रश्चतुर्धा

भावयतां कुटुम्बे आदित्वं स्वप्रजासु ज्ञान संततिरित्यादि फलमुच्यते। मात्रातीते नादे वासुदेवभावनायाः फलं तुरीयस्य तस्य प्राप्तिरिति च।
லோகம் பெறலாமென்றது அதர்வசிரஸ்ஸு. ஹ்ரஸ்வம் தீர்க்கம் ப்லுதமென்ற மாத்ரைகளுக்குப் பலன் வேறு ப்ரச்நோபநிஷத்தில் இங்கே அகாராதி வர்ணங்களில் வைச்வாநரனென்ற அநிருத்தாதி பாவனையால் ஆதியாகலாம்; ஸந்ததியில் ஞானமும் தொடரும் என்றவாறு பலன்கள் கூறப்பெற்றன. மாத்ரைகளுக்கு மேலான நாதத்திலே வாஸுதேவனைக் கொள்வதால் அவனைப் பெறலாமென்றது (26)

27 **महासंहिताः 'अधिलोकं अधिज्योतिषम्' इति पूर्वोत्तर-वर्णसन्धिरूपसंहितायां लोकादिभावनाः 'सन्धीयते प्रजया पशुभिः' इत्यादिफलार्थाः प्रथमं वदति शिक्षावल्ली। पश्चात् प्रणवप्रार्थनया ब्रह्मणि निष्ठां परतः = लक्ष्म्याद्यितः ऐश्वर्यादिफलं प्राप्तुं मन्त्रान्**

27 தைத்திரீய உபநிஷத்தில் முதலில் சிக்ஷா வல்லியில் ப்ரஜை முதலான பலன்களுக்காக ஸம்ஹிதையில் உலகம் ஜ்யோதி முதலானவற்றின் த்ருஷ்டிகள் விதிக்கப்படுகின்றன ஸம்ஹிதையாவது முன்பின் அக்ஷரங்களுடைய சேர்க்கை. இவ்வைந்து த்ருஷ்டியே மஹா ஸம்ஹிதையாம். பிறகு ப்ரணவ

भूरादिव्याहृतीः, सोऽमरकृतबलिरित्येवमन्यच्च पथ्यम् ॥२७॥
अग्निं वायुं रविं त्वामपि च कलितवान् भूर्भुवःस्वर्महश्चे-
त्यन्तर्हृद्युज्ज्वलाङ्गं त्वमृतवपुषमाध्याय मूर्धन्यनाड्या ।
भित्वा शीर्षं प्रतिष्ठामनितरसुलभामग्निवाय्वर्कलोके-
ष्वाप्त्वा स्वाराज्यभाक् त्वामनुभवति महः सूरिवत् श्रीश! भोग्यम् ॥

वदति । 'मह इति ब्रह्म अङ्गानि अन्या देवताः' इति ज्ञात्वा भूर्भुवस्सुवर्महोरूपव्याहृतिचतुष्टये चतुर्विधभावनायां 'तस्मै देवा बलिमावहन्ति' इति देवपूज्यत्वमाह । अन्यच्च प्रणवप्रभाव-वेदानुवचनानन्तराऽऽचार्योपदेशादिकं पथ्यमाह 11-27.

ப்ரார்த்தனையிலே ப்ரஹ்மத்தினிடத்தில் நிஷ்டையும், லக்ஷ்மீ பகவான் இவர்கள் மூலமாக ஐச்வர்ய அந்நாதி பலன் பெற மந்த்ரங்களும் ஓதப்பெற்றன. கொண்டாடப்பட்ட ஸ்ரீதேவியை உடையவனே! நீ ஆத்மாவாய் மற்ற தேவதைகள் உனக்கு உடல்கள் என்றறிந்து நாலு வ்யாஹ்ருதிகளை நான்குவிதமாக பாவிப்பவன் தேவர்களால் பூஜிக்கப்படுகிறான் என்றது போன்ற பெரும் பலனையும் ஓதிற்று (27)

२८ हे श्रीश! पूर्वोक्तभूरादिव्याहृतिप्रतिपाद्यतया अग्निवाय्वादित्यपरब्रह्मज्ञाने सति अन्तर्हृदय आकाशे 'अमृतो हिरण्मयः' इत्युक्तविग्रहध्याने कृते मूर्धपर्यन्तगतया सुषुम्नानाड्या निष्क्रम्य शीर्षं भित्वा अग्निवाय्वादित्येषु प्रतिष्ठां प्राप्य स्वाराज्यरूपमोक्षं लब्ध्वा 'शान्तिसमृद्धममृतमभयं ब्रह्म त्वामनुभवति इत्युक्तम् ।

28 திருமாலே நாலு வ்யாஹ்ருதிகளுக்கு அக்நி வாயு, ஸூர்யன், ப்ரஹ்மம் இவை பொருளென்றறிந்து ஹ்ருதயத்திலே அம்ருத ஸ்வர்ணமய உரு

सत्यं नित्यप्रबोधं निखिलविधपरिच्छेददूरं विशुद्धं
त्वामानन्दं समस्तेतरभवदभिनिध्यातृवत् ध्यातुकामः ।
हेतुत्वं तेऽन्तरात्मत्वमपि चिदचितां भुक्तिमुक्तिप्रदत्वं
भीकृत्त्वं श्रीश ! बुध्वा मतनिरवधिकानन्दसान्द्रत्वधर्मः ॥२९
तद्धर्माणं गुहायां श्रितवृषधर ! निध्याय दिव्यस्वरूपं

வுடன் உன்னை த்யானித்து ஸுஷும்நா நாடி வாயி லாக கபாலத்தைப் பிளந்து புறப்பட்டு அக்நியாதி ஸ்தாநங்களில் சிறிது தங்கி ஸ்வாராஜ்யம் பெற்று உன்னை யனுபவிக்கிறுனென்றது. ஸ்வாராஜ்யமாவது புண்யபாபரூப கர்ம வச்யனை நிலை நீங்கி நிற்கை.

29-30 सत्यमित्यादिश्लोकस्य उत्तरश्लोकेनैकवाक्यता । पूर्वार्धे सत्यं ज्ञानं अनन्तं ब्रह्मेति वाक्यार्थः । तत् अमलत्व-आनन्दत्वोपलक्षणमिति ज्ञापनाय विशुद्धमानन्दमित्युक्तम् । एषां पञ्चानां स्वरूपनिरूपकधर्मत्वात् सर्वविद्यानिष्ठसाधारण्यमिति ज्ञापयितुं समस्तेत्यादि । उत्तरार्धे 'इदं सर्वमसृजत' तदनुप्रविश्य सच्च त्यच्चाभवत्, को ह्येवान्यात् कः प्राण्यात्, अथ तस्य भयं भवति, भीषाऽस्मात्, स एको ब्रह्मण आनन्दः । यतो वाचो निवर्तन्ते आनन्दं ब्रह्मणो विद्वान् इत्यादिकमनुसंधेयम् । श्रितवृषधरेति ।

29-30 வ்ருஷமலைக்கு நாதனே ச்ரிய:பதியே! ஸத்யத்வ.ஜ்ஞாநத்வ. அநந்தத்வ. அமலத்வ ஆநந்தத்வ தர்மங்களோடு ப்ரஹ்மத்தை எல்லா பக்தரையும் போலே பொதுவாக உபாஸித்து சேதநாசேதநங்களுக்குக் காரணம், அந்தர்யாமி, போகமும் மோக்ஷமுமளிப்பவன். அபராதிகளுக்கு பயங்கரன். அளவற்ற ஆநந்தமுடையவன் என்றவாறு உன்னை

मुक्तौ सर्वात्मकं त्वामनुभवति सदेत्युक्तमानन्दवल्ल्याम् ।
अन्नप्राणौ परं प्राग् जनिविधृतिकरत्वेन नुत्वा भवद्वत्
तन्नौचित्येन दृष्टिस्तव पृथगखिलान्नायुराप्त्यर्थमुक्ता ॥ ३० ॥
प्रश्नाः श्रीनाथ ! बन्धे गलित इह परं याति लोकं किमाहो
नैवम्, ब्रह्माश्नुते तं गत उत भजते तेन तत्रैकभूयम् ।

वृषधरः = वृषाचलः वेङ्कटाद्रिरेव। गुहायां–हृदयगुहायां। अन्नप्राणाविरयत्र 'अन्नाद्धै प्रजाः प्रजायन्ते' इत्यादिग्रहणम्। भवत इव अन्नप्राणयोरपि जन्मस्थितिहेतुत्वमिति स्तुत्वा अन्नं ब्रह्मेत्युपास्ते इति ब्रह्मत्वेन भावनमुपदिष्टम्। अन्ने तद्दृष्टेः अन्नप्राप्तिः, प्राणे आयुःप्राप्तिश्च फलम्।

ஹ்ருதய குஹையில் உபாஸித்து மோக்ஷத்தில் இரு விபூதியோடு உன்னை யநுபவிக்கிறுனென்று ஆநந்த வல்லியில் சொல்லப்பெற்றது. அன்னத்தையும் ப்ராணனையும் உன்னைப்போலே ஸர்வகாரணமாகத் துதித்து ப்ரஹ்மத்ருஷ்டியை விதித்து அதற்குப் பலன் அன்ன ப்ராப்தியும் ஆயு:ப்ராப்தியுமென்றது.

31 **अथातोऽनुप्रश्नाः इत्यादिप्रश्नवाक्यार्थ उच्यते। अत्र बहुवचनस्वरसात् वाक्यस्यानेकप्रश्नपरत्वं ग्राह्यम्। शरीरत्यागानन्तरं लोकान्तरं गच्छति न वा। तत्र ब्रह्मानुभवति वा ब्रह्मणा एकभूयं= एकत्वं प्राप्नोति वा। ब्रह्ममात्रं भुङ्क्ते वा विभूतिविशिष्टं वा ; नित्य-विभूतिमात्रं वा, एतल्लीलाविभूतिमपि वेति प्रश्नाः।**

31 ஸம்ஸாரபந்தம் நீங்கிய பிறகு வேறு லோகம் போகிறுனு இல்லையா? அங்கே ப்ருஹ்மத்தை மட்டும் அனுபவிக்கிறுனு, நித்ய விபூதி விஸ்தா

भुङ्क्ते ब्रह्मैव किं वा बहुविभवममुं लोकमप्यश्नुते, किं
तन्मात्रं लोकमेतं त्वपि स इति भवत्प्राप्तिवैशद्यवित्त्यै ॥ ३१ ॥
लोकं यात्येव तत्रान्नमयमुखसमस्तात्मतां तस्य साक्षात्
पश्यत्यप्राकृताङ्गो दिवि भुवि च चरत्येष सब्रह्मगानः ।
तद् भुङ्क्ते मानुषादेर्मुदमपि भगवद्दत्ततद्भोगसाम्यः
स्रष्टा चास्यैक्यशङ्का भयकृदिति रमावास! भूमा तवोक्तः ॥ ३२
प्राणाद्यब्रह्मभावं द्रढयति भृगुविद्योक्तितश्चान्य(स्य)वल्ली

ரத்தையுமா; இந்த ப்ரக்ருதி ப்ராக்ருத விபூதியும் அநுபவிக்கிறுரு இல்லையா என்ற கேள்விகள் மேலே விவரிப்பதற்காகக் கூறப்பெற்றன. (31)

3? पूर्वकृतप्रश्नसमाधानमत्र । मुक्तो लोकान्तरं यात्येव । अन्नमयप्राणमयाद्यन्तर्यामितां साक्षात्करोति । कामान्नी कामरूपी ब्रह्मणा सह संचरति । अहमन्नमहमन्नमित्यादि गायन् आस्ते । सर्वत्र गत्वा ब्रह्मशेषतया सर्वानन्दानुभवादेव सर्वेषु पर्यायेषु, श्रोत्रियस्य चाकामहतस्येत्युच्यते । यत्तु ब्रह्मैक्यमस्येति, तत्र-एवं भक्तेर्विच्छेदं कुरुते चेत्, अथ तस्य भयं भवति ।

32 கேள்விக்கு மறுமாற்றமிங்கு — முக்தன் வேறுலகம அவச்யம் செல்லுகிறுன் ப்ரஹ்மத்துடன் கீதம் பாடிக்கொண்டு எவ்வுலகும் செல்கிறுன் அதனுல் தான் கந்தர்வாதி ஸர்வலோகாநந்தம் முக்தனுக்கு **श्रोत्रियस्य चाकामहतस्य** *எனறது. ப்ரஹ்ம ஜீவைக்யம் சொன்னுல் பக்திக்கு பங்கம் விளையும். அப்போது பகவான் பயங்கரனுவான்.*

-3 अथ भृगुवल्ली । पूर्वं प्राणमयादिप्रदर्शनं स्थूलारुन्धतीन्यायेनेति

33 வருணனிடம் உபதேசம் பெற்று ப்ருகு

भूतिद्वन्द्वे न भीतिः क्वचिदिति च विशेषांशमाहापवृक्ते ।
दिव्यश्चान्नादगानं त्वदनुचरणवच्चाह, नानाव्रताद्यैः
युक्ता विद्या भृगोः सा कलयति फलमन्नादतादीति चैवम् ॥
नाना श्रीनाथ! नारायण इति विदितेऽनन्तरे प्रश्न उक्ताः
स्नानाहारादिसर्वाचरणसमुचिताः योगिनामाह्निकार्थाः ।

भृगुकृतविमर्शतो दृढीभवति । विभूतिद्वये कुत्रापि भीतेर्नावसर इति अपवृक्ते=मुक्ते विशेषश्चेयमाह ; अन्नादिगानं कामसंचारादिकञ्च । अतो मुक्तितत्त्वं विशिष्टाद्वैतिसंमतमत्र व्यक्तम् । एवम्, तद्व्रतम् अन्नं न निन्द्यात् इत्यादिव्रतविशेषविशिष्टत्वे विद्यायाः अन्नादनशीलत्वादिफलमप्यत्रोक्तम् । 33

மஹர்ஷி செய்த விமர்சத்தினின்று ப்ராணுதிகளை விட்டு ஆனந்தமயமே ப்ரஹ்மமென்று தெளிவதாம். நித்யவிபூதியிலும் லீலாவிபூதியிலும் எங்கும் நிர்பயமாக ஸஞ்சாரம்= பகவானோடு செல்வதெல்லாம் குறித்ததாலே விசிஷ்டாத்வைத ஸித்தாந்தப்படியே மோக்ஷதத்துவம் ஸ்பஷ்டம். ஆனந்தமய வித்யையில் அந்நத்தை நிந்திக்காமை முதலான வ்ரதங்கள் சேர்க்கப்பெற்றன. அவைசேர்ந்தால் வரும் பலனுகையும் அன்னம் நன்கு புசிக்க சக்தி பெறுதல் முதலானவை சொல்லப்பெற்றன. (33)

34 तैत्तिरीये द्वितीयो नारायणप्रश्नः । तत्र किमुच्यत इति आपाततो न ज्ञायेत । अवधाने कृते योगिनां प्रातरुत्थान भगवत्स्तवन स्नानार्चयान सांध्यकर्मानुष्ठानोपादानेज्यास्वाध्याययोगकाल कार्याणि

34 ஸ்ரீநிவாஸா—அடுத்த நாராயண ப்ரச்னத்தில் யோகிகளுடைய ஆன்னிகவிதியென்று பரிஷ்

मन्त्रा रुद्रादिकत्वत्पुरुषगणपराः तावकी चापि गाय-

त्र्योऽस्मिन् याच्ञाः फलानां तदपि भवदुपश्लोक आवन्तमेषा॥

अम्भोधौ लोकमध्ये तदुपरि च तवायोनिजं दिव्यरूपं

गर्भेष्वर्चासु चैवं नरहृदि विभवात् स्वात्मना चाप्तसर्वः ।

क्रमेणोच्यन्त इति ज्ञेयमित्यस्यैव परिष्कारे व्यक्तम् । तत्पुरुषाये-त्यादिना भगवद्दासभूतरुद्रादिमन्त्राः विष्णुगायत्री चोक्ताः। अनेक-फलकीर्तनेऽपि बहुविधब्रह्मविद्याविधानं प्रधानम् । 34

காரத்திலே சொன்னோம் உனது அடிமைகளாக ருத்ராதிகளை பாவித்து அவர்கள் விஷயமான மந்த்ர ஙகளும் பலன்களுமான வேறு பல விஷயங்களைப் பணித்ததாலும ப்ரஹ்ம வித்யைகள் பல ப்ரதான மாகக் கூறப்பெற்றன. (34)

35 प्रथमदर्शिते भगवत्स्तोत्रेऽन्तर्गता अंशास्तावत्–प्रथमतः क्षीरसागरे लोकत्रयमध्यलोके नाके च वैकुण्ठे तवायोनिजो-द्दिव्यमंगलविग्रहः, मनुजशरीर गर्भे विभवावतारार्थं रूपम्। हृदि च। सुवर्णादिप्रतिमासु च प्रवेशः स्वरूपतस्सर्वव्याप्तिश्चेति इदं सर्वं प्रथम-मन्त्रोक्तम्। इष्टापूर्तं बहुधाजातमित्यादिना इष्टापूर्तादिभर्तृत्वमुच्यते। तव दिवि त्रिपादमृतमस्तीति त्वमेव सूर्यभोग्यममृतमिति च तत्र वर्णितम् ।

35 கடலிலும் லோகமத்யத்தில் உள்ள ஸூர்ய மண்டலத்திலும் ச்ரீவைகுண்டத்திலும் உனது பர ரூபாதிகளும் மனிதர்களுடைய ஹ்ருதயத்தில் ஹார்த ரூபமும்விபவாவதாரத்திற்காக கர்ப்பவாஸமும் ஸுவ ர்ணாதி ப்ரதிமைகளில் அர்ச்சைக்காக ப்ரவேசமும் ஆத்மஸ்வரூபத்தாலே எங்கும் வ்யாப்தியும் अभ्यपारे

इष्टापूर्तादिभर्ता त्वमसि तदमृतं ते त्रिपात् धाम्नि यस्मिन्,
श्रीमन्! तस्मिन् तृतीये त्वमृतमविकलं सूरिभोग्याभिनन्द्यम्॥
प्रज्ञाप्य प्राक्, 'य एनं ननु विदुरमृतास्ते भवन्ती'ति, पश्चात्
भूमानं भोग्यतां ते श्रितरम! समनुस्नानमुख्यैः शुचित्वम्।
स्वाहान्तान् व्याहृतीद्धान् प्रणवशिखरकं भूर्भुवस्स्वर्मनुश्च
च्छान्दोग्यस्पष्टगीतां पुर इह दहरोपासनां तां विधत्ते ॥ ३६ ॥
विद्यास्वन्यासु देवोऽक्षरमपि पुरुषो ब्रह्म च ज्योतिरात्मा

என்ற மந்த்ரத்தில் சொல்லப்பட்டது நீயே இஷ்டா பூர்த்தாதிகளால் ஆராதிக்கப்படுகிறவன் பலனளிக்கிறவன். பரமபதத்தில் முக்கால்பாகமும் போக்யமாய் உன்னைச் சேர்ந்தது. நீயும் நித்ய ஸூரிகளால் அநுபவிக்கப்பட்டு பூர்ணபோக்யமானவன் என்றது மேலே. (35)

36 **हे श्रीनिवास तव वेदनात् अमृतत्वं तव भोग्यतां अघमर्षणादिमन्त्रपूर्वकं स्नानादिना शुचित्वं ओं भूर्भुवस्स्वहा इत्यादि व्याहृतिमन्त्रांश्च उक्त्वा छान्दोग्य दहरविद्यां त्वदुपासनां च 'दहं विपाप्मं' इत्यादिना विधत्ते ।**

36 உன்னை உபாஸித்தால் மோக்ஷமென்று முன்னே கூறி உனது போக்யதையும் அறிவித்து சாஸ்த்ரமுறைப்படி மந்த்ர பூர்வகமான ஸ்நாநாதிகளாலே சுத்தியும் **भूरादिव्याहृति** மந்த்ரங்களும் மேலே சுருக்கமாக (தஹர வித்யையும்) சொல்லப்பட்டன.

7 **उपरि नारायणानुवाके परविद्यासु तत्रतत्र, देवः अक्षरं पुरुषः ब्रह्म शिवः इन्द्रः इत्यादिविविधनामनिर्देशोऽपि तत्रतत्र मोक्षार्थविद्यायां साक्षाद् व्युत्पत्त्या वाच्यो भवसि। कचित्तु अनन्यथा-**

तत्त्वं विश्वं शिवश्च प्रभुरिति विविधाद्वारवृत्त्यैव वेद्यः ।
श्रीमन् नारायण! त्वं क्वचिदपि विधिरुद्रादिकः शास्त्रदृष्ट्या
सर्वं व्याप्तोऽसि हृद्यप्यसि विततटिन्मेघवर्ष्मा च यत् त्वम् ॥३७
ऋक् भानोर्मण्डलं स्यात् यजुरिह पुरुषः साम तन्मण्डलार्चिः
श्रीशाऽऽदित्यान्तरिद्धः कनकमयवपुः सर्वभूताधिपस्त्वम् ।

सिद्धजीवलिङ्गस्थले विधिरुद्रेन्द्रादिशब्दैः शास्त्रदृष्ट्या तत्तच्चेतनाचेतनान्तर्यामित्वेन बोध्यो भवसि। चेतनान्तर्यामित्वं च परमात्मस्वरूपस्य सर्वत्र व्याप्तत्वाद्वा तत्तज्जीवशरीरे हार्दविग्रहविशिष्टतया स्थित्याऽपि वा भवतीत्युक्तम्। विततटिन्मेघवर्ष्मा इत्यनेन नीलतो-यदमध्यस्था विद्युल्लेखेवेति श्रुतिर्ज्ञाप्यते।

37 நாராயணாநுவாகத்தில் மோக்ஷார்த்தமான பரவித்யைகளெல்லாவற்றிலும் நாராயணனே உபாஸ்யன். அவனை நேராகச் சொல்லக்கூடிய அக்ஷர-புருஷ-ப்ரஹ்ம-ஜ்யோதிர்.விச்வ.சிவாதி சப்தங்களாற் போல் ப்ரஹ்ம ருத்ராதிகளைச் சொல்லக்கூடிய சப்தங்களாலும் அந்தர்யாமியாக நீயே சொல்லப்படுகிறாய். **अन्तर्यामित्वम्** இருவிதம்—பரமாத்மஸ்வரூபம் எங்கும் பரவியிருப்பதாலும் அந்தந்த ஜீவனுடைய ஹ்ருதயத்தில் மின்னலிடையிலுள்ள நீலமேகம் போலே அக்நிமத்தியில் உனது ஹார்தமாகிற திவ்ய ரூபம் விளங்குவதாலும் என்றது.

38 **अथ सूर्यमण्डले भगवदुपासनम्—सूर्यमण्डलमेव ऋग्वेदः। तत्रत्यपुरुषो यजुः। तन्मण्डलज्वाला साम। तत्र त्वं हिरण्म-**

38 ஸூர்யமண்டலம் ருக்வேதமென்றும் அங்குள்ள புருஷன் யஜுர்வேதமென்றும் அதன் ஒளி ஸாமவேதமென்றும், ஸ்வர்ணமயமான திருமேனி

तत्तद्देवात्मकं त्वां पुरुषममुमनुध्याय संवत्सरात्मन्!
सायुज्यं सार्ष्टिताञ्च श्रयति जन इदन्देवतानां तवापि ॥३८

सत्यं पूर्वं तपोऽथो दम इति शम इत्येव दानञ्च धर्मोऽ-
पत्योत्पादोऽग्नयोऽपि क्रमपरिगणितं त्वग्निहोत्रञ्च यज्ञः।
उत्कृष्टं मानसञ्चारुणिमुखमहितो न्यास एवातिरिक्तः
प्रोक्तः श्रेष्ठोऽप्युपायस्त्वमसि स इति लक्ष्मीश! विद्मो रहस्यम्॥

यवपुर्भासि। तादृशं त्वां नानादेवात्मकं उपासीनः तत्तद्देवानां तव च सायुज्यं सार्ष्टितां च प्राप्नोति। सायुज्यं नाम समानभोग्यकत्वम्। सार्ष्टिता नाम भोगसाम्यम्।

யுடன் நீ அந்த மண்டலத்தில் விளங்குகிறுயென்றும் சொல்லி உன்னை அந்தந்த தேவதாஸ்வரூபமாக உபாஸித்தால் அந்தந்த தேவபோகமும் பிறகு உனது அனுபவமும் வருமென்றது. **संवत्सरात्मन्** என்கிற பதத்திற்கு ஸம்வத்ஸரத்திற்கு அந்தர்யாமியே! என்று பொருள் உத்தரதக்ஷிணாயந ஸூர்ய ஸஞ்சாரத்தால் ஸம்வத்ஸரம் ஏற்படுவதால் ஸூர்யனையே ஸம்வத்ஸரமாகச் சொல்வது. ஸாயுஜ்யமாவது இருவருக்கும் போக்யவஸ்து ஒன்றாகை; ஸார்ஷ்டிதை யாவது—இருவருடைய போகமும் ஸமமாயிருக்கை.

९ हे लक्ष्मीश! अथ सत्यमारभ्य यज्ञपर्यन्तान् दशविधान् उपायान् प्रस्तुत्य स्तुत्वा तात्रदपेक्षया मानसं (भक्तियोगं) उत्कृष्टमुक्त्वा न्यास एव (भरन्यासः-प्रपत्तिरेव) सर्वेषु श्रेष्ठः इति रहस्यमुक्त्वा तस्मो उपायत्वमुद्घुष्टम्।

39 ஸத்யம் சொல்வது என்றது தொடங்கி யஜ்ஞம் வரையிலாகப் பத்து உபாயங்களைப் பகர்ந்து மானஸமென்கிற உபாயத்தை அதாவது பக்தி

वस्वाप्यो विश्वसृट् त्वं विभुरुपकृतिमान् देवयानं नयेथाः
अग्न्यारम्भम्, पथि त्वं वितरर दिनकरस्याथवेन्दोः सयुक्त्वम्।
उक्त्वैवं त्वामथ स्वम्, 'ग्रहणपदमसि ब्रह्मणे त्वर्पये त्वा-
मित्युक्त्वा तारतस्त्वां श्रितरम! शरणीकृत्य भुङ्क्ते तथा त्वाम्॥

---

40 हे श्रीपते! त्वयि भरन्यासप्रकार एवं विवृतो वसुरण्यमन्त्रेण त्वं वस्वादिप्राप्यः विश्वस्रष्टा अर्चिरादिमार्गं मां नय; तत्र सूर्यसायुज्यं चन्द्रसायुज्यं वा किञ्चित् विधेहि इत्युक्त्वा स्वात्मानं 'ब्रह्मणे महसे त्वा' इति गृहीत्वा 'ओमित्यात्मानं युञ्जीत' इति प्रणवेन शरणागतिरुक्ता। अत्र मोक्षं प्राप्नुवतः उत्तरायणमरणे आदित्यसायुज्यं दक्षिणायनमरणे चन्द्रमसस्सायुज्यं च आन्तरालिकमुक्तम्। सर्वेषां प्रपन्नानामेतत्फलाभावात् कथमेतदुक्तिरित्य... परिहाराय इदं वसुरण्यादिमन्त्रप्रयोगायत्तमिति ज्ञापयितुमस्माभिरेतन्मन्त्रतात्पर्यमेवं वर्णितम्।

யோகத்தை உத்க்ருஷ்டமாகக் காட்டி அதிலும் மேம்பட்டது ந்யாஸம் அதாவது பரந்யாஸம் என்று உபாயமான உன்னை வெளியிட்டது.

40 திருமாலே! வஸுரண்யாதி மந்த்ரத்தைச் சொல்லி அக்நி தொடக்கமான அர்ச்சிராதி மார்கத்தைக் காட்டி ஸூர்யசந்த்ர ஸாயுஜ்யத்தைச் சிறிது கூறி, ஜீவாத்மாவை நன்றாக அறிந்து உன்னிடத்தில் ப்ரணவபூர்வகமாக அர்ப்பணம் செய்வது எனகிற பரந்யாஸம் இங்கே கூறப்பட்டது இந்த பரந்யாஸத்தில் மோக்ஷம் போகிறவன் இடையில் அயனத்திற்குத் தக்கவாறு ஸூர்யஸாயுஜ்யமோ சந்த்ர ஸாயுஜ்யமோ சிறிது காலம் பெறுகிறான் என்று சொன்னது வஸுரண்ய மந்த்ர பலத்தினாலென்று பரிஷ்காரத்திலே நிரூபித்திருக்கிறோம் (40)

अग्न्यादौ प्राक् त्रयीत्वाद्युपकलनसमा याजमान्यादिक्लृप्तिः
ब्रह्मास्त्वं चेत्, कृतं स्यात् क्रतुशतमिति तन्नैरपेक्ष्यस्तुतिः स्यात्।
एवं, 'यो वेद', 'विद्वान्', 'विदुष' इति वचस्स्वर्थभेदो न युक्तः
त्वप्राप्तेः प्राक् च किंचित् फलमिह गदितुं श्रीश! सोक्ताऽप्यनूक्ता ॥

41 ननु न्यासविध्यनन्तरं, 'तस्यैवं विदुषो यज्ञस्यात्मा' इत्यादिना वस्तुविशेषेषु यजमानत्व-तत्पत्नीत्वादि नानाविध भावना अङ्गत्वेनोक्ता। तद्वेदनफलं च. एवं विद्वानुदगयने इत्यादिनोक्तम्। अतः पूर्वोक्तन्यासस्य एतद्भावनायाश्च समुच्चितत्वप्रतीत्या अयं न्यासो भरन्यासो न स्यात्। भक्तिविद्याविशेष एव स्यात् इत्यत्राह अग्नीति। मानसापेक्षया अतिरिक्तत्वेन कीर्तनात् न्यासो न भक्तिः। नापि संन्यासः। तस्य स्वातन्त्र्येण पृथक् साधनत्वाभावात्; युञ्जीतेति योगरूपत्वाभावाच्च। अतः तस्यैवमित्यादिवाक्यं न किञ्चिद्भावना-विधायिवाक्यम्। किन्तु प्रपत्तेर्निरपेक्षत्वबोधकमेव। प्रपन्नस्य जीवनकाले वर्तमानं सर्वं सर्वविधक्रतुरूपमित्युक्तौ कृत्यन्तरं न किमपि कर्तव्यमिति स्वतः सिद्ध्यति। अतः पूर्वं सत्यादिषु दश-निरूपणमध्ये अग्निनिरूपणे 'अग्नयो वै त्रयी विद्या, गार्हपत्य ऋक्, अन्वाहार्यपचनो यजुः, आहवनीयस्साम इत्यादि त्रयीत्वादिकल्पनं यथा अर्थवादमात्रं तथा इदमपि। तथा च प्रपत्तेर्ब्रह्मास्त्रत्वात् निरपेक्षत्वम् अत्र अनुष्ठितक्रतुशतत्वज्ञापनद्वारा सूच्यते। भावना-न्तरविधानाभावादेव य एवं वेद, तस्यैवंविदुषः इत्युक्तन्यासरूप-वेदनमेव अन्ते, य एवं विद्वान् इत्यत्रोच्यते। नन्वास्तां तावदिदम्; ब्रह्मणोमहिमानमाप्नोति इति प्राप्तिः किमर्थं पुनरुच्यते। अतो विद्या-न्तरमस्त्विति चेत्—उक्तापि सा पुनरनूद्यते, उत्तरदक्षिणायनभेदेन सूर्यचन्द्रान्यतरसायुज्यरूपान्तरालिकफलकथनार्थम्।

41 ந்யாஸவிதிக்குப் பிறகு யஜமாநபத்ந்யாதி

वेदान्ता भक्तियोगं स्फुटमभिदधतो न्यासमन्ते वदन्ति
प्रायः श्रीदेशिकस्तत् स्म, 'य उपनिषदामन्त' इत्याह सारे।
श्यामादेष प्रपद्ये शबलमिति जगौ सामवेदोऽन्य एवं
मुक्त्यै सोऽहं प्रपद्ये शरणमिति, तथा नायमात्मेत्यथर्वा ॥४२॥

கல்ப்பனை ஒருவிதம் சொல்லப்படுகிறது. அதற்கு அவ்வாறு ஓர் உபாஸநம் செய்ய வேண்டுமென்று கருத்தல்ல. ந்யாஸத்துடன் கூடிய யஜமாநனிருப்பே இதற்கு எல்லா கர்மாக்களின் சேர்க்கையாகுமென்று இதற்கு வேறொன்றும் வேண்டா என்பதிலே நோக்கு. ஆகையினால் இந்த ப்ரகரணத்தில் சொன்ன வேதநமெல்லாம் ந்யாஸமென்கிற வேதநமே. வேறல்ல. ஒரு தரம் சொன்ன ப்ரஹ்மப்ராப்தியையே மீண்டும் சொன்னது மீமிசையாகாது. ஸூர்யசந்த்ர ஸாயுஜ்ய பலன் நடுவிலுள்ளதென்பதற்காகவாம்.

41 तैत्तिरीयमात्रे अन्ते भरन्यास उक्त इति न मन्तव्यम्। अनेकासु उपनिषत्सु एवमित्याह—वेदान्ता इति। सारे = रहस्यत्रय-सारे चरमश्लोकाधिकारे, य उपनिषदामन्ते इति श्लोकः। तत्र भक्तिस्थाने भगवान् उपायः इत्यपि श्राव्यते। अन्य इति श्वेताश्वतर-वेदान्तः। अथर्वा इत्यनेन मुण्डकं गृहीतम्। नायमात्मा इति मन्त्रः उपायस्य भक्तिरूपत्वमिव अकिञ्चनविषये भक्तिनिरपेक्षत्वमपि अन्ततो दर्शयतीति भावः।

42 உபநிஷத்துக்கள் பக்தியோகத்தைப் போல் பரந்யாஸத்தையும் முடிவில் விதிக்கின்றன, சாந்தோக்யத்திலும் श्यामात् என்கிற மந்த்ரம், ச்வேதாச்வதரத்தில் मुमुक्षुर्वै என்கிற மந்த்ரம், முண்டகத்தில் नायमात्मा என்கிறதுமாகலாம்.

वाज्युक्तं द्विः, 'क्रतो त्वं कृतमिति, नम इत्युक्तिमित्येवमूह्यं
तस्मात् त्वय्यन्तकोटौ स्फुरसि वृषधराधीश! धर्मः स्थिरस्त्वम्।
इत्थं त्वत्प्रोक्तयर्थं युधि पुनरवदः कृष्ण! गीतान्त एवं
पाणिस्ते भावसारं प्रथयति विनमद्रक्षिणो दक्षिणोऽत्र ॥ ४३

ऐतरेयोपनिषत्

यत् पञ्चारण्यकेऽस्ति ह्युपनिषदभिधं त्वैतरेये द्वितीयं

---

43 वाज्युक्तं द्विरिति ईशावास्ये बृहदारण्यके चेत्यर्थः। भावसारमिति। श्रीनिवासः स्वपादप्रदर्शिस्वहस्तमुद्रया स्वकीयं भावं सारात्मकं दर्शयति, 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति। असरीये पाणिमुद्रास्तत्र बहवो भावाः प्रदर्शिताः; तत्रायं सार इति भावः।

43 வாஜிவேதமாவது சுக்லயஜுர்வேதம். அங்கு ஈசாவாஸ்யத்திலும் ப்ருஹதாரண்யகத்திலும் क्रतो என்று பகவானுக்கு ஸம்போதநம். பக்தியே என்று அதன் பொருள். பகவானை பக்தியே என்று விளிப்பதால் பக்தி ஸ்தாநத்தில் பகவான் இருக்கிறன் என்றதாயிற்று அதனுல்தான் பகவானை ஸித்தோபாயம் என்கிறன வேதாந்தங்கள். கீதையின் முடிவில் கண்டோக்தமாக நீயே ப்ரபத்தியைக் கூறினுய். இதையே இந்த ஸ்ரீநிவாஸாவதாரத்திலும் வலக்கை முத்ரையாலே வெளியிடுகிறுய். என்னே உன்னுடைய தயை என்றபடி.

44 ऐतरेयोपनिषत्। ऋग्वेदीय-ऐतरेयब्राह्मणान्तर्गता। तत्र ब्राह्मणे आरण्यकानि पञ्च सन्ति। तत्र द्वितीयं तृतीयं च

44 ஐதரேய ப்ராஹ்மணத்தில் ஆரண்யகங்கள்

तार्क्ष्यीकश्च तस्मिन् वृषगिरिशिखरोदञ्चनोपास्तयस्ते ।
कर्म प्राक् कर्मकाण्डे बहुफलमुदितं तावदास्ताम्, यदेतत्
कर्मब्रह्मात्म संप्रत्यभिधिपदमिदं सत्यमित्युक्तमादौ ॥ ४४ ॥

उपनिषदिति प्रसिद्धम् । तत्र द्वितीये सप्ताध्यायाः; तृतीये द्वौ । सप्तसु चतुर्थाध्यायमात्रं ऐतरेयोपनिषत्त्वेन गृहीत्वा भाष्यकारैर्व्याख्यातम् । अन्यांशस्य विद्यारण्यभाष्यमस्ति । तात्पर्यचन्द्रिकायामपि (10- 3) एतत्पूर्वभागोक्तश्रुतिवाक्यं 'बह्वृचोपनिषदि' इति स्थलनिर्देशेन उदाहृतम् । अतः उपनिषत्त्वेन प्रसिद्धारण्यकद्वयस्यापि अर्थसंग्रहणेन श्रीनिवासस्तुतिः क्रियते । आरण्यकद्वयानुपूर्वी तदर्थसङ्ग्रहौ अस्मन्मुद्रिते उपनिषद्भाष्यग्रन्थे द्रष्टुमर्हतः । अत्रायं श्लोकार्थः—हे वृषगिरिशिखर-उदञ्चन! भगवन्! त्वद्विषयकोपासनाः ऐतरेय द्वितीय-तृतीयारण्यकेषु सन्ति । तत्रारम्भे, 'एष पन्थाः एतत्कर्म एतद्ब्रह्म एतत् सत्यं । तस्मात् न प्रमाद्येत्' इत्युक्तम् । तदर्थस्तु कर्मकाण्डे नानाफलार्थं यत् काम्यं कर्मजातमुक्तं तत्तावदुपेक्ष्यमास्ताम् । अथापि संप्रति उपनिषदि अभिधीयमानं कर्म ब्रह्म च मोक्षहेतुत्वात् सत्य-मिति । तेनाद्वैतनिरासः ।

ஐந்து—அவற்றில் இரண்டாவது மூன்றாவது ஆரண்யகங்கள் உபநிஷத்தாம். இதில் இரண்டாவது ஆரண்யகத்தில் 4-வது அத்யாயத்திற்கு மட்டும் எல்லோருட பாஷ்யம் இயற்றி யிருந்தாலும் மொத்த மே யிங்கு ஸங்கரஹிக்கப்படுகிறது இதன் தொடக்கத்தில் இந்த கர்மாவும் ப்ரஹ்மமும் ஸத்யமென்கிறது. அதன் கருத்தாவது — கர்மகாண்டத்தில் கூறிய கர்மாக்கள் அல்ப பலன்களுக்கு ஸாதநங்களானபடியாலே அஸ்த்திரமானாலும் இங்குச்சொல்லப்படும் கர்மாவானது ஸ்திர பலமான மோக்ஷஸாதந

उक्थविद्या. २-१-३.

सत्रे संवत्सराख्ये विलसति यदुपान्त्येऽहनि, प्राक्प्रसक्तं
निष्केवल्याख्यशस्त्रं तदिह, तत इहाप्युक्थमेतद् गृहीत्वा।
दृष्टिं त्रेधाऽधिदैवं कथयदिह तथाऽध्यात्ममप्याह चाहं
नाथोऽस्म्युक्थं प्रजानां पुरुष इह महानित्युपास्तिं रमेश ! ॥४५

மாகையாலே ப்ரஹ்மம் போலே ஸத்யமாகும் என்றவாறு

-5 सत्र इति। गवामयने संवत्सरात्मनि सत्रे महाव्रत-नामकमुपान्त्यमहः। तत्र माध्यन्दिनसवनसंबन्धीनि शस्त्राणि प्रथमारण्यके उक्तानि। तदन्तर्गतं निष्केवल्याख्यमुक्थम्। अतो द्वितीयारण्यके उक्थमेव गृहीत्वा प्रथमाध्यायद्वितीयखण्डे अधिदैवतमध्यात्मञ्च प्रत्येकं त्रेधा दृष्टिं विधाय मुख्योपासनाऽपि "पुरुष एवोक्थम्; अयमेव महान् प्रजापतिरहमुक्थमस्मीति विद्यात्" इत्युक्तेत्यर्थः। श्लोके पुरुषइहेत्यत्र इहेति पदं पुरुषपदेन एतल्लोक-वर्तिशरीररूप पुरुषग्रहणार्थम्। प्राक्=प्रथमारण्यके। इह=द्वितीयारण्यके। इह=प्रथमाध्यायद्वितीयखण्डे ॥

45 **உக்த்தவித்யா** 2-1-3 गवाமயநமென்கிற ஸம்வத்ஸர ரூபஸத்ரத்தில் மஹாவ்ரதமென்கிற நாள் கடைசி அஹஸ்ஸுக்கு முந்தினதாகும். அதில் மாத்யந்திநஸவநத்தைச் சேர்ந்த சஸ்த்ரங்கள் (ஸாமகாநமில்லாத மந்த்ரங்கள்) ப்ரதமாரண்யகத்தில் சொல்லப்பட்டன அவற்றிலடங்கியது நிஷ்கேவல்யம் என்கிற உக்த்தம், அது இங்கு இரண்டாவது ஆரண்யகத்தில் க்ரஹிக்கப்பட்டு. அதிதைவதம் அத்யாத்மமென்று தொடங்கி மும்மூன்று த்ருஷ்டி

भानोरन्तर्बृहन् यः श्रितरम! भुवनस्यासि मध्ये स एव
प्राणात्मा संनिविष्टः ककुभ इति समारभ्य पूर्वे द्वितीये।
आदौ प्रोच्येममर्थं विविधगुणफलान्युद्गृणत् ध्यान उक्ते
प्राहाध्याये तृतीये त्वदभिगतिफलञ्चेन्द्र! भूताधिनाथ! ॥४६

ஸ்லோக் கூறி முக்யமான உபாஸநத்தையும் விதித்தது. 'ப்ரஜ்ஞா நாதனை மஹாஜ்ஞி நான் உக்த்தமாகிறேன்' என்றபடி உபாஸநம். இந்த ப்ரஜ்ஞா நாதன் ஸ்ரீநிவாஸனை நீயே.

46 भानोरिति। द्वितीयारण्यके आद्यमध्यायत्रयमुक्थविद्याविषयकम्। प्रथमाध्याये, "बृहद्ध तस्थौ भुवनेष्वन्तः, पवमानो हरित आविवेश" इत्यारभ्य आदित्यप्राणरूपतया तद्विवरणात्। द्वितीयाध्यायेऽपि, "एष इमं लोकमभ्यार्चत्। प्राणो ह्येष य एष तपति" इत्यादित्यप्राणोपक्रमात्। एतत्फलञ्च द्वितीयाध्यायोक्तमेव। विविधगुणफलानीति। गुणाः = उक्थस्य पृथिवीत्वादिदृष्टिः, बृहतीसहस्रत्वादि च। बृहतीसहस्रे अन्नत्वादिदृष्टिश्च। प्राणस्य भूतित्वामृतत्वादिः। पुरुषस्य हिरण्मयत्वादि रित्येवम्। फलानि च अमृतत्वमिन्द्रियाद्यवाप्तिः भूत्यादिप्राप्तिः, अस्मिन् लोके हिरण्मयरूपत्वादि च। उद्गृणत् = वदत्; अस्य ऐतरेयमिति विशेष्यमध्याहार्यम्। उक्ते = पूर्वश्लोकदर्शिते मुख्यत्वद्ध्याने फलञ्च प्राहेत्यन्वयः। अत्र तृतीये बृहतीसहस्रप्रस्तावे, 'स य एवमेतमिन्द्रं भूतानामधिपतिं वेद, विस्रसा हैवास्माल्लोकात् प्रैति' इति वाक्येन, पश्चात् श्लोकेषु 'पाप्मानमपहत्य ब्रह्मणः स्वर्गं लोकमभ्येति विद्वान्' इत्यादिना च प्रकर्षेणाहेत्यर्थः।

46 இரண்டாவது ஆரண்யகத்தில் முதல் அத்யாயத்தில் புவந மத்யத்திலுள்ள ஆதித்யனைகவும்

उत्कृष्टं ब्रह्मलोकः पुरुष इति वपुस्तत्र पादाच्छिरोन्तं
विष्टं ब्रह्मात्र शीर्षे श्रिय उदयजुषो वाङ् मनः श्रोत्रमक्षि।
प्राणश्चेत्यत्र देहोत्थितिकरविभवात् वाङ्मुखस्तस्य उक्थे-
त्याख्यः प्राणो रमेश! त्वमसि स पुरुषो योऽर्कवत् स्वर्णरूपः॥

ப்ராணனுகவு முன்னைக் கூறி இரண்டாவது அத்யாய த்திலும் முதலில் இதையே சொல்லி உக்த்தாதிகளில் பல குணங்களையும் பலன்களையும் கூறி மூன்று மத்யாயத்தில் **पाप्मानं अपहत्य स्वर्गं लोकमभ्येति विद्वान्** என்று உன்னைப் பெறுதலாகிற பலனைக் கூறிற்று.

47 **उत्कृष्टमिति। अथातो रेतस्सृष्टिरित्यादिना सारकाष्ठापन्नकर्मकृतत्वात् पुरुष इति वपुरुत्कृष्टमिति दर्शितम्। ब्रह्मणो लोक इति तस्य ब्रह्मपुरत्वमुक्तम्। अथ पादमारभ्य शिरःपर्यन्तप्रवेशो ब्रह्मण उक्तः। तत्र वागादिपञ्चकस्य शीर्षे स्थितिरुक्ता। ता एव श्रियः उदयजुषः=अभ्युदयं प्राप्ताः। मनोऽपि शिरोधिष्ठितेन्द्रियव्यापारणाय शिरस्येवाधिककालमस्तीति। पञ्चके वागादीनामशक्तत्वं प्राणस्यैव देहोत्थितिकरत्वात् उक्थपदार्थत्वञ्चादर्शि। शस्त्रेष्युक्थपदम् इत उत्तिष्ठतीत्यर्थसत्त्वात् प्रयुक्तम्। एवञ्चोक्थशस्त्रतुल्योत्थताविशिष्टप्राणान्तर्यामीत्युक्थपदार्थः स्यात्। त्वमसि स पुरुषे=त्वं प्राणशरीरकः अत्र पुरुषे=शरीरे वर्तसे। आदित्यमण्डलवत् पुरुषोऽयं तस्मात् हिरण्मय इति भावितः।**

47 ஸாரவஸ்துஸ்ருஷ்டியைச் சொல்வதாகத் தொடங்கி மானிட சரீரத்தை உத்க்ருஷ்டமாக ப்ருஹ்மலோகமாகக் கூறி, அதில் அடிமுதல் தலை வரையில் ப்ரஹ்ம ப்ரவேசத்தையும் தலைப்புறத்தில் வாக்கு மனம் காது கண் ப்ராணன் என்கிற ஸம்ப

वाक् तन्तिर्या हि बध्नात्यखिलमपि निजैर्नामभिस्ते विभूतिः
सैवं प्राणादि चैतत्परिचरणपरञ्चाग्निवाय्वादि सर्वम् ।
वाक्चक्षुश्श्रोत्रचित्त न्वित इह कथितो ब्रह्मगिर्याख्यया च
प्राणोऽकाराथभूतत्वदुपगतमहंशब्द्यमाहात्मनेश ! ॥ ४८ ॥

த்துக்களையும் அவற்றில் தேஹத்தின் எழுச்சி முதலானவற்றிற்குக் காரணமாக ப்ராணனையும் கூறி அதனால் ப்ராணன் உக்த்தமென்றும் அந்த ப்ராணனும் ஸௌர்யமண்டலத்தில் ஸூர்யன் போலிருக்கும் ஸ்வர்ணமயமான நீயே என்றும் ஓதிற்று.

48 वागिति। "तस्य वाक् तन्तिः ; नामानि दामानि। वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्।' इति। तन्तिर्नाम दीर्घरज्जुरनेकपाशवती। तैः पाशैर्बहवो गावो बध्यन्ते। अथातो विभूतयोऽस्य पुरुषस्य। तस्य वाचा सृष्टौ पृथिवी चाग्निश्च वाचं पितरं परिचरतः। स एष गिरिश्चक्षुः श्रोत्रं मनो वाक् प्राणः। तं ब्रह्मगिरिरित्याचक्षते। गिरति ह वै द्विषन्तं पाप्मानम्, य एवं वेद। अ इति ब्रह्म। तत्राऽऽगतमहमिति इत्याद्यर्थ इह पद्ये संगृहीतः॥

48 வாக்கு என்பது தந்தியாகும்--தந்தியாவது—பல பூட்டுக்கள் கொண்ட நீண்ட கயிறாகும் பூட்டுக்கள் பசுக்களைக் கட்டவாகும். ப்ராணாதிகள் உன்னுடைய விபூதிக்குத் தொண்டு செய்பவை வாக்கு முதலான நான்கோடு சேர்ந்த ப்ராணன் **ब्रह्मगिरि** என்னப்படும். **गिरति पाप्मानं इति गिरिः** பாபத்தைப் போக்குகிறது என்றதாம் 'அகாரவாச்ய ப்ரஹ்மமான நீயே நான்' என்கிற உபாஸனமும் மேலே சொல்லப்படும்.

विश्वामित्रेण चेन्द्रस्त्रिरुपगतवता तत्त्वमिन्द्रस्य पृष्टः
प्राणोऽहं प्राणरूपं निखिलमपि रविश्चाहमित्याह देव! ।
तद् योऽसौ सोऽहमेवं तपनपुरुषयोस्त्वद्वचतीहारकर्तुः
या प्रज्ञा देवता या यदमृतमपि यद् ब्रह्म तत्तन्मयत्वम् ॥ ४९ ॥

---

49 विश्वामित्रेणेति । प्रतर्दनो दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च(कौषीतकि) । विश्वामित्रस्तु बृहतीसहस्रे इन्द्रान्नत्वध्यानेनेन्द्रस्य प्रियं धामोपजगाम । इन्द्र एनं ध्यानेन पुनः पुनरागन्तुमादिशत । तृतीयवारे इन्द्रेण वरो दत्तः । प्रतर्दनाय, मामेव विजानीहीत्युक्तवान् किल । तमेनमयमेव त्वामेव विजानीयामिति वरमयाचत । अथेन्द्रः प्राणादित्यैक्यस्य श्रुतिप्रसिद्धत्वात् सर्वाध्यात्मिकप्राणः सूर्यश्चाहमित्युपदिदेश । उत्तरार्धेन, 'प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति, य एवं वेद । तत् योऽहं सोऽसौ योऽसौ सोऽहम्' इति वाक्यमभिप्रेतम् । स यश्चायं पुरुषे यश्चासावादित्ये' इत्येतत्तुल्यम् अन्तर्याम्यैक्यमेवात्र । इदं वाक्यमात्मत्वोपासनाधिकरणेऽप्युपात्तम् ।

49 விச்வாமித்ரர் ப்ரஹதீச்சந்தஸ்ஸினுடைய ஆயிரத்தை இந்த்ரனுக்கு அன்னமாக த்யானம் செய்ததால் த்ருப்தி பெற்ற இந்த்ரனால் அழைக்கப் பட்டு இந்த்ரனினிடமான ஸ்வர்கத்திற்கு மூன்றுதரம் சென்றாராய் இந்த்ரனிடம், உன்னை த்யானிப்பே னென்றார். இந்த்ரன் நான்ப்ராணன் ஸூர்யன்என்று சொன்னான். அதிதைவம் ஸூர்யனையும் ஆத்யாத்மீக ப்ராணனையும் ஒன்றாக நினைத்தபடி ஆகையால் திரு மாலே! 'योऽसौ सोऽहं' என்று ஸூர்யமண்டலத்திலும் சரீரத்திலும் ஒன்றாக்கி அந்தர்யாமியாக உன்னை த்யா

उक्थेऽस्मिन् पाञ्चविध्यं बहु ननु बृहतीछन्दसां यत् सहस्रं
संपन्नं पूरुषायुर्दिनसमगणनाऽप्यक्षराणामिहोक्ता ।
श्रीमन्! इत्थं बहूक्त्वा त्वथ पुनरुदयेऽप्यत्र मुक्ते निषिद्धा
बीभत्सा यत् स न स्त्री पुरुष उपगतो धूतपाप्मा पदं ते ॥

ணம் செய்கிறவன் பரஜ்ஞாமயன் தேவதாமயன் அம்ருதமயன் ப்ரஹ்மமயன் என்றது.

5) उक्थ इति । 'यो ह वा आत्मानं पञ्चविधमुक्थं वेद, यस्मादिदं सर्वमुत्तिष्ठति' इत्यादिना पृथिव्यादिभूतपाञ्चविध्यमुक्त्वा स्तोम सामच्छन्दःप्रभृतिकृतं पाञ्चविध्यं बहूक्तम् । उक्थे नानाच्छन्दस्कमन्त्राणामाम्नातत्वेऽपि सर्वाक्षरगणनायां षट्त्रिंशदक्षरोपेतबृहतीसहस्रं संपद्यते । शतायुषः पुरुषस्य प्रतिवत्सरं षष्ट्यधिकशतत्रयसंख्यदिनभावात् षट्त्रिंशत्सहस्राणि दिनानि भवन्तीति भावनमुक्तम् । एवं बृहतीसहस्रे नानाभावनमुक्त्वा भूताधिपतीन्द्रप्राप्तिफलकथनानन्तरम्, 'इन्द्रो भूत्वा एषु लोकेषु राजति' इत्युक्तम् । कथमिन्द्रसाम्यापन्नस्यैतल्लोकप्राप्तिरित्युपरि पृष्टम्, 'यदनेन रूपेणामुं लोकमभिसंभवति, अथेमं लोकं केन रूपेणाऽऽभवतीति । उत्तरमुक्तम्—शुक्रशोणितसंभवेऽपि बीभत्स्यत्वं नास्ति, वैलक्षण्यादिति । यदेतत् स्त्रियां लोहितं भवति अग्नेस्तद्रूपम् । यदेतत् पुरुषे रेतो भवति आदित्यस्य तद्रूपम् । तस्मात् तन्न बीभत्सेत । अमुना रूपेणेमं लोकमाभवतीति । न हि मुक्तस्य सर्वत्रानुकूल्यमनुभवतः प्रतिकूलं किञ्चिदिति । नैनं वाचा स्त्रियं ब्रुवन् नैनमस्त्रीपुमान् ब्रुवन् । पुमांसं न ब्रुवन्नेनं वदन् वदति कश्चन । पाप्मानमपहत्य स्वर्गं लोकमभ्येति विद्वान् ॥

50 உக்த்தம் என்பதான சஸ்த்ரத்தை ஐந்து வித ரூபமாகச் சொல்லி அந்த சஸ்த்ரத்தில் அனேக

निष्कामान् काममारं कमपि रथमधिष्ठाय ते प्राप्तिहेतुं
वागुद्धिं श्रोत्रचक्रं महितरम! मनस्सारथिं नेत्रवाहम् ।
प्राणात्मा बद्धजीवान् कठकथितवशीकारदक्षान् प्रसन्नः
पासीत्थं पञ्चकान्तुत्युपकलनवतामुक्थविद्यामुवाच ॥ ॥ ५१ ॥

ச்சந்தஸ்ஸான மந்த்ரங்களிருந்தாலும் முப்பத்தாறு முப்பத்தாறு அக்ஷரமாக வகுத்து ஆயிரம் ப்ருஹதீச் சந்தஸ்ஸாக்கி ஒரு புருஷனுடைய ஆயுட்காலமான நூறு வயதிலடங்கிய முப்பத்தாருயிரம் தினத்தோடு ஸமமாக்கி பலவிதமான பாவனையைச் சொல்லி, பல படி பிறக்கும் ஜீவன் முக்தனை பிறகு மீண்டும் பிறந்தால் கர்மாதீனமான ஸ்த்ரீ புருஷ ப்ரமப் பிறப்பில்லாமையாலே ஜுகுப்ஸை — அருவருப்பில்லை யென்றது.

51 निष्कामानिति । अनकाममारो देवरथः। तस्य वागुद्धिः; श्रोत्रे पक्षसी, चक्षुषी युक्ते, मनः संग्रहीता। तदयं प्राणोऽधितिष्ठति इत्युक्तम्, अनकाममार इत्यत्र नञ्द्वयघटनं काममारत्वदाढ्याय। कामं मारयतीति काममारः। उद्धिः—ईषादण्डाग्रभागः । कठकथितेत्यादिना आत्मानं रथिनं विद्धीत्यादिकमौचित्यादत्रोपस्थाप्यते । पञ्चकं= प्राणादिपञ्चकं श्रुतिप्रसिद्धम् ॥

51 ஸ்ரீநிவாஸனே! ப்ராணாந்தர்யாமியான நீ நிஷ்காமர்களாய், வாக்கை ஏர்க்கால்முனையாகவும் செவிகளைச் சக்ரமாகவும் மனத்தை ஸாரதியாகவும் கண்களைக் குதிரைகளாகவும் கொண்டதும் காமங்களை யழிக்கின்றதுமான தேவரதம் ஏறி உன்னைப்பெற, கடச்ருதியில் ஓதியபடி எல்லாவற்றையும் வசீகரிக்க வல்லரான ஸம்ஸாரிஜீவர்களைக் காத்தருளுகிறு

ऊर्ध्वञ्चाथान्तरिक्षं क्षितिरतलमुखञ्चेति लोकान् अथैत-
त्पालान् अक्षाधिपाख्यान् श्रितरम! विदधत् साशनायां पिपासाम्
अक्षाणीशांश्च सृष्टे पुरुष इह निवेश्यान्नमेषाञ्च सृष्ट्वा
तत्तच्छक्त्यर्पणाय स्वयमिह पुरुषे व्याप्त इन्द्रस्त्वमात्मा ॥ ५२ ॥
गर्भाधाने, प्रसूतेरुपरि च, मरणञ्चानु, जन्मास्य विद्यात्

யென்று ப்ராணாதிகள் ஐந்தையும் துதிக்கும் உக்த்த வித்யையை மேலே சொல்லிற்று

52 ऊर्ध्वमित्यादीनां चतुर्विधानां लोकानां 'अम्भो मरीचिर्मरमापः' इति निर्देशः श्रुतौ कृतः। अक्षाधिपाः= वागाद्यधिष्ठानदेवता अग्न्यादयः। इन्द्रपदेन, "एतमेव पुरुषं ब्रह्म ततमपश्यत्, इदमदर्शमिति। तस्मादिदन्द्रो नाम। तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण" इति वाक्यं स्मार्यते ॥

52 மேலுலகம், அந்தரிக்ஷலோகம், பூமி, பாதாளம் என்ற லோகங்களையும் லோகபாலர்களையும் இந்த்ரிய தேவதைகளையும் படைப்பவனாய், பசியோடு தாகத்தையும் இந்த்ரியங்களையும் அவற்றின் தேவதைகளையும் மனிதசரீரங்களிற் புகுவித்து உணவையும் படைத்து அததற்கு சக்தியை யளிப்பதற்காக நீ சரீரத்தில் எங்கும் பரவி ஆத்மாவாய் இந்த்ரன் என்னப்படுகிறாய். இதந்த்ரபதம் இந்த்ரபதமாயிற்று.

53 गर्भेति। जन्म विद्यात्, एवं त्रेधा जन्मज्ञानात् पुनः-पुनर्जन्मज्ञानात् वैराग्यमुदेतीति। वामदेववाक्ये, 'शतं मा पुर आयसीः' इति लोहनिर्मितशृङ्खलासमाना इति विद्यारण्यव्याख्या-

53 ஜீவனுக்கு முதற் பிறவி கர்பாதாந (கரு ஏற்படும்) காலத்திலாகும் இரண்டாவது கர்பத்தினின்று பிறவியாம், மூன்றாவது மரணத்திற்குப்

गर्भस्थो वामदेवो मुहुरिह निजजन्माऽऽह कारापुरेषु ।
प्रज्ञानं ब्रह्म नेताऽखिलकरणमहाभूतविध्यादिदेव—
क्षुद्राक्षुद्रान्तरात्मा त्वमिति वित् अमृतस्ते पदे श्रीश! पूर्णः॥
तार्तीयीके च तित्तिर्यभिहितसदृशः संहितोपास्तिभेदः
काम्यः प्रोक्तोऽक्षरोपासनमपि विविधं तत्र वेद्यः क्वचित् त्वम् ।

नात् कारागृहत्वं दर्शितं भवति। प्रज्ञेनात्मनेति औपनिषदपुरुषस्य प्रज्ञाश्रयत्वमुक्तम् । संज्ञानं विज्ञानमित्यारभ्य संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येतानि प्रज्ञानस्य नामधेयानि' इति वाक्यस्वारस्यात् सर्वविधपरिणामहेतुं धर्मभूतज्ञानमाहेत्यभिप्रेत्य प्रज्ञानेत्युक्तम् । अमृत इत्यादिना, 'अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामान् आप्त्वाऽमृतस्समभवत्' इति गृह्यते ॥

பிறகு, வாமதேவரிஷி கர்பத்தில் இருந்துகொண்டே, அடிக்கடி சரீரங்களாம் சிறைகளில் தமக்குப் பிறவியிருந்ததைச் சொன்னார். ச்ரிய:பதியே! நீ ஜ்ஞாநமுள்ள ப்ரஹ்மமாய் நியந்தாவாய் இந்த்ரியங்கள் பூதங்கள் ப்ருஹ்மாதி தேவதைகள் என்றவாறான சிறிய பெரிய வஸ்துக்களுக்கெல்லாம் அந்தராத்மாவாகிறாய் என்றறிபவன் உனது பரமபதத்தில் அழியாமல் பூர்ணனாகிறான் என்றது.

54-55 तार्तीयीके इति। तार्तीयीके—तृतीयाध्यायान्तर्गतखण्डसमुदाये। 'अथातः संहिताया उपनिषदं व्याख्यास्यामः' इति तैत्तिरीये उक्तम्; तद्वदिहापि। परंतु अपरथा= प्रकारभेद इति।

54 மூன்றாவது அத்யாயத்தில் தைத்திரீயத்தில் சொன்னது போல் காம்யங்களான ஸம்ஹிதோபாஸனவகைகளும் அக்ஷரங்களுடைய உபா

देहश्छन्दोऽथ वेदस्त्रय इह पुरुषास्त्वं महापूरुषश्च
श्रीमान् आदित्यवर्ती सकलजनलयोत्पादकर्ता यदुक्ताः ॥ ५४

प्रज्ञात्मा दैहिकात्मन्यकथि रस इति श्रीश ! तस्यैक्यचिन्ताम्
आदित्यान्तःस्थितेन प्रथयति ; मरणासत्तिलिङ्गं बहूक्तम् ।
तद् बुद्ध्वा मोक्षमन्त्रान् जपतु स कथितान् कर्म चोक्तं विदध्यात्
द्रष्टारं त्वामदृष्टं निखिलगतममुं स्वस्य चात्मेति विद्यात् ॥५५

कचिदिति । 'चत्वारः पुरुषा इति बाध्यः ; शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुषः' इत्यादि वाक्यजाते। यत् = यस्मात्। अत्र फलाश्रवणात् उत्तरश्लोकोक्तो मोक्ष एवैतत्फलमिति । प्रज्ञेति । स एवायं दैहिक आत्मा । तस्य योऽयमशरीरः प्रज्ञात्मा स रस इति । स यश्चायमशरीरः प्रज्ञात्मा यश्चासावादित्ये रसः, एकमेतदित्युक्तम् । मरणासत्तिः = मरणस्य शीघ्रभाविता । तत्र लिंगं जागरितस्वप्नावस्थागतं बहु । सः = चतुष्पुरुषविद्यानिष्ठः । मोक्षमन्त्राश्चतुर्थखण्डोक्ताः । एवं 'स आत्मेति विद्यात्' इत्यन्तेनोपासनमपि। श्रीः॥

ஸனங்களும் சொல்லப்பெற்றன. அதில் நீயும் சில விடத்தில் உபாஸிக்கப்படுகிறாய் ; தேஹமும் சந்தஸ்ஸூம். வேதமுமாகிற மூன்று புருஷர்கள், நாலாவது புருஷனை நீ மஹாபுருஷன் ஸூர்யமண்டலத்திலிருப்பவன். ஸர்வ ஜநங்களுக்கும் அழிவையும் பிறவியையும் செய்பவன் என நாலு புருஷரின் உபாஸனம் சொல்லிற்றே.

55 ச்ரிய:பதியே! தேஹத்திலுள்ள ஆத்மாவில் ப்ராஜ்ஞனை ஆத்மா சொல்லப்பட்டது. அவ்வாத்மாவுக்கு ஸூர்யமண்டலத்திலிருக்கும் ஆத்மாவுடன் ஐக்யம் சொல்லிற்று. அதன் மேல் மரண

छान्दोग्योपनिषत्

छान्दोग्येऽष्टप्रपाठे प्रथमत उदितौङ्कार उद्गीथभागे
प्राणादित्यादिदृष्टिस्तदनु विभजनात् पञ्चधा सप्तधा च ।
द्वैतीयीके प्रपाठे दृशिरपि विविधा साम्न्यथ ब्रह्मसंस्थः
धर्मस्कन्धत्रयस्थस्तव पदममृतः श्रीश ! यातीत्यवाचि ॥५६॥

காலம் நெருங்குகிறதற்கு அடையாளங்களைக் கூறிச் சில மோக்ஷமந்த்ரங்களை உபதேசித்து ஜபத்தை விதித்தது. யாராலும் காணப்படாமல் எல்லாம் காண்பவனாய் எங்கும் பரவியிருக்கும் உன்னை ஆத்மாவாக அறிய வேண்டுமெனறது.

ஐதரேயோபநிஷத்து முற்றும்.

56 சாந்தோக்யம். अध्यायस्यैव प्रपाठ इति नामान्तरम् । अनेकभागात्मनि सामनि उद्गीथो नाम मध्यमभागः । तत्राऽऽद्यो भाग ओङ्कारः । तत्र मुख्यप्राणदृष्टिः आदित्यदृष्टिश्च । उदितौंकार इत्यत्र उदिता इति स्त्रीलिङ्गपदच्छेदः । अथ साम पञ्चधा सप्तधा च विभज्य दृष्टिविशेषाः । अथ चतुरः आश्रमान् त्रेधा विभज्य सर्वत्र ब्रह्मनिष्ठश्चेत् भगवतः पदं याति ; अमृतो भवतीति मोक्षप्रस्तावः कृतः ।

56 சாந்தோக்யத்தில் ப்ரபாடகங்கள் (அத்யாயங்கள்) எட்டு. ஸாமாவின் நடுபாகம் உத்கீதம். அதில் முதல்பாகம் ஓங்காரம் அதை ப்ராணனாகவும் ஆதித்யனாகவும் மற்றும் பலவிதமாகவும் பாவனை முதலில் ஓதப்பெற்றது இரண்டாவது அத்யாயத்தில் ஒவ்வொரு ஸாமாவையும் ஐந்தாகவும் ஏழாகவும பிரித்து அதில் சில த்ருஷ்டி (பாவனை) ஓதப்பட்டது. ப்ரஹ்மசாரி, க்ருஹஸ்தன், அதன் மேல் ஆச்ரமஸ்த்தன் என்ற பிரிவில் எவனும் ப்ரஹ்ம

नानाध्यात्माधिदैवप्रकटितदृशिकृक्सामगेयो ह्युदाख्योऽ-
स्यक्ष्यादित्यान्तरिद्धो हरिरत उदितोद्गीथतोद्गातृता च ।
श्रीमन्! आदित्यविद्याद्यधिगमित! तथोद्गीथ आकाशनाम्ना
प्रस्तावे प्राणनाम्ना लससि तदिदमप्युक्तमाद्यप्रपाठे ॥ ५७ ॥

---

57 **प्रथमाध्याये नानाविध आध्यात्मिक आधिदैविक दृष्टि-विशिष्ट ऋक्सामोभयगेयत्वं उन्नामकत्वं अक्षिस्थाने आदित्यमण्डले चान्तःप्रकाशमानत्वं हरेस्तवोक्तम् । अतः= उन्नामकहरिदृष्टिमत्त्वात् उद्गीथस्य उद्गीथत्वं उद्गातुः उद्गातृत्वं चोक्तम् । एवमादित्यविद्यायां ज्ञापितोऽसि । एवमुद्गीथे आकाशनामकत्वदृष्टिः तथा प्रस्तावरूपे सामभागे प्राणाख्यत्वदृष्टिरप्युक्ता । उदाख्यः असि इति पदच्छेदः।**
நிஷ்டனுகில் ச்ரிய:பதியான உன்னைப் பெறலா மென்றது.

57 ரிக்கிலும் ஸாமாவிலும் பலவிதமான ஆத்யாத்மிக ஆதிதைவிக த்ருஷ்டிகளைச் சொல்லி அவற்ருல் துதிக்கப்படுகிறவனும் உத் எனகிற பெயரையுடையவனும் கண்ணிலும் ஸுர்யமண்டலத்திலும் ப்ரகாசிப்பவனும் செந்தாமரைக் கண்ணனுமான நீயாக உத்கீதத்தைப் பார்ப்பதென்கிற ஆதித்ய-அக்ஷிவித்யைகளும் முதலத்யாயத்தில் ஓதப்பெற்றன. உனக்கு உத் என்கிற பெயர் இருப்பதால் தான் உத்கீதத்தை உத்கீதமென்றும் உத்காதாவை உத்காதாவென்றும் சொல்வதென்றது. ஆகாசமென்கிற பெயராலும் ப்ராணனென்கிற பெயராலும் உன்னைச் சொல்லி உத்கீதத்திலும் ப்ரஸ்தாவமென்கிற ஸாம பாகத்திலும் முறையே த்ருஷ்டி மொழியப்பெற்றது.

गम्भीराम्भस्समुत्थं जलभरितमहानालमर्कांशुफुल्लं
रक्तं यत् पुण्डरीकं तदुपमनयनोऽस्यानखान्तात् सुवर्णः ।
उन्नामा पूरुषो यं श्रितरम! विदुषां सर्वपाप्मोद्गतिः (त्क्रमः) स्यात्
तस्यार्कस्थस्य मत्या फलमुपरि(भज)जयत्यक्षिगस्य त्वधस्तात् ॥५८

.४ पूर्वार्धे 'कप्यासं पुण्डरीकमेवमक्षिणी' 'आप्रणखात् सर्व एव सुवर्णः' इति वाक्यार्थ उक्तः। भगवत उदिति नाम; तस्य सर्वपापसंबधं विना ऊर्ध्वं स्थितत्वात्। ईदृशनामार्थज्ञानिनां सर्वपापात् उत्क्रान्तिर्भवतीत्युक्तम्। तस्य मत्या.उन्नामक.पुण्डरीकाक्ष-सुवर्णवर्ण.सूर्यमण्डलस्थभगवद्दृष्टौ उद्गीथे कृतायां उपरितनलोक-प्राप्तिः फलम्, तादृशाक्षिस्थभगवद्दृष्टौ कृतायां पृथिव्याद्यधो-लोकानुभवादिफलञ्चोक्तम्। जयतीत्यस्य सर्वोत्कर्षेण भवतीत्यर्थः।

58 வேதத்தில், கப்யாஸம் புண்டரீக மென்பதற்கு ஆழமான ஜலத்திலுண்டாகி நீர் நிறைந்த தண்டோடு சேர்ந்து ஸூர்யகிரணத்திஞல் மலர்ந்த செந்தாமரைப்பூ என்று பொருள். அது போன்ற திருக்கண்களையுடையஞய் பாதத்தினின்று சிரஸ்ஸுவரையில் பொன்னிறஞய் பாபம் படாதபடி எழுச்சி பெற்றிருப்பதாலே உத் என்ற பெயர் உடையஞய் இப்பொருள் அறிபவருக்குப் பாபம் போக்குபவனுமான உன்னை நினைத்து இப்படி ஸூர்யமண்டலத்திலிருக்கும் நீயே உத்கீதமென்று பாவித்தால் மேலுலக ஐச்வர்யலாபம், இப்படிக் கண்ணிலிருக்கும் நீயே உத்கீதமென்று பாவித்தால் கீழுலகில் ஐச்வர்ய லாபம் என்றது.

उक्त्वा साम्नो गतिं प्राक् स्वरमिह(स्वरे) च जगौ प्राणमन्नं तथाऽपः
स्वर्गं दाल्भ्यः क्रमस्थां गतिमिह शिलको भूमिमन्ते, परस्त्वाम् ।
आकाशं सर्वभूतोद्भवविलयकरं जैबलिः प्राप्यकाष्ठाम् ;
श्रीशोद्गीथो वरिष्ठस्त्वमयमिति विदो जीवनं स्याद् वरिष्ठम् ॥५९॥
प्रस्तोतृद्गीथकारप्रतिहरणकरान् एत्य यज्ञे ह्युषस्तिः
प्राणश्चादित्यमन्नं क्रमत इह जगौ देवतां वेदनीयाम् ।

---

59 सामविषयकचर्चोद्देशेन समाविष्टेषु त्रिषु स्वरं सामगतित्वेन निर्दिश्य प्राण अन्न जल.स्वर्गान् क्रमेणोपर्युपरि गतित्वेनोक्त्वोपरतं दाल्भ्यं शिलके तदुपरि भूमिं गतिकाष्ठात्वेनोक्त्वा निरस्तवति, जैबलिः राजा तं निरस्य सर्वप्राण्युत्पत्तिलयहेतुं प्राप्यकाष्ठाभूतं आकाशशब्दवाच्यं त्वामेव गतित्वेनोवाच । अतः श्रीमन्! तादृशवरिष्ठत्वदृदृष्टिः उद्गीथे कृता वरिष्ठजीवनहेतुर्भवतीति । गतिशब्दस्य प्राप्यमित्यर्थः ।

59 மூவர் ஸாமாவுக்கு கதி (ப்ராப்யம்) எது என்கிற சர்ச்சை செய்யும்போது தால்ப்யரென்பவர் ஸ்வரம் ப்ராணன் அந்நம் ஜலம் ஸ்வர்க்கம் என்ற வற்றை மேன்மேல் கதியாகக் கூறி நிற்க, ஶிலகர் அதை மறுத்து அதற்கும் மேல் பூமியை கதியாகக் கூறிய போது ஜைபலி என்கிற அரசர் ஸர்வ ப்ராணிகாரணமாய் பரமப்ராப்யமாய் நனகு ப்ரகாசிப்பதால் ஆகாசமுடான உன்னை முடிவான கதி யென்றார். உத்கீதத்தை அந்த ஆகாசமாக உபாஸித்தால் உயர்ந்த ஜீவநமாம்,

60 देवताज्ञानवान् उषास्तः यज्ञे गानप्रवृत्तान् प्रस्तोतृ उद्गातृ,प्रति-
60 உஷஸ்தி யென்பவர் யஜ்ஞத்தில் காநம்

स प्राणः सर्वभूतप्रभवविलयकृत् वेङ्कटेशासि वेद्यः

प्रस्तावे भक्तिभेदे ; फलमिह तु भवेद् वीर्यवत्त्वातिरेकः ॥६०॥

प्रागादौ दिश्यथोर्ध्वं प्रततरविकराकृष्टपञ्चामृताढ्यं

तिर्यग्वंशे द्युलोकात्मनि मधु विलसत्यन्तरिक्षे त्वपूपे ।

हर्तृरूपान् त्रीन् त्वज उपेत्य तदुगेयानां प्रस्ताव.उद्गीथ.प्रतिहाराणां यथा-क्रमं प्राण.आदित्य.अन्नानि देवता.वेनावाचत् । तत्रोक्तः प्राणः परं सर्वभूतस्थिति.लयहेतुत्वेनोक्तत्वात् त्वमेव भवसि । उपासनफलं किमिति चेत्, "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति' इति एतदुपनिषदुपक्रमे उक्तं वीर्यवत्तरत्वमेव । तत्र प्रतिबन्धकमपि व्यपोह्य कर्मणः फलप्रदत्वम् । भक्तिभेद इत्यस्य साम्नो भाग-विशेष इत्यर्थः । भक्तिः भागः ।

பண்ணுகிற மூவர்களிடம் நெருங்கி அவர்கள் கானம் பண்ணும் ப்ரஸ்தாவம் உத்கீதம் ப்ரதிஹாரம் என்கிற ஸாமவிபாகங்களுக்கு முறையே ப்ராணனையும் ஆதித்யனையும் அந்நத்தையும் தேவதையாக உபதேசித்தார். அவற்றில் ப்ராணனாகிறாய் நீயே. ஸர்வ ப்ராணிகளுக்கும உத்பத்திக்கும் ப்ரளயத்திற்கும் காரணமாக ப்ராணன் சொல்லப்பட்டதே. அதற்குப் பலனென்ன வெனில், செய்யும் கர்மா சிறந்த வீர்யம் பெறுகை.

61-62-63. **अथ त्रिभिश्श्लोकैर्मधुविद्या । आदित्यो मधुत्वेन कल्प्यते । तत्र द्युलोकः तिर्यग्भूतो वंशः । अन्तरिक्षं अपूपस्थाना-पन्नम् । अपूपशब्देन अपूपाकारमधुस्थानमुच्यते । तत्र आदित्यो**

61-62-63 ஸ்வர்க்கலோகமென்கிற குறுக்குக் கொம்பில் அந்தரிக்ஷமென்கிற தேனடையில் ஸூர்யனாகிற தேன் ஐந்து திக்கில் ஐந்து அம்ருதமாக

मन्त्रैः ऋग्वेदपुष्पस्थितरसवदबुद्धावितः कीर्तिमुख्यो
ह्यग्भिः प्राग्रश्मिनाड्या रस इह विततो रोहितं रूपमस्य ॥६१
एवं शुक्लं यजुष्टो यजुरधिगमितः सामतः कृष्णरूपं
सारोऽथर्वाङ्गिरोभिर्विहित इह परःकृष्णरूपं पुराणात् ।
गुह्यादेशैस्तु मध्ये तरलमिव यदस्त्येष स ब्रह्मपुष्पात्
यत् तत् वस्वादयोऽग्निप्रमुखमुखयुता भुञ्जते रोहिताद्यम् ॥६२
उद्यन् अस्तञ्च गच्छन् य इह मधु भवत्येष आदित्यः एष
त्यक्तावस्थोऽथ भायात् निरुदयविलयश्चैनमादित्यमुख्यम् ।

मधु तत्र सूर्याकरणैः आकृष्टानि अमृतानि प्राच्यादिषु चतसृषु दिक्षु ऊर्ध्वदिशि च सन्ति । प्राच्यां ऋग्वेदविहितकर्मरूपपुष्पेभ्यः ऋङ्मन्त्रैः आकृष्टरसवदंशोत्पादितः कर्मफलभूतः कीर्त्यादिरसः सूर्यरश्मिद्वारा नीतः रोहितरूपो वर्तते । एवं यजुर्वेदात् आकृष्टं फलं शुक्लरूपं दक्षिणस्याम् । सामवेदात् कृष्णं रूपं प्रतीच्याम् । अथर्वाङ्गिरोमन्त्रैः फलं पुराणादितः आकृष्टं उदीच्यां परःकृष्णरूपम् । परःकृष्णेत्यस्य अतिशयितकृष्णेत्यर्थः । रहस्योपदेशजनितफलं ऊर्ध्वं आदित्यमध्ये चलदिवास्ति । तदेव ब्रह्मपुष्पफलमित्युच्यते । इमान्यमृतानि पञ्च.वसुरुद्र आदित्य.मरुत्साध्याः गणा यथासंख्यं भुञ्जते । भोजनसाधनं मुखं विभिन्नमग्न्यादि । प्रत्यहं तेषां भोज्यं मधु भवति । यदा स आदित्यावस्थां विहाय स्वरूपेण वर्तते, तदा उदयलयरहितो भवति ।

இருக்கிறது கிழக்கு முதலான நான்கு திக்கிலும் நான்கு வேதங்களிலுள்ள கர்மாக்கள் மூலம் வரும் பலனாகிற அம்ருதங்கள் சிவப்பு நிறம் முதலான வடிவில் அந்தந்த மந்த்ரங்களால் கொணரப் பெற்றுத் தங்குகிறது. ஸூர்யனின் மேற்புறத்தில் ரஹஸ்யோபதேச மூலமான கர்மாவினாலாம் பலன்

श्रीमन्! देवादयोऽपि श्रितवृषशिखर! त्वन्मयं भावयन्तो
वस्वादिस्थानभाजो विलयविरहितां यान्ति मुक्तिं क्रमेण ॥६३॥
व्याप्त्या भूत्योर्नभोवद्ध्युपधिपरिमितः पूर्ण एवाप्रवर्ती
गायत्रीवत् चतुष्पात् त्वमसि मतिपदं श्रीनिधे! षड्विधश्च ।

इवं तस्य मुक्त्यवस्था। अत्र आदित्यस्य वस्वादिभोज्यामृतत्वदृष्टिमात्रेण मोक्षो न भवति। तस्याः ब्रह्मविद्यात्वेन कीर्तनात् वस्वादिदेवतानामादित्यस्य चान्तर्यामित्वेन त्वमुपास्यमानः प्रथमतः वस्वादिसायुज्यं पश्चात् मुक्तिं च ददासीत्युच्यते। अत्र मधुविद्यायां गतिविषये वक्तव्यं अस्मदाचार्यानुगृहीते मधुविद्यामार्गदर्पणे द्रष्टव्यम्। वस्वादिसंबन्धिफलविषये वक्तव्यविस्तरः अस्मदीयपरिष्कारे द्रष्टव्यः॥

அம்ருதமாக நிற்கிறது. இவற்றை வஸுருத்ர ஆதித்ய மருத் ஸாத்யரென்கிற தேவகணங்கள் அக்நி முதலான முகங்களைக் கொண்டு உண்கிறன. ஸூர்யன் ஸூர்யனாகவிருக்கும் வரையில் இப்படி தேனுகிறான். பிறகு முக்தனுகிறான். இங்கு வஸ்வாதிகளுக்கும் ஸூர்யனுக்கும் அந்தர்யாமியாக பகவானையும் உபாஸிக்கவேண்டும். அதனால் வஸ்வாதி ஸ்த்தாநமும் அதன் பிறகு மோக்ஷபலனுமுண்டு இது இங்கு மூன்று ச்லோகங்களிற் சொன்ன மதுவித்யையாம்,

गायत्रीविद्या। हे श्रीनिधे! भूत्योः = लीलाविभूतौ नित्यविभूतौ च तव व्याप्तत्वात्, परिमितत्वं आकाशस्येव उपाधिप्रयुक्तम्। अतः पूर्णस्त्वं अप्रवर्ती = चलनक्रियारहितो भवसि।

64 லீலாவிபூதி நித்யவிபூதி இவ்விரண்டிலும் நீ வ்யாபித்திருப்பதால் உனக்குச் சிறிய பரிமாணத்தைச் சொல்வது **घटाकाशम्** என்றாற் போலே உபாதியைக் கொண்டாம். நீ பூர்ணன் அசையாதவன்.

भूतं पृथ्वी शरीरं हृदिति चरणभाक् गानसंत्राणकारी
भूतप्राणप्रतिष्ठा तदिह निगदितो नातिवर्त्यश्च ताभ्याम् ॥६४
मुक्त्यर्थाया अमुष्या गुण इति विहिता पञ्चहृच्छिद्रनेतृ–
स्वर्गद्वाराधिपत्वत्पुरुषमतिः ; इमामाश्रिता दृष्टयोऽन्याः ।

गायत्रीच्छन्दोवत् पादचतुष्कविधाषट्कवांश्च। यद्यपि त्रिपदा गायत्री, तथापि इन्द्रश्शचीपतिरित्यादौ पादचतुष्कमिष्टम्। विधाषट्कं प्रतिपदं षडक्षरत्वात्। ब्रह्मणस्तत्र तु अत्र भूतं पृथिवी शरीरं हृदयमिति पादचतुष्कमुक्तम्। षड्विधास्तु—गानकर्तृत्व-त्राणकर्तृत्व भूतप्रतिष्ठात्व-प्राणप्रतिष्ठात्व-भूतानतिलङ्घ्यत्व प्राणानतिलङ्घ्यत्वरूपा इति चोक्तम्। एवं गायत्र्यात्मत्वेनोपासीत।

காயத்ரீச்சந்தஸ்ஸைப் போலே நான்கு பாதங்களும் ஆறுவகைகளுமுடையவன். சில காயத்ரிக்கு அவ்வாறு அக்ஷரமாக நாலு பாதங்களுண்டு என்றார் ஸ்ரீபாஷ்யத்தில். ஆகையால் அதை சதுஷ்பதா என்றும் ஷட்விதா என்றும் சொல்வதாம். ப்ரஹ்மத்திற்கு இங்கே பூதம் (ப்ராணி) பூமி சரீரம் ஹ்ருதயம், என நான்கு பாதங்களும், எதையும் சொல்லுகின்றமை, ரக்ஷிக்கின்றமை, பூதங்களுக்கு ஆதாரமாகை, ப்ராணனுக்கு ஆதாரமாகை, பூதங்களால் மீளமுடியாமை, ப்ராணனாலும் மீளமுடியாமை என்ற ஆறுவகைகளும் கூறப்பெற்றன.

65 **गायत्रीविद्या मोक्षार्था। तत्र 'हृदये पञ्चच्छिद्राणि सन्ति। तन्नेतारः मोक्षरूप स्वर्गद्वारपालाः सन्ति' इति ज्ञानमङ्गम्। तत्र केचन दृष्टिविधाः उक्ताः। हे श्रीनिवास! दिविपरवासुदेवरूप-**

65 மோக்ஷத்திற்கான இந்த காயத்ரீ வித்யைக்கு அங்கமாக ஒரு ஜ்ஞாநம். அதாவது ஹ்ருதய

एवं ज्योतिष्युदर्ये वृषशिखरिपते! द्युस्थितज्योतिरात्म-
त्वद्रूपे ध्यातदृष्टिश्रुतिरपि लभते कान्तिकीर्त्युज्ज्वलत्वम् ॥६५
मानोमय्यादिधर्मा हृदयपरिमितो ब्रह्म मे ह्यन्तरात्मा
प्राप्तास्येतं परेत्य ध्रुवमिति निपुणाभ्यस्तशाण्डिल्यविद्य. ।
श्रीमन्! स्वाधीनसर्वात्मक! भवति तथा; सत्यसंकल्पतायाः
सर्वेशत्वादिरिष्टा श्रुतिरिह ततो वर्ण्यसे वाजिभिर्द्विः ॥६६॥

ज्योतिः त्वम्। उदरे वर्तमानं वैश्वानरज्योतिःतव रूपं शरीरं भवति। एवं बुद्ध्वा तस्य वैश्वानरस्य दृष्टत्वेन श्रुतत्वेन च उपासने दर्शनीयत्वं (कान्तिमत्त्वं) कीर्तिमत्त्वं च फलमुक्तम्।

த்திலுள்ள ஐந்து த்வாரங்களுக்கு அதிபதிகளாக உனது ஸ்வர்க்கத்திற்கான த்வாரபாலகர்கள் உளர் என்பதாம். இங்கே சில த்ருஷ்டி விதிகளைக் கூறி பரமபதத்தில் பரஞ்ஜோதியானவனுக்கு உடலாகும் ப்ராணிகளுக்குள்ள வைச்வாநராக்நி. அதைப்பார்த்த தாகவும் கேட்டதாகவும் உபாஸித்தால் பார்வைக்கு அழகாயும் புகழ் பெற்றவனுமாவான் என்றது.

६६ शाण्डिल्यविद्या-मनोमयत्वादिधर्मवान् हृदयपरिच्छिन्नः ममान्तरात्मा। देहावसाने एनमवश्यं प्राप्स्यामि इति निश्चित्य शाण्डिल्यविद्योपासकः 'सर्वं खल्विदं ब्रह्म' इत्युक्तं स्वाधीनसर्वकं ब्रह्म प्राप्नोति। एवं छान्दोग्योक्ता शाण्डिल्यविद्या वाजिभिः= शुक्लयजुर्वेदिभिरप्युक्ता। परंतु द्विः। एकशाखोक्तस्य शाखान्तरेऽपि

66 மேலே சாண்டில்ய வித்யை. மநோமய த்வம் ப்ராண சரீரத்வம். ஹ்ருதயத்தால் அளவிடப் பட்டிருக்கை எனக்கு அந்தராத்மாவாகைஎன்றவாறு சில குணங்களோடு உபாஸநமிது. நான் மோக்ஷம்

वायुं त्रैलोक्यकोशे वसु दधति चतुर्दिक्प्रसूवत्सरूपं
द्रष्टुः पुत्रो न नश्येदिति गदितमथ स्वस्य पूर्णायुराप्त्यै ।
पुंविद्या काचिदुक्ताऽऽङ्गिरसमुनिरिमां देवकीपुत्रकृष्णो-
द्देशेनोक्त्वाऽऽयुरन्ते श्रितरम! भवदाप्त्यर्थमन्त्रानुवाच ॥

विधानं युक्तम्; तत्तच्छाखाध्येतृपुरुषभेदात्। एकशाखायामेव द्विःकथमिति चेत्—उच्यते। अत्र शाखायां अग्निरहस्यभागे विहिताऽपि शाण्डिल्यविद्या बृहदारण्यकेऽप्युच्यते। परंतु नात्र पुनर्विधिः। किन्तु 'सत्यकामः सत्यसङ्कल्पः' इत्युक्तसत्यसङ्कल्पत्वस्य 'सर्वस्य वशी' 'सर्वस्येशानः' इत्यादिरूपेण विवरणमिति न पुनरुक्ति दोष इति भाष्ये स्थितम्। एतत्प्रदर्शनार्थं श्लोके सत्यसङ्कल्पतायाः इत्यादिवाक्यमिति ध्येयम्। विततिः इत्यस्य विभज्य विस्तरेण कथनमित्यर्थः। (66)

போவேன் என்று நம்பி உபாஸிப்பவன் மோக்ஷம் பெறுவானென்றது. ஸர்வமும் அவனுக்கு அதீநம் என்று உபாஸிக்க வேண்டுமென்று **सर्वं खलु** *என்கிற வாக்யத்தால் தெரிகிறது. 'இது 'நிற்க சுக்ல யஜுர் வேத சாகையில் இந்த சாண்டில்ய வித்யையை இரு தரம் ஏன் சொல்லிற்றென்னில், முதலில் அக்நி—ரஹஸ்யபாகத்தில் சொன்ன வித்யையை மீண்டும் ப்ருஹதாரண்யகத்தில் சொன்னது அங்குச் சொன்ன ஸத்ய ஸங்கல்பத்வம் என்கிற குணத்தை* **सर्वस्य ईशान** *இத்யாதி பதங்களைக் கொண்டு விரித்துரைப்பதற் காக என்க.* (66)

67 त्रैलोक्यमेव वसु=धनं धारयन् कोशः। तत्र संचरन् वायुः चतुर्दिग्रूपाया मातुर्वत्सभूतः इति दृष्टिं यः करोति तस्य पुत्रो

67 மூவுலகே தனத்திற்கு ஸ்தாநமானது;

वाक्प्राणश्रोत्रचक्षुष्मति मनसि तथा तत्तदीशाग्निमुख्यैः
पादैराकाश इद्धे भवति बहु भवदृष्टितः कीर्तिमुख्यम् ।
आदित्ये चाण्डभेदोद्भविनि समनुयद्भूतकामोरुघोषैः
त्वद्दृष्टौ वेङ्कटाद्रीश्वर ! वदति शुभोद्घोषसौख्योपक्लृप्तिम् ॥

नश्यतीति फल॰ , ॰ उपासकस्य पूर्णायुः—(116 वयः—) प्राप्त्यर्था पुरुषविद्या प्रोक्ता । आङ्गिरसाख्यो मुनिः देवकीपुत्र-कृष्णोद्देशेन इमां विद्यां वदन् आयुरन्ते भगवत्प्राप्त्यर्हत्वं पुरुषस्य येन भवेत् तन्मन्त्रमप्युवाच । द्रष्टुरिति वृत्तान्तम् । अतो वायुमिति द्वि॰ीया

அங்கு ஸஞ்சரிக்கும் காற்று நான்கு திக்காகிற தாயின் குழந்தை என்று உபாஸிப்பவனுக்கு மகன் அழிவ தில்லை என்பது பலன். தனக்கு பூர்ண ஆயுளை விரும்புகின்றவனுக்கு புருஷவித்யை என்று ஒரு வித்யை சொல்லப்பட்டது. ஆங்கிரஸமுனிவர் தேவகி புத்ரனை க்ருஷ்ணனுக்கு இதைக் கூறி, திருமாலே! முடிவில் உம்மைப் பெற தகுதி பெறவாம் மந்த்ரங் களைச் சொன்னர். (67)

68 'मनो ब्रह्मेत्युपासीत', 'आकाशो ब्रह्मेति' इति च दृष्टि-द्वयम् । मनसः वाक्प्राणचक्षुश्श्रोत्राणि चत्वारः पादाः । इदं अध्यात्मम् । अधिदैवतं आकाशस्य वागादिदेवताभूताः अग्नि-वायु.आदित्य.दिशः चत्वारः पादाः । एतदुपासनद्वयस्यापि कीर्ति.ब्रह्मवर्चसादिकं फलम् ॥ सृष्ट्यारम्भकाले एकमण्डं उत्पन्नम् ।

68 வாக்கு முதலான நாலு பாதங்களோடு சேர்ந்த மனத்தை ப்ரஹ்மமாகவும் அக்னி முதலான நான்கு பாதங்கள் உடைய ஆகாசத்தை ப்ரஹ்மமாக வம் உபாஸிப்பவர்களுக்கு கீர்த்தி வேதஜ்ஞாநம் முத லான பலன் ஸ்ருஷ்டிகாலத்தில் அண்டமொன்று

वागादीनां चतुर्णाम् अन उपलयभूः, वायुरग्न्यादिकानाम्
तद् तौ संवर्गसंज्ञावति हि दश कृतं स्यात् विराट् सर्वतोऽन्नम्।
अत्ता च नद्यमानः सकलजनयिताऽऽत्मा हिरण्यस्वदंष्टः
सर्वज्ञो रैक्व ह्या न्द खिलदर्शिकृत् श्रीश! तेऽन्नस्य भुक्त्यै ॥६९

तत द्वेधा भिन्नम्। एको भागः पृथिवी; अन्यो द्यौः। तत्र मध्ये उत्पन्नः आदित्यः। तदुदयकाले उरुरवाः भूतानांघोषाः = उदतिष्ठन्। एतमादित्यं ब्रह्मेति उपासीनस्य सर्वे प्राणिनः अनुकूलाः। सर्वे च कामा भवन्ति। (68)

உண்டாய் அது கீழ் மேல் உலகங்களாகப் பிரிந்த போது இடையில் ஸூர்யன் உண்டானன். அப்போது ப்ராணிகளின் ஆநந்த ஆரவாரம் விசேஷமாகவிருந்தது. அந்த ஆதித்யனை ப்ரஹ்மமாக உபாஸித்தால் ப்ராணிகள் அநுகூலமாய் இஷ்டங்களும் ஸித்திக்கும்.

69 क्षत्रियं जानश्रुतिं प्रति रैक्केणोपदिष्टा संवर्गविद्या। लयस्थानं संवर्ग इत्युच्यते। अध्यात्मं वाक्चक्षुश्श्रोत्रमनसां अनः= प्राणः, अधिदैवं अग्निसूर्यचन्द्रजलानां वायुश्च लयस्थानम् वायुः। अत्र प्राणवाय्वोस्संवर्गसंज्ञा। इमे दश पदार्थाः कृतत्वेन भाव्याः। कृतं नाम द्यूतविशेषः। तस्य दशसंख्यत्वात्। अत एव विराट्त्वेनापि भावनीयः; विराट्छन्दसि अक्षराणां दशत्वात्। अत एव अन्नत्वमपि। विराट्पदस्य अन्नार्थकत्वात्। एवमुक्त्वा उपरि उपाख्याने

69 ரைக்வர் ஜாநச்ருதிக்கு உபதேசித்ததாம் ஸம்வர்க வித்யையென்கிற பரவித்யை. ஸம்வர்கமாவது லயிக்குமிடம். வாகாதிகளான நாலுக்கு லய ஸ்தாநமான ப்ராணனும் அக்நியாதிகளான நாலுக்கு லய ஸ்தாநமான வாயுவும் ஸம்வர்க்கமாகும். இவை மொத்தம் பத்தாகையாலே

प्रत्येकं ये चतस्रो ननु दधति कला: श्रीपते ! ते प्रकाशा-
नन्त,ज्योति:पदार्थाऽऽयतनयुगभिधा ब्रह्मणो यत्र पादाः ।
शुश्रूषाराध्यहारिद्रुमतमृषभतोऽग्नेश्च हंसाच्च मद्गोः
निष्क्रान्ता सत्यकाम प्रति तव खलु सा षोडशांशेशविद्या ॥७०॥

अस्य दशावयस्य अन्नस्य अत्ता -- स्वयमन्येनाद्यमानः सर्वस्रष्टा सूरित्वात् सर्वज्ञः हिरण्यदंष्ट्रशब्देनोक्तः ; हिरण्यवत् कठिनदंष्ट्रावत्त्वाद्वा हिरण्यासुरसंहारकदंष्ट्रावत्त्वाद्वा । एतद्विद्यानिष्ठस्य, सर्वं दृष्टमिति सर्वज्ञत्वमुक्तम् । अन्नादी भवतीति सर्वान्तर्वर्तिभगवद्रूपान्नभोक्तृत्वमप्युक्तम् ।

மொத்தம் க்ருதமென்றும் விராட் என்றும் அந்நமென்றும் பாவிக்கப்படும். க்ருதமென்பது தாயக் கட்டை போன்ற ஒரு ஆட்டமாகும். அதில் எண்ணிக்கை பத்து. இப்படிப்பட்ட அந்நத்திற்கு போக்தா யாரென்றால் ஒருவராலும் புசிக்கப்படாமல் எல்லாம் படைப்பவனாய் ஹிரண்ய ஸம்ஹாரியான பற்களை யுடையவனாய் ஸர்வஜ்ஞனான பகவான், ஆகையால் ரைக்வ வித்யையானது ஸர்வ விஷயமான ஜ்ஞாநத்தை யளிப்பதாய் பகவானாகிற அந்நத்தின் அநுபவமாகிற மோக்ஷத்திற்காகிறது.

70 **गोरक्षणाभिवर्धनरूपगुरुशुश्रूषप्रीतैः ऋषभ-समिदाधानाग्नि-हंस-मद्गुपक्षिभिः हारिद्रुमर्षितशिष्यं सत्यकामं प्रति प्रकाशवान् अनन्तवान् ज्योतिष्मान् आयतनवानिति चत्वारः पादा प्रत्येकं**

70 ஒவ்வொன்றும் நான்கு கலைகள்—அவயவங்கள் கொண்டனவான பாதங்கள் நாலு, ப்ரகாசவாந், அநந்தவாந், ஜ்யோதிஷ்மாந் ஆயதநவாந் என்னும் பெயருடையவை ஸத்யகாமனுக்கு, அவன்

क्षित्यग्न्यन्नार्करूपाद्दिगुडु शशिमयौ गार्हपत्यानुहार्यौ
प्राणाकाशद्युविद्युन्मय इतर इति ह्यग्निवित् कोसलस्त्वाम् ।
संयद्वामः कमात्माऽमृतमभयमथो वामनीर्भामनीश्च
प्राणो ब्रह्मेति दध्यौ फणिवरधरग ! स्वाक्षिग शिष्टार्चिरादिः॥

कलापरपर्याय विभिन्नावयवचतुष्टययुक्ता उपदिष्टाः । तादृशपाद-युक्ततया या षोडशकलब्रह्मविद्या सा श्रीमन् त्वद्विषयिण्येवेत्यर्थः ।
ஹாரித்ருமதரென்ற குருவுக்குச் செய்த சுச்ரூஷை யைக் கண்டு உவந்து ரிஷபம், அக்னி, ஹம்ஸம், மற்றொரு நீர்ப் பக்ஷி இவர்களால் முறையே உபதே சிக்கப்பெற்றன. அப் பாதங்கள் கொண்ட ப்ரஹ்ம வித்யை ஸ்ரீநிவாஸா! உன் விஷயமேயாகும் (70)

71 **गार्हपत्याग्निः उपकोसलाय सत्यकामशुश्रूषाप्रीताय क्षिति. अग्नि. अन्न. अर्करूपांशचतुष्टयवत्स्वविषयविद्यामुपदिदेश, अन्वाहार्यपचनरूपदक्षिणाग्निः अब् - दिक् नक्षत्र - चन्द्ररूपांशविशिष्ट-स्वविद्याम्, आहवनीयनामा चेतरः प्राण. आकाश. स्वर्ग - विद्युद्रूपांश-विशिष्टस्वविद्याम् । तथा त्रयोऽपि किञ्चित् ब्रह्मविद्योपदेशमपि चक्रुः । अथ गुरुः संयद्वामत्वाद्यनेकगुणविशिष्टं ब्रह्म स्वस्वाक्षिस्थले उपास्यमित्युपदिदेश। अर्चिरादिमार्गश्च शिष्टः–उपदिष्टः। तथा गृहीत्वा**

71 மேலே உபகோஸலவித்யை : ஸத்யகாமரென்ற குருவுக்கு உபகோஸலனென்ற சிடன் வெகுகாலம் செய்த சுச்ரூஷையினுல் இரங்கி கார்ஹபத்யம் அந்வா ஹார்யம் ஆஹவநீயமென்கிற வைதிக அக்னிகள் சிறிது ப்ரஹ்மோபதேசமும் தங்கள் விஷயமான வித்யோபதேசமும் செய்தன. அவற்றில் கார்ஹப த்யம், பூமி அக்னி அன்னம் ஸூர்யன் என்ற நாலு உடையது. அந்வாஹார்ய பசனமென்னும் தக்ஷிண

आदिश्यामानवान्तां गतिमपहरणीं मानवावर्तनस्य
श्रीश ! त्वदृज्ञेऽथ यज्ञे ददति फलनिदां मानवावृत्तिहेतुम् ।
होत्राद्युच्चार्यवागाद्युपमननरतब्रह्मनामत्विगुक्त-
व्याहृत्याश्लिष्टहोमैर्विघटितघटनं वर्णयामास वेदः ॥ ७२ ॥

उपकोसलो ध्यानमकरोत् । श्लोके अनुहार्यः= अन्वाहार्यपचनो दक्षिणाग्निः। इतरः-आहवनीयः-कोसलः-उपकोसलनामा। संयद्वामः कल्याणगुणविशिष्टः । कं-सुखम् । वामनीः= कल्याणगुणनेता। भामनिः= भायुक्तः। फणिवरधरग= हे शेषाद्रिनाथ इत्यर्थः॥

க்னியானது ஜலம் திக்கு நக்ஷத்ரம் சந்த்ரன் என்ற நான்கை உடையது ஆஹவநீயம் ப்ராணன் ஆகாயம். ஸ்வர்க்கம் மின்னல் என்ற நான்கு உடையது. இந்த அக்னிவித்யையானது அங்கம். ப்ரதானமான ப்ரஹ்மவித்யையில் ஸம்யத்வாமன், ஸுகரூபன். ஆத்மா அம்ருதம் அபயம் வாமனி, பாமனி, ப்ராணனென்றவாருக ப்ரஹ்மம் உபாஸிக்கப்படுமென்று குரு கூறி அர்ச்சிராதி மார்க்கத்தையும் உபதேசித்தார்,

72 उपकोसलविद्योपरि यज्ञे ब्रह्मणा ऋत्विजा कार्यमाण-प्रायश्चित्तनिरूपणं क्रियते। तत्र संगतिरुच्यते प्रथममिह। यत्राचिरा-दिगतौ अमानव आतिवाहिकोऽन्ते वर्तते, सा 'इमं मानवमावर्तं नावर्तन्ते' इत्यनावृत्तिहेतुतयोक्ता। ततो मानवावृत्तिहेतुयज्ञोपस्थित्या तत्र प्रायश्चित्ताकरणे फलाप्राप्तिरिति तदुच्यते। अर्चिरादिगतिः

72 உபகோஸலவித்யையில் அர்ச்சிராதி மார்க்கம் மொழியப்பெற்றது. அங்கு அமானவன் அழைத்துச் செல்ல பகவானை யறிந்து சென்றவன் இங்குத் திரும்பமாட்டானென்றது. திரும்பி வருவது யாகாதிகளைச் செய்தவருக்கேயாம். அதனால் யக்ஞ விஷயம்

ज्येष्ठाच्छ्रेष्ठात् भवत्यायतनमिह मनोवाग् वसिष्ठा, प्रतिष्ठा
चक्षुः, श्रोत्रश्च संपत् तनुकरणधृतोऽनात् प्रजातिश्च रेतः।
अन्नं सर्वं तदन्न तदनदमभितः श्रोत्रियाचान्ततीर्थं
तद्ब्रह्मेति यद्वित्त्यधिगमनफलं ज्यैष्ठ्यवासिष्ठ्यमुख्यम् ॥७३॥

भगवन्! त्वदङ्गे पुरुषे भवति। अङ्गे तु यज्ञः। तत्र फलं विभिन्नम्। होतृ-उद्गात्रादि वाचिकादिकार्ये दोषो भवति नवेति ब्रह्मा उपमननम् अवधानेन चिन्तनं करोति। तेनोक्तरीत्या भूर्भुवस्सुवर्व्याहृति-युक्तहोमैः लुप्तांशलोपपरिहारात् अघटितस्य घटनं भवति। अत्र विस्तरः परिष्कारे द्रष्टव्यः।

மேலே நினைவுற. அதில் ஹோதா முதலான ரித்விக்குகள் தவறினால் வேறு பலன்கூட பெறமுடியாது. ஆகையால் ப்ரஹ்மாவின்சொற்படி வ்யாஹ்ருதிகளைக் கொண்டு ஹோமம் செய்ய வேண்டுமென்றது.

7 मुख्यप्राणविद्या—प्राणवायुः मुखे भवतीति मुख्यः; वागाद्यपेक्षया प्रधानभूतत्वाच्च। तं ज्येष्ठत्वेन श्रेष्ठत्वेन चोपासीत। मनस आयतनत्वं वागिन्द्रियस्य वसिष्ठत्वं चक्षुषः प्रतिष्ठात्वं श्रोत्रस्य संपत्त्वं रेतसः प्रजातित्वञ्च अनात्=प्राणादेव भवति। प्राणः किल तनुं=शरीरं करणानि=इन्द्रियाणि च धरति। इदं सर्वं ज्ञात्वा वागादिनोक्तम्—अस्माकमिदं त्वदधीनम्। अतो लोके

73 ப்ராணவாயுவை ஜ்யேஷ்டமாகவும் ச்ரேஷ்டமாகவும் உபாஸிப்பதாம். இந்த்ரியங்களெல்லாம் ப்ராணனுக்கு அதீனமாகையால் மனத்திற்கு உள்ள ஆயதநத்வம், வாக்குக்கு வஸிஷ்டத்வம், கண்ணுக்கு ப்ரதிஷ்டாத்வம், காதுக்கு ஸம்பத்வம் ரேதஸ்ஸுக்குப் பிள்ளைகளைப் பெறுவிக்கும் சக்தி எல்லாம் இந்த ப்ராணனுக்கு அதீனமாகும். அதனால்

प्रध्वंसिक्षुद्रभूतात्मकजनिदमहापातकादेस्तु भीतः
कृत्वेष्टापूर्तदत्तान्यधिगतपितृयाणाख्यधूमादिमार्गः ।
श्रद्धात्मा चन्द्रमासः परिगतममिदावङ्ग आदित्यमुख्यैः
स्वर्गाख्येऽग्नौ हुतो स्मिन् अमृतरुचिरथो व्योमवाय्वभ्रलग्नः ॥

भुज्यमानमन्नं सर्वं तुभ्यमेवास्मा भरन्तीति । अन्नादनात् पूर्वं पश्चाच्च श्रोत्रियैः क्रियमाणमाचमनं यत्, तत् तुभ्यं तीर्थरूपवस्त्रप्रदानमेव क्रियते इति । एवं विदित्वा प्राणोपासने ज्ञातीनां मध्ये ज्येष्ठत्वं श्रेष्ठत्वञ्च लभेतेति । इदं फलञ्च श्रीनिवासाधीनमेव ।

ஆயதநத்வாதி தர்மங்களும் இதனுடையவையே. உலகில் எந்த ப்ராணி புசிக்கும் அன்னமும் ப்ராண னுக்காகவே; அதனுல் வாக்கு முதலானவற்றிற்கும் சக்தி ஏற்படுகிறது. வைதிகர்கள் புசிப்பதற்கு முன் பின் ஆசமனம் செய்கிருர்களே, அதை ப்ராண னுக்கு ஆடை யளிப்பதாக பாவிக்கவேண்டும். இவ் வுபாஸனம் செய்பவன் தன் உற்ருரில் ஜ்யேஷ்ட னுய் ச்ரேஷ்ட்டனுய் விளங்குவான். இப் பலனும் எம்பெருமாஞல்.

74-75 **श्लोकद्वयमेकान्वयम् । अत्र पञ्चाग्निविद्या । महापातकिप्रस्तावः एतद्वयान्ते कृतः। तत्फलं पातकिनां अतिशीघ्रध्वंसिविविधक्षुद्रजन्तुरूपेण जनिः कष्टञ्च; न तु स्वर्गादिप्राप्तिरिति ज्ञापनम् । अतो भीतः इष्टं=यागादि, पूर्तं=तटाकनिर्माणादि, दानं विप्रादिभ्यश्च कृत्वा पितृयाणापरपर्यायं धूमादिमार्गमधिगत्य श्रद्धाशब्द-**

74-75 மஹாபாதகம் போன்ற பாபம் செய்பவர் ஆபாஸ ஜன்மம் எடுத்து, பிறப்பதும் இறப்பது மாயிருப்பார்கள். யாகாதிகளைச் செய்தால் தூமாதி மார்க்கத்தால் ஸ்வர்க்கத்தில் அம்ருதம் போன்ற

आत्मा पर्जन्यपृथ्वीपुरुषयुवतिषु श्रीश ! वर्षान्नरेतो-
गर्भाकारो हुतोऽग्निष्वधिगतसमिदाद्यङ्गकेषु त्वदीयः ।
तत्तत्कर्मानुरूपं भजति पुरुषतां भूतसूक्ष्मैरितीत्थं
पञ्चाग्निज्ञा लभन्ते स्वमथ तव पदं दुष्टसङ्गेऽप्यदुष्टा ॥ ७५॥

वाच्य जलादिभूतसूक्ष्मात्मकशरीरस्यात्मा भवन् चन्द्रलोकं प्राप्तः स्वर्गे हुतो भवति। स्वर्गस्याग्नित्वेन रूपणम् ; तत्रत्यादित्यादीना-मग्निसंबन्धिसमिदादिरूपेण कल्पनमात्रम् । तदनन्तरं चन्द्रवत् देवभोग्यामृतमयदेहो भवति । अयं स्वर्गः पञ्चाग्निविद्याविवक्षितेषु पञ्चसु प्रथमोग्निरिति मन्तव्यम्। तत्र भोगान् अनुभूयैतल्लोकमायाति। तदा मार्गः आकाश.वायु.मेघादिः । तत् अयमात्मा पर्जन्ये अथ पृथिव्याम् ततः पुंसि पश्चात् स्त्रियाञ्च प्रविष्टो भवति पुनर्जननाय । तत्र पर्जन्यादीनामप्यग्नित्वेन कल्पना । तत्र मेघे वर्षजललग्नः, पृथिव्यामोषधिधान्यादौ लग्नोऽन्नलग्नः पुंसि प्रविश्य रेतसि लग्नः स्त्रियां प्रविशति। अत्र सर्वत्राग्नित्वकल्पनावत् तत्तत्संबन्धिवस्तुषु समित्त्वादिकल्पनापि कृता । इदं वर्णनमवश्यज्ञातव्यमस्माकं न भवति । पञ्चभूतसूक्ष्मविशिष्टः तत्तद्योनौ शरीरविशिष्टो भवत्यात्मा स्त्रीरूपपञ्चमाहुत्यनन्तरम्। एवं पुनःपुनर्जन्म भवतीति ज्ञातव्यम् ।

தேஹம் கொண்டு போகம் அனுபவித்துப் பிறகு ஆகாயம் காற்று மேகம் வாயிலாக மழைஜலத்துடன் பூமியிலும், அங்கிருந்து அன்னமாய் புருஷனிடமும், வீர்யமாய் ஸ்திரீகர்ப்பத்திலும் புகுந்து பிறக்கிறான். இப்படியே பலகால். இப்படி படும் பாட்டைக் கண்டு வருந்தி இத்தனை தேஹங்களைவிட ஜீவாத்மா வேறென்று உணர்ந்து உபாஸிக்கும் போது தன்னை எம்பெருமானுனை உனக்கு உடலாகவும் உபாஸித்தால் முதலில் கைவல்யத்தில் தன்னை

पञ्च प्राचीनशालादय ऋषय इतोद्दालकाः केकयाख्यात्
स्वर्मूर्धाऽऽदित्यचक्षुश्चरणिचरणकोऽब्धिरस्तिराकाशमध्यः ।

अथ निर्विण्णः देहविलक्षणं स्वम् आत्मानं ध्यायेत् ; ६ ।-क ले हे श्रीमन् ; त्वच्छरीरत्वेन स्वात्मध्यानं कुर्वन् दुःखान् कं 'ह ' म । त्वत्पदं वैकुण्ठञ्च प्राप्नोति । एतद्विद्यानिष्ठस्य पञ्चमहापातक- कृतदुष्टसंगमे सत्यपि दोषो न भवतीति प्रहि ा तेन। एवं · वैराग्य- निमित्तेन रूपणं मृतस्य निप्रवेशनादयमिदं ः चै मात्र जुगु प गं ।
யனுபவித்துப் பிறகு திருமாலே! உன் இடம் சேர்ந்து முக்தனுவான். இது பஞ்சாக்னிவித்யையிற் சொல்லப் பட்டது மேலுலகத்தையும் வரும்போது தங்கு மிடங்களையும் ஐந்து அக்னிகளாக வேதம் வர்ணிக் கிறது. அவை ஸுவர்க்கம் வரும்போது மேகம் பூமி ஆண்பெண் இவையுமாம். அவைகள் அக்னிகள் என்றதால் அவற்றிற் சேர்ந்த வஸ்துக்களை ஸமித்து முதலானவையாகக் கல்பனை செய்தது அதனுல் பஞ்சாக்னி வித்யை யென்ற பெயர். இறந்தவனை உண்மையான அக்னியிலே இடுகிருர்கள். அதுபோல் தான் இவையுமென்று நினைத்து அஞ்சுவதற்காக இவ்வாறு கூறும்.

76-77 श्लोकद्वयमेकान्वयम् । वैश्वानरविद्या । इतोद्दालकाः इत्यत्र इतः उद्दालकः यैस्तै इति विग्रहः । प्राचीनशालेति कस्यचित् नाम । तदादयः पञ्चर्षयः वैश्वानरोपासकाः तत्र विवदमानाः

76-77 ப்ராசீநசாலாதிகள் ஐந்து பேரும் உத்தா லகரும் வைச்வாநரவித்யையை யறிவதற்குக் கேகய ரிடம் சென்றபோது ஒவ்வொருவர் ஒவ்வோர் அவய

वायुप्राणश्च वैश्वानरपुरुष इति ब्रह्म पूर्णं विदित्वा
प्रोक्ताङ्गापूर्वनामप्रतिकलनविधौ कश्चिदिष्ट्वा प्रकारम्॥ ७६
बुद्ध्वा प्रादेशमात्रामिह विहितविधां स्वस्य मूर्धादि मूर्धा-

निर्णेतुमुद्दालकमाजग्मुः। सोऽपि अपूर्णविद्यासीत्। अतस्सर्वे केकयराजं महीपतिं जग्मुः। तेन पृष्टाः ते क्रमेण स्वर्गं आदित्यं अपः आकाशं वायुं भूमिञ्च वैश्वानरत्वेनोपास्यतयाऽवोचन्। ततस्स एवमुपदिदेश। युष्माभिस्त्वेकैकेन एकैकमुपास्यते। न पूर्णवैश्वानरः। वैश्वानर मूर्धचक्षुर्वस्तिमध्यकायप्राणपादरूपतया सर्व-पूर्वोक्त-समुच्चये पूर्णता। तस्य मूर्धादेः नामधेयविशेषोऽपि ज्ञेयः। प्रादेशमात्रत्वमपि तस्य ज्ञेयम् इति। प्रथमश्लोके चतुर्थपादेन वेदभेदेन नामधेये भेदोऽस्ति। अतः नामप्रतिकलनं केनापि प्रकारेण विकल्पेन कार्यमित्युच्यते। द्वितीयश्लोके प्रथमपादे प्रादेशमात्रमित्यस्य प्रदेशसंबन्धिपरिमाणं स्वर्गभूम्यादिरूपप्रदेशपरिच्छिन्न-

வத்தை மட்டும் முழு வைச்வாநராத்மாவாக நினைத்துச் சொன்னார்கள். அதன் மேல் அவரவர் சொன்ன ஸ்வர்காதிகளை யடுத்து ஸ்வர்கம் வைச்வாநரனுக்கு சிரஸ்ஸு, ஸூர்யன் கண், ஜலம் வஸ்தி (அதாவது மூத்ர ஸ்த்தாநம்), ஆகாசம் இடைப்பாகம், வாயு ப்ராணவாயு பூமி கால், என்றும அந்தத் தலை முதலானவற்றுக்குத் தனித்தனி பெயருண்டென்றும் கூறினர். அப்பெயர் ஒவ்வொரு வேதத்தில் ஒவ்வொரு விதமாக இருக்கிறது. பிறகு ப்ராதேசமாத்ரமாக உபாஸிக்க வேண்டுமென்றார். ஸர்வவ்யாபியான ஆத்மாவை தலையிலிருந்து கால் வரையிலாகச் சொன்ன ப்ரதேசங்களால் பரிச்சிந்நமாக உபா

यस्येत्यध्याय होमोपकरणधिषणां स्वोरआदौ प्रकल्प्य ।
कृत्वा प्राणाग्निहोत्रं सकलहितवहं त्वय्युदर्याग्निरूपे
श्रीमन्! वैश्वानरात्मन्यपहतदुरिताः भुञ्जतेऽन्नं भवन्तम् ॥७७

त्वमित्यर्थो भवति । तदा स्वमूर्धादिपादान्तानां तदीयमूर्धादिभूतस्वर्गादित्वेन भावनम् । अर्थान्तरमपि अग्निरहस्यानुसारेण—प्रादेशो नाम विस्तृत ङ्गुष्ठकनिष्ठिकाग्रहस्तविन्यासविशेषः । एकैकस्य पुंसः चुबुकादिचिकुरान्तप्रदेशः प्रादेशमात्रो भवति । तत्र तादृशप्रदेशरूपाणासकमुखे वैश्वानरमूर्धादिपादान्तसमावेशानुसंन्धानं कर्यमिति । तत्र एकतरविधा बुध्वा भोजनकाले स्वेन क्रियमाणं प्राणाग्निहोत्रे वैश्वानराराधनहोमत्वभावनार्थं स्वकीयवक्षस्स्थलतद्गतरोमादेः होमोपकरणभूत वेदिदर्भादिरूपेण भावनं कुर्यात् । तेन होमेन भगवद्द्वारा कृत्स्नं जगदेव तर्पितं भवति। एवमुपासने सर्वे पाप्मानः प्रदूयन्ते । सर्वदा परमात्मरूपान्नभोजनरूपमोक्षो भवति इति ।

ளிப்பது என்றபடி. அப்போது தன்னுடைய தலை முதலான அவயவத்தை அவனுடைய தலை முதலான அவயவமான ஸ்வர்காதி வஸ்துவாக பாவிப்ப தென்னலாம். அக்நிரஹஸ்யத்தின்படி உபாஸக னுடைய தலையிலிருந்து முகவாய்க்கட்டை வரையி லுள்ள பாகத்தை சாண்பரிமாணமாயிருப்பதாலே ப்ராதேசமாகக் கொண்டு அதில் ஸ்வர்காதி பூமி வரையிலான ப்ரதேசமுள்ள பெருமான் இருப்ப தாக பாவிப்பதென்னலுமாம். இப்படி வைச்வா நரன் தன்னோடு இருப்பதாகக் கொண்டு தன்னு டைய மார்பு முதலானவற்றை ஹோமாக்னி மேடை

आदेशत्वान्निमित्तं किमपि जगदुपादानतासैतदैक्यं
कुम्भाद्यारम्भिमृद्वत् सदिति तदसृजत् खात् तु तेजः पयोऽन्नम्।
कृत्वैकैकं त्रिवृत्, तत् स्थिरचरमभवज्जीवयुक्तं प्रविश्य;
व्यष्टौ द्रष्टुं त्रिवृत्त्वं सुशकमिति चतुःखण्डवाक्यैन्यरूप ॥ ७८ ॥

முதலானவையாகக் கொண்டு போஜனகாலத்தில் தான் செய்யும் அன்னஹுதியை அக்நி ஹோத்ர ஹோமமாக பாவிக்க வேண்டும் அது அவனுக்கு ஆராதநமாய் எல்லோருக்கும் ஹிதமாகிறது. ஹோமத்திற்கிடமான தன்னுடைய ஜாடராக்நியை அவனுக்கு சரீரமாகக் கொள்வது. இவ்வாறு வைச்வாநரஉபாஸநம் செய்கிறவன் பாபம் விலக மோக்ஷத்தில் பரமாத்மாவான பரமாநந்தத்தை யநுபவிக்கிறான் என்று இரண்டு ச்லோகங்களின்பொருள் 77.

78 अथ सद्विद्या—आदेशशब्दस्तत्राऽऽदेष्टृपरः । अतो निमित्तकारणत्वलाभः । सदेव सोम्येदमिति जगद्रूपकार्यैक्यं कारणस्य जगदुपादानत्वात् । मृदो घटाद्युपादानत्वात् । तत् सत् ब्रह्म तेजोजलपृथिवीरूपभूतत्रयं सृष्ट्वा त्रिवृत्करण पूर्वकं अनेन जीवेनात्मनेति रीत्या प्राविश्य स्थिरचरशब्दवाच्यमासीत् । जगति सर्वेषां भूतानां त्रिवृत्त्वमन्याद्युदाहरणे प्रत्यक्षतया प्रादर्शि ।

78 ஸத்வித்யையில் ஸத் என்கிற ப்ரஹ்மத்தை ஆதேஷ்டாவாக அதாவது நியமனம் செய்கிற ஈச்வரனாகவும் தன்னால் உண்டாக்கப்படும் வஸ்துக்களோடு ஒன்றாகவும் அதனால் உபாதானமாகவும் ஓதிற்று, மூன்று மஹாபூதங்களைப் படைத்து, அவற்றை ஒன்றோடொன்று கலந்து பிறகு தேஹங்களைப்

यद्वद् देहस्तथा स्यात् करणमपि मनोऽन्नेन, वाक् तेजसैवं
पोष्यस्तोयेन चाप्नो, दधिजमिव घृतं सूक्ष्ममेतज्जमत्र ।
सुज्ञानश्चोपवासादिदमथ सलिलेऽन्नस्य, तस्याप्ययोऽग्नौ
ज्ञेयो दृष्ट्वा सुषुप्तौ क्षुधि तृषि मरणे चापि चित्ताद्यपीतिम् ॥

டைத்து ஜீவன்களைப் புகுவித்துத் தானும் புகுந்து ஐகமஸ்தாவரமாயிற்றென்றதால் அந்த ஐக்யத்தை வவரித்தது. ஒவ்வொரு பூதத்திலும் மூன்று பூதங்களின் கலப்பு உள்ளதை அக்னி, மின்னல் முதலான உதாரணங்களில் விளக்கிற்று. இப்படி நாலு கண்டங்களின் பொருள். (78)

79 देहस्येव करणानामपि आहंकारिकत्वेऽपि भूतपोष्यत्वमुपयुज्यते । मनसः पार्थिवान्नेन, वाचस्तेजोरूपान्नेन प्राणस्य अम्मयान्नेन च पोष इति । मनः=प्राणः । अन्नादिसूक्ष्मांशः दधिजघृतवत् सारभूतः मनआदिपोषकः।एतदभावे मनसः शक्तिर्नास्तीति उपवासकाले मनसोऽशक्तिं दृष्ट्वा मननीयम् । अथ अन्नस्य= पृथिव्याः जले, जलस्याग्नौ च लयः विलक्षणधोरण्या ज्ञाप्यते;यथा सुषुप्तौ चित्तलयः क्षुधि अन्नस्य जले लयः, तृषि जलस्याग्नौ लयः, मरणेऽपि प्राणस्तेजसीति तेजसि लय इति । तुरीयपादार्थविवरणमुत्तरश्लोके । अप्ययः=लयः । अपीतम्=लयम्—

79 தேஹத்தைப் போலே இந்த்ரியம்போன்ற கரணங்களுக்கும் பூதங்கள் வேண்டும். மனத்திற்கு அன்னத்தினால் புஷ்டி; பிராணனுக்கு நீரினால்; வாக்குக்கு தேஜஸ் அதிகமான நெய்முதலான உணவால். அன்னத்தினின்று மனத்திற்குச் சேர்வது தயிரினின்று கிளரும் நெய் போல் நுண்ணிய அம்ச

स्वापे स्वस्मिन् लये यन्मनस उपलयोऽस्त्यम्मये प्राण इत्थं
मृत्यां प्राणः सचित्तो भजति लयविधां तेजसीदं परस्याम् ।
चिन्त्योदन्या च तेजो ह्युदकविलयकृत् स्यात् ; तथाऽपोऽशनाया ;
कामं वाक् चित्तगा स्यात् ; तदपि लयविधा पूर्वदृष्टक्रमा स्यात् ॥

மாகும். ஆஹாரமில்லையாகில் மனம் வேலை செய்யாது. இதை உபவாஸமிருக்க வைத்து ஆசார்யன் சிஷ்யனுக்குக் காட்டினர் இந்த பூதங்களில் ப்ருதிவி ஜலத்திலும் ஜலம் தேஜஸ்ஸிலும் லயிக்குமென்பதை உறக்கம், பசி தாகம் மரணம் என்பவற்றை விசாரிக்கும் கண்டங்களாலே காண்பிக்கிருரென்னலாம் (இதன் விரிவு அடுத்த ச்லோகத்தில்)

८० स्वपितीत्यस्य स्वमपीतो भवतीत्यर्थः । अतो जागरदशापन्नजीवः सुषुप्तिकाले निर्व्यापारस्वरूपे लीनो भवति । परमात्माऽपि जीवस्य प्रेरणाद्यकरणात् स्वस्मिन् लीनः । अन्नमयस्य मनसोऽपि रागद्वेषादि कालुष्य विरहादुपलयः अम्मये प्राणे, प्राणस्तेजसीति वाक्येन प्राणस्य तेजोरूपभूते लयः । इद मुषितम् मनोगताम्मांशस्य प्राणे तस्याम्मयत्वात् तेजसि च लयस्य युक्तत्वात् । तृट् च उदन्या पिपासा । उदन्याशब्दः उदकनायेत्येतद्विकृतिः । उदकं येन नीयते लयाय, तत् तेज एवोदनाया । गोनाथः पुरुष इतिवत् । एवं क्षुदप्यशनाया, अशितस्य नयनकर्तृ जलमेवेति ।

80 விழித்திருந்த ஜீவன் உறக்கத்தில் லயிக்கிருன். எங்கே? தன் ஸ்வரூபத்தில். அதே ஸ்வபிதி என்பதன் பொருள். அப்போது மனதும் லயிக்கும், ப்ராணனுக்கு தேஜஸில் லயம் சொல்லியிருப்பதும் பொருந்தும். ஜலத்திஞல் போஷிக்கப்படுவதால்

इत्थं सर्वस्य तेजःप्रभृतिविकृतितां चेतनानाञ्च भेदं
स्पष्टं प्रोच्याष्टमान्तैरवददथ परैरष्टभिश्चैवमर्थान् ।
स्वापादौ जीवभेदो भवति मधुरसन्यायतः ; सिन्धुवार्धि-
न्यायाज्जीवेशभेदः; चिति मृतिवचनं त्वस्तु गौणं प्रहाणात् ॥

वस्तुत इदं ... दुरूपं श्रोतृचमत्कारहेतुः । ईदृशमपि वाक्यं तथ्यं मन्वाना इव तुष्यन्ति जना इति भ्रान्तजनवशीकरणसामर्थ्यमात्मनः प्रदर्शयितुमेवमर्थवादरूपं बहु वेदो ब्रूयात् । वास्तवस्तु सर्वापनीत्यादीनामर्थोऽन्योऽन्यत्र ज्ञातव्यः । कामं वा गिति । वाङ् मनसि संपद्यते इति वाक्ये संपत्तिः न लयः किंतु वाचो मनस्संश्लेषः ॥

ப்ராணனே ஜலமென்னலாம். ஜலம் தேஜஸில் லயிக்கலாமே, தாகமென்றால் அது அக்னி கார்யம், அப்போது பருகின நீரும் லயித்து விட்டதென்றதாம் அன்னம் லயிப்பது ஜலத்தில், ஆகவே அசநாயா என்பது ஜலமே. இந்த ச்லோகத்தில் சொன்னதெல்லாம் ரஸோக்தி—உண்மைப் பொருளல்ல.

81 पूर्वार्धे अष्टमखण्डार्थसङ्ग्रहः । नवमखण्डार्थ उच्यते स्वापादाविति । भ्रमरैर्मधु निष्पादितं अनेकवृक्षरससमाहाररूपम् । तत्र वस्तुगत्या रसभेदे सत्यपि तद्विवेको न भवति । तद्वत् सुषुप्तिकाले जीवानां भेदसत्त्वेऽपि तद्विवेको न भवतीत्याशयः । समुद्रे पतन्त्यो नद्यः वस्तुगत्या समुद्रात् भिन्ना अपि साम्यातिशयात्

81 இவ்வாறு தேஜஸ்ஸு முதலான பூதங்களிலிருந்து ப்ரபஞ்சமெல்லாம் உண்டாவதும் அவற்றை விட சேதநங்களான ஆத்மாக்கள் வேறென்றும் எட்டு கண்டங்களாலே விளக்கிவிட்டு, மேலே ஒன்பதாவதில் பல மரங்களினின்று தேனடையில்

न्यग्रोधन्यायरक्ष्या जनिरतिमहतोऽणिष्ठतस्तत् सदेवा-
दृश्यं स्यात् तोयलीनं लवणमिव ; गुरौ मोचयत्यस्तु दृश्यम्।

भिन्नत्वेन न दृश्यन्त इत्युक्तम्। तत्र नदीसमुद्रन्यायेन जीवेशभेदोऽस्तीति ज्ञापितम्। एकादशखण्डार्थः क्षिणीत्यादिना। वृक्षे यां शाखां जीवो जहाति सा शुष्यतीत्युक्त्या जीवस्य मरणं नाम न नाशः। किन्तु देहनिर्गमनत्यागमात्रमित्युक्तं भवति।

ரஸங்களெல்லாம் ஒன்று சேர்ந்தாலும் அந்த ரஸங்கள் வெவ்வேறு என்றதாலே அதுபோல் ஜீவர்களும் எத்தசையிலும் வேறே என்றதாம். 10ல் நதிகள் கடலில் விழுகின்றபடி பரமாத்மாவிடம் ஜீவர்கள் சேருகின்றனர் என்றதால் கடலும் நதிகளும் போலே பரமாத்மாவும் ஜீவர்களும் வேறு என்றதாம். 11ல் மரத்திலிருக்கும் ஜீவன் எந்தக் கிளையை விடுகிறானோ அது உலர்ந்து விடுகிறதென்றதால் மரணமாவது ஜீவனுக்கு நாசமல்ல. தேஹத்தை விடுவது தான் என்றதை யறிவித்ததாம்.

பெயர், பாபங்களைக் கண்டிக்கின்றமையால் வித்யுத் என்ற பெயர், வயிற்றிலுள்ள அக்னி மரணகாலத்தில் அழியும். ஆதிவாஹிகர் ஸூர்யசந்த்ராதிகள் அந்தந்த ஸ்தானத்தில் வழி நடத்துகிறார்கள் அதனுல் சோகமற்ற ஸ்த்தலப்ராப்தி

133 அந்நத்தில் உலகு ப்ரவேசிப்பதால் வி அந்நமாகும். ப்ராணனை அங்கே ரமிபபதால் ப்ராணன் ர ஆகும். இதையறிந்து உபாஸிப்பவனிடம் ஸர்வப்ராணியும் சேரும் ரதியும் உண்டென்று கூறி, திருமாலே! காயத்ரியின நாலாம பாதமாக உன்னைக் கூறிற்று.

गायत्र्येवास्ति जप्या तदत्रविभक्ता स्याच्च सावित्र्यनुष्टुप्
प्राणान् एषा समस्तान् गयपदगमितान् गायतस्त्रायते यत्।
त्रींस्त्रीन् अष्टाक्षराणि ह्यभिदधाति रमावल्लभ! त्रीणि लोकान्
वेदान् प्राणांश्च यानि, क्रमविहिततदीक्षोऽत्र पादेष्वमुष्याः ॥
लोकादौ यद्यत् एतज्जयति, जयकरीं तां तुरीये प्रतिष्ठा-
भाजं पादेऽथ सत्येऽक्षिणि तमपि बले प्राण एतच्च मत्वा।
सोपस्थानं सहाग्न्याह्वयमुखमनघः स्यात् प्रतिग्राह्यसर्वः
प्राप्नोति ध्यानतस्ते सवितरपरजास्त्वां रजःपारवर्तिन्! ॥ १३५ ॥

134-135 तुरीयपादगायत्रीविद्या—श्लोकद्वयमेकान्वयम्। सावित्रीमनुष्टुभं केचिदाहुः। गायत्रीरूपसावित्री जप्या। अष्टाक्षरत्रयेणात्र लोकत्रय-वेदत्रयप्राणत्रयाण्युच्यन्ते। तत्राष्टाक्षरदृष्ट्या लोकवेदप्राणयन्तर्गत सर्वेजयलाभः। गयशब्दवाच्यमुख्यगौणसर्वप्राणत्राणकरत्वात् गायत्री। एवं तद्दृष्टिकर्ता लोकादौ यद्यत्, तत् सर्वं जयति। सा गायत्री तुरीये पादे प्रतिष्ठाभाक्। स च सत्यभूते अक्षिणि। तच्च प्राणाख्ये बले। अस्योपस्थानम् अग्निरूपमुखञ्च

134-135 நான்காம்பாதம் காயத்ரிக்கு அறிய வேண்டும். (இரண்டு ச்லோகங்களும ஒருவாக்யமாகும்.) அநுஷ்டுப் ஸாவித்ரியைவிட காயத்ரி சிறந்தது கய என்ற சொல்லால் சொல்லப்பட்ட ப்ராணன்களைக் காப்பது காயத்ரீ. மூன்றுபாதமும் மூன்று எட்டெழுத்துக்களாம் இவையே மூன்றுலோகங்களும் வேதங்களும் ப்ராணன்களும். இம்மூன்றுக்கு ப்ரதிஷ்டை நான்காம்பாதம். அதற்கு கண்; அதற்கு ப்ராணன். அந்த நான்காம்பாதத்தை உபஸ்தானத்துடன் அக்னி என்ற முகத்துடன் அறிந்தவனுக்கு எதை ப்ரதிக்ரஹித்தாலும் தோஷமில்லை.

त्वद्दृष्ट्यावारकं त्वं श्रितरम ! मनसो वारयन् रागबन्धं
रूपं ते सौम्यतेजः शुभतममुपसंदर्श्य सर्वान्तरात्मन् ! ।
क्षुद्रं देहाद्युपेक्ष्य प्रणवमित ! गतं त्वत्पदाब्जं कृतज्ञ !
क्षिप्राघः सत्पथेन स्थिरपरिचरणानन्दभाजं विधत्से ॥ १३६ ॥

श्वेताश्वतरोपनिषत्

श्वेताश्वाद्याख्यवेदः श्रितरम ! भजनं त्र्यंशकब्रह्मणस्ते
ध्यानैतद्देशसिद्धीक्षणकलनविधाः मुक्तयेऽन्याध्वहानिम् ।

विद्वान्। सर्वप्रतिग्रहेऽपि निर्दोषः। हे रजःपारवर्तिन् तस्य परारजसो जपेन ध्यानेन आगतरजा भवतीति ।

136 ईशावास्यान्ते स्थिता मन्त्रा अत्रापि । प्राणिनां विषयरागः भगवद्दर्शनवारकः। तं वारय। तव रूपं सौम्यतेजोयुक्तं दर्शय। त्वत्पदं प्राप्तं कृतज्ञस्सन् अर्चिरादिमार्गेण नीत्वा कैङ्कर्यसुखमयं कुर्वीत प्रार्थना ।

137 श्वेताश्वतरोपनिषत् षड्भिरध्यायैः षडर्थान् आह— चित् अचित् ईश्वर इति त्रिविध ब्रह्म भजनीयं प्रथमे; ध्यान-तदर्थदेश ध्येयाभिव्यक्ति तद्दर्शनप्रकाराः द्वितीये; नान्यः पन्था

இதை ஜபித்து உபாஸித்தால் பரோரஜ்ஸான ரஜஸ்ஸுக்கு மேலான பரமபதப்ராப்தி—

136 ஈசாவாஸ்யத்தின் முடிவிலுள்ள மந்த்ரங்களே இங்கும் முடிவில். விஷயராகத்தைப் போக்கு; உனது வடிவைக் காணச்செய். உன் திருவடியைப் பற்றிய என்னை உன் இடம் சேர்வித்து உனது கைங்கர்யாநந்தத்தைப் பெறுவிப்பாயாக.

137 சித்து அசித்து ஈச்வரனென்ற பிரிவு, த்யானம் செய்ய இடம் ஸாக்ஷாத்காரம் வரையில்,

योगान्याद्दश्यतामप्युपधिकृतमिथोभेदहान्याऽणुजीवा-
नन्त्याविर्भावमाह क्रमत इह निरालम्बभाव्ये प्रपत्तिम् ॥ १३७ ॥
कालस्वाभाव्यकर्माद्यखिलपरिकरं श्रीनिधे ! ब्रह्मशब्द्यं
विश्वोपादानतायै प्रकृतिपुरुषसंश्लेषणात् त्र्यंशकं त्वाम् ।
तारेणाङ्गुष्ठमात्रं हृदि परपुरुषं सत्त्वदं प्राग् विचिन्त्य
स्वात्मस्थं वीक्ष्य पाशक्षतिसहितसुखैश्वर्यभाक् स्यात् प्रपन्नः ॥

अयनायेति तृतीये, योगादन्येनोपायेन दृश्यत्वं च चतुर्थे, कर्मादिरूपाधिकसंकोचादिहान्या धर्मभूतज्ञानानन्त्यं पञ्चमे, निरालम्बनध्यानसिद्धये प्रपत्तिः षष्ठे इति विभज्यम् ।

138 कालः स्वभावो नियतिर्यदृच्छेत्यादयो न त्याज्याः । इमे ब्रह्मणो मुख्यकारणस्य परिकराः, प्रकृति पुरुष विशिष्टतयोपादान कारणत्वम् । प्रणवेन जीवान्तस्स्थांगुष्ठमात्र ब्रह्म ध्याने मृत्युपाशप्रहाणिः शाश्वत सुखञ्च ।

ப்ரஹ்மமே மோக்ஷோபாயம் யோகமே ஸாக்ஷாத் காரகாரணம், கர்மரூப உபாதி கழிந்தால் பூர்ண ஞ்ஞானவிகாஸம். முடிவான யோகம் ப்ரபத்தி மூலமாக ஸாதிக்கப்படுமென்ற ஆறு விஷயங்கள் ஆறு அத்யாயங்களில் ச்வேதாச்வதரத்தில்

138 காலம் இயற்கை முதலானவை துணை. ப்ரஹ்மம் முக்ய காரணம், சேதநாசேதநங்களோடு சேர்ந்தே உபாதாந காரணமாகும். ஜீவாத்மாவினுள் பரமாத்மாவை த்யானம் செய்ய வேணும், ஸத்துவ குணமளிப்பவன் அவன். பந்தத்தினின்று விடுபட்டு ஸுகம் சாச்வதமாகப் பெறலாம்,

देवात्मन् सत्त्वधामन्! पुरुष! चिदचितोरन्तरात्मन्! महीश!
प्राह ब्रह्मादिधातर्वरद! च तमसःपारवर्तिन्! अनन्त!।
तारार्थाऽऽदित्यवर्णाखिलशरण! सहस्राक्षिशीर्षादिक! त्वां
मध्येनीरञ्च मध्येभुवनमिह गिरित्रेति सप्ताचलेशम्॥ १३९॥
रुद्रेशेशानशब्दाः शिव इति समभिव्याहृतेस्त्वत्परास्ते
माहैश्वर्यञ्च यद्वत् हर इति तदनीशेति जीवप्रकृत्योः।
नैवोमेशोक्तिलिङ्गं क्वचिदथ गिरिशन्तेति संबोध्यसे तं
तन्वन् संहारसर्वेशनकर! भगवांस्त्वं हि लक्ष्मीश! भव्य!॥१४०

अथर्वशिखोपनिषत्

मन्त्रो ध्यानञ्च कर्ता त्रिषय इति चतुर्ष्वेषु बोद्धव्यरीतिं
पृष्टोऽथर्वा शिखायाम्–प्रणव इह परब्रह्म भाव्यः, चतस्रः।

---

139 ச்வேதாச்வதரத்தில் பகவானுக்குச் சொன்ன தர்மங்கள் வரிசையாகக் குறிக்கப்படுகின்றன

140 अत्र रुद्र-ईश-ईशान-शिवशब्दानां सर्वेऽपि नारायण एव विवक्षितः। अमृताक्षरं हरः इत्यत्र हरशब्दवत् तेषां रुद्रार्थकत्वं नास्ति। रुद्रसाधकयुक्तिरपि न। गिरिश-न्तेति पदेन गिरिशरुद्र-सृष्टिकरत्वमप्युक्तम्। सर्वस्य संहर्ता नियन्ता च श्रीनिवास एव।

140 ருத்ர-ஈச-ஈசான-சிவாதிசொற்கள் இருப்பினும் திருமாலே இதன் பொருள். ஹரசப்தம் வேறு பொருளில் இங்கே ஓதப்பெற்றது गिरिशन्त என்று ருத்ரனைச் செய்கிறவன் ஒருவன் சொல்லப்படுகிறான் எல்லாம் அழிப்பவனும் ஆள்பவனும் திருமாலே

141-142 த்யானத்திற்கு மந்த்ரம், த்யான ப்ரகாரம், த்யானம் செய்கிறவன், த்யானிக்கப்படுவது

मात्राः नानास्तवार्हाः प्रतिनियतलसन्नामवर्णाश्च, देवाः
ब्रह्मा विष्णुश्च रुद्रः पुरुष इति वदन् श्रीश ! मेने परं त्वाम् ॥
ह्रस्वो दीर्घः प्लुतोऽसौ प्लुतयुतमविभज्येर्यतेऽन्वर्थनामा-
न्यस्यानेकानि जाग्रत्स्वपनदृढभवत्सुप्तिमोक्षाश्च मात्राः ।
तत्तत्कृद्देवकत्वात् श्रितरम !, भवतो ध्यानमिष्टं तु विष्णुः
ध्याता रुद्रो हृदीक्ष्यः शिवकर ! सकलैश्वर्यकृत् कारणं त्वम् ॥

अथर्वशिरउपनिषत्

सार्वात्म्यं रुद्रदृष्टं तदनुभवबलात् तस्य देवैः स्तुतिश्च
त्वद्वाच्योङ्कारनामान्यभिहितविवृतिं भस्मसंस्पर्शयुक्तम् ।

என்று நான்கு விஷயங்களைக் கேட்க அதர்வர்ஷி, ப்ரணவம் மந்த்ரம். நாலு மாத்ரைகள், அவற்றை நாநாவிதமாகத் துதிக்கலாம், ஒவ்வொன்றுக்கும் பெயர் நிறம் முதலான வேறுபாடு உண்டு. ப்ரஹ்ம விஷ்ணு ருத்ரபுருஷர்கள் அடைவாக தேவதைகள். ஹ்ரஸ்வம் தீர்க்கம் ப்லுதம் என்ற மாத்ரைகள். ப்லுதத்துடன் சேர்த்துச் சொல்லவேணும். ப்ரணவத்திற்குப் பல பெயர் உண்டு. விழிப்பு சொப்பனம் உறக்கம் மோக்ஷமென்ற நான்கு நிலைகள். அவற்றைச் செய்யும் தேவர்கள் இவற்றிற்கு தேவதைகளாவரே. த்யானம் விஷ்ணுமயமாகும். ருத்ரனைப்போல் த்யானம் செய்யவேண்டும். ஸர்வைச்வர்யம் விஷ்ணுவுக்கென்க

143 அதர்வசிரஸ்ஸு ஏழு கண்டங்களால் அடைவாக. ருத்ரன் அனுபவத்திற்கு வந்த ஸர்வாந்தராத்ம நிலையையும், அதையறிந்து தேவர்கள் செய்த

ईशानान्तर्नियन्तुः श्रितरम ! तव निध्यानमित्थंविधत्व-
न्माहात्म्यञ्चाप्यधीतेः फलमिह च शिरः सप्तभिः प्राह खण्डैः ॥
रुद्रो भस्मावृताङ्गो विसदृगनिमिषैर्विस्मितैः को भवानि-
त्युक्तः स्वं साधुवृत्तं गमयितुमगदत् नित्यसर्वात्मतां स्वाम् ।
स स्वस्मादन्तरं त्वामपि बहिरखिलाद् वीक्ष्य लक्ष्मीश ! सोऽहं
सर्वोऽप्यन्योन्यभिन्नोऽहमिति दृढमतिस्तैश्च वेद्यं स्वमाह ॥१४४॥
त्वद्रूपस्तत्त्वदृष्ट्या श्रितरम ! विबुधैर्वन्दितोऽसौ ततस्त्वां
तस्यात्मानं विदन् सन् भसितविलसितः शान्तिमत्यन्तमेते ।

ஸ்துதியையும், பகவத்விஷயமான ஓங்காரத்தின் பெயர்களையும் அவற்றின் பொருளையும், பஸ்மம் தரித்து ருத்ராந்தர்யாமித்யானத்தையும் இப்படிப் பட்ட உனது மேன்மையையும் இதன் அத்யயனத் திற்குப் பலனையும் ஓதும்.

144 எல்லோரையும் போலன்றி ருத்ரன் பஸ் மம் தரித்திருந்ததால் தேவதைகள் நீர் யாரென்று கேட்டார்கள் விஷ்ணுபக்தனு, அல்லனு என்று ஸம்சயம் தன்னை விஷ்ணுபக்தனுக அறிவிக்க அந்தர்யாமிவிஷயமாகச் சொன்னுன்—தனக்கும் எல்லாவற்றிற்கும் வேருக அந்தர்யாமி பகவான் ஆதலால் நானும் பிற ஜீவர்களும் வேருயினும் நானே ஸர்வமென்னலாமென்ருன்

" 145 அது அறிந்து அவனை தேவர்கள் புகழ்ந் தனர்-ருத்ராந்தர்யாமியாக பகவானை யுபாஸிப்பவன் பஸ்மம் தரிக்கவேண்டும். மந்த்ரம் ப்ரணவமே.

तारस्त्वद्ध्यानमन्त्रः, विदधति विधिविष्णवीशलोकाप्तिमेत-
न्मात्राः तुर्याधमात्रा पुनरिह तनुतेऽनामयत्वत्पदाप्तिम् ॥ १४५ ॥

कौषीतक्युपनिषत्

रागादिष्टं ध्रुवेष्टं किमपि चरितवांश्चित्रवत् चन्द्रमाप्तः
तत्पृष्टोऽथो विसृष्टः प्रतिवचनवशात् प्राच्यविद्याबलेन ।
वृष्ट्याद्यापत्यनर्हः स्वयमतिगतवान् अर्चिराद्यध्वशेषं
संकल्पाद् ब्रह्मलोके त्वरमपि विरजां श्रीश ! तीर्त्वाऽऽप्ततिल्यः ॥
प्रत्युद्यच्चूर्णमालाञ्जनवसनफणानेतृदिव्याप्सरस्त्री-
क्लृप्तालङ्कारदेहः क्रमसमुपनतब्रह्मगन्धादिराढ्यः

146-147 पर्यङ्कविद्या—कौषीतकि ब्राह्मणे प्रथमं चित्रकोक्तमुक्तम्-चित्रो नाम कश्चित् मोक्षार्थोपासनप्रवृत्तोऽपि ध्रुवेष्टम्=निश्चितक्षुद्रफलकं किञ्चित् इष्टं=यागं चिकीर्षुः याजकं तदनुगुणं शिक्षयन् तदकरोत्। ततोऽर्चिरादिद्वारा चन्द्रलोके स्वर्गं अनुभवानन्तरं चन्द्रेण पृष्टः. अहं परमात्मोपासक इति प्रतिवचनं श्रुत्वा तेन

அதன் மாத்ரை மூலமாக சாச்வதமாய் நிர்தோஷமான பரவாஸுதேவ வுலகையும் பெறலாம்.

146-147 சித்ரனென்ற அரசன் மோக்ஷத்திற்காக உபாஸிப்பவன் அவஸியம பலன் அளிக்கும் ஒரு யாகத்தை இடையில் செய்து சந்த்ரலோகமான ஸுவர்கம் சென்று அனுபவித்து முடிவில் அவனால் கேட்கப்பெற்று, முமுக்ஷு என்றதால் கீழே தள்ளாமல்விடப்பட்டு அர்ச்சிராதி மார்க்கத்தின் மேல்பாகத்தால் பரமபதம் சென்றான் அதுபோல் அனுஷ்டிப்பவன் அப்படி சென்று அரம் விரஜை தில்ய மரமெல்லாம் கடந்து அப்ஸரஸ்ஸுக்களாலலங்கரிக்கப்பட்டு பரப்ரஹ்மத்தின் கந்தம் ரஸமெல்லாம் பெற்று அமி

पर्यङ्के सोऽमितौजस्यतिमहति सुखोपस्तरे त्वां निषण्णं
पश्यन् आरुह्य सत्योत्तर उदितभवत्तुल्यभोगो विभाति ॥ १४७ ॥
स्तानेष्वादित्यमुख्येष्विह तव लसतो मूलरूपं स्थिरं तत्
कौषीतक्युक्तभूमन्! श्रितरम! महिते मण्टपे भ्राजमानम्।
आसन्द्यामद्भुतांशोज्ज्वलमृदुमधुरास्तारपर्यङ्कमध्ये
ध्यातुं लक्ष्मीममेतं त्वरयति परमार्थाय पर्यङ्कविद्या ॥ १४८ ॥

अधः पातनं विना विसृष्टः वर्षपृथिव्यादिपानं विना अर्चिरादिमार्गतो ब्रह्मलोकं गत्वा, अरनामकं ह्रदं विरजां तिल्यवृक्षं च तीर्त्वा, गन्ध-चूर्ण-माला - अञ्जन - वसन - भूषणान्यानयन्तीभिरप्राकृताप्सरोभिः कृतालंकारः ब्रह्मगन्धरसादिकमपि प्राप्य अमितौजोनामके पर्यङ्के सोपस्तरणे उपविष्टं परमात्मानं पश्यन् कोऽसीति तेन पृष्टः समीचीन-मुत्तरं कृत्वा तदनुमत्या भोगसाम्यं प्राप। तद्वदन्योऽपि भवेदिति।

148 सूर्य-क्षीरसागरादिस्थभगवद्रूपमूलभूतं परवासुदेवरूपं परमपदे। आसन्दी = धर्मादियुक्तपीठम्। अंशवः = सोमांशवः उपस्तरणम्; तद्वति शेषपर्यङ्के आसीनः श्रीपतिः। एतदुपासन-विषयिणीह श्लोकत्रयोक्ता पर्यङ्कविद्या।

தௌஜஸ் என்ற பள்ளியில் வீற்றிருக்கும் பெருமானை அணுகி அவரால் கேட்கப்பெற்று உண்மையை விண்ணப்பம் செய்ய, அவன் அனுக்ரஹத்தால் போக ஸாம்யம் பெறுகிறான்.

148 ஸௌர்யமண்டலாதிகளிலிருக்கும் மூர்த்தி களுக்கு மூலரூபம் பரமபதத்திலுள்ளது அங்கே தர்மாதிபீடத்தில் சேஷனும் பள்ளியில் சயனித்திருப் பவனைப் பெறவான பர்யங்க வித்யை மூன்று ச்லோக ங்களால் சொல்லப்பெற்றது

इन्द्रस्त्वाष्ट्रादिहन्ताऽप्यनघ, उपगतायुष्ट्वयुक्तामृतत्वः
प्राणः, प्रज्ञास्वरूपश्चिदिति निगदितेष्वन्तरात्माऽस्युपास्यः ।
दुर्बाधो ब्रह्महत्यादिभिरिह सुचिरायुश्च तत् स्वर्गलोके
जीवः श्रीशामृतोऽथो भजति निजगुणं सत्यसंकल्पताद्यम् ॥१४९
काष्ठाप्राप्तं हितत्वं हितहिततरते चात्र ते ध्यान एवं
श्रीमन्! उक्तप्रकारः पतिरसि जगतः पालकश्चेश्वरश्च ।
आनन्दश्चाजरश्चामृत इह सदसत्कर्मसंप्रेरकस्त्वं
सच्चासच्चापि कुर्वन् अविकृतिरथ वाज्युक्तबालाकिविद्या ॥१५०॥

४९- ५० प्रतर्दनविद्या= अत्र इन्द्र - प्राण - चिदेनत्रया-न्तर्यामित्वेन परमात्मोपासनम् । त्वष्टृपुत्रविश्वरूपादिहन्तृत्वेऽपि निरघत्वमिन्द्रस्य विशेषणम् । आयुष्ट्वममृतत्वञ्च प्राणस्य, प्रज्ञास्वरूपत्वं चितः । तत्पालंचितः । तत्फलं चिरायुष्ट्वं स्वर्गित्वं पश्चान्मोक्षश्च । अत्र ध्यानस्य मोक्ष, ऐहिकामुष्मिक फलत्रयवत्त्वात् हिततमत्वं हितत्वं हिततरत्वञ्च। पतित्वादिः परमात्मगुणः । अथ बालाकिविद्या अन्या बृहदारण्यकोक्ता ।

149-150 ப்ரதர்தநவித்யை - இந்திரனுக்கும் ப்ராணனுக்கும் சித்துக்கும் அந்தர்யாமியாக பரமாத்மோபாஸனம். அதற்குச் சில விசேஷணங்கள் பரமாத்மாவுக்கு ஜகத்பதித்வாதிகள் குணங்கள். உபாஸன பலன் தீர்க்கமான ஆயுள் ஸ்வர்க்கம் மோக்ஷம் மூன்றும் அதனால் இந்த த்யானம் ஹிததமம், ஹிதம் ஹிததரமென்னப்படலாம். இதற்குப் பிறகு பாலாகிவித்யை. அதன் விரிவு ப்ருஹதாரண்யகத்தில்

मन्त्रिकोपनिषत्

षड्विंशः सप्तविंशोऽप्यसि निखिलमयो द्वैतमद्वैतमेवं
नानादृश्यो नियन्ता परिणमयसि गामष्टरूपां चिदर्थम् ।
व्यापी हंसस्त्रिसूत्रः शुचिरणुरविनाश्यष्टपात् त्वं त्रिवर्त्मा
तेजोहन्तेति मन्त्रोपनिषदुदितधीः श्रीधराप्येति चित् त्वाम् ॥

सुबालोपनिषत्

श्रीमंस्त्वत् सर्वजन्म प्रलयमविकृतानन्दभोग्यत्वतस्ते
मुक्तचर्योपास्यभावं हृदयगमहिमस्वप्ननिद्राप्रबोधान् ।
अक्षान्तर्गोचरान्तः कथयति करणाध्यक्षदेवान्तरन्त-
र्नाड्याः प्राणेऽथ बोधे सुख इह हृदि च व्यानरीतिं सुबालम् ॥
षष्ठाद्यैः श्रीश ! वक्ति क्रमत इह समस्यापि नारायणत्वम्
तद्धेतुश्चान्तरात्मत्वमपि तव जुगुप्स्येऽत्र देहेऽवतारम् ।

---

151 श्रीधर! चित् = जीवः मान्त्रिकोपनिषदुत्पादितधीः त्वयि लयं याति व्यापित्वादिकस्तव धर्मः । हंसत्वं = शुद्धत्वादि । त्रिसूत्रत्वं सृष्ट्यादित्रयकृत्त्वम् । त्रिवर्त्मता = सत्त्वादिगुणत्रयम् । तेजसः = ब्रह्मप्रकाशस्य हन्ता । अष्टपात् = अष्टविधप्रकृतिः । मूल-प्रकृत्याख्यायाः गोः परिणमयिता । षड्विंशत्वादिदुर्निरूपधर्मवांश्च ।

152-153 सुबालोपनिषदि षोडशाध्यायाः क्रमेण वदन्ति

151 25வது தத்துவம், 26வது, த்வைதம், அத்வைதமென்றெல்லாம் தர்சனங்களில் கூறப்படுகின்றவன்; எட்டு ப்ரக்ருதியான அசேதனத்திற்குப் பரிணமம் செய்கிறவன்; வ்யாபித்வாதி குணங்களையுடையவன் இவனை யறிந்தால் இவனிடத்தில் லயம்

152-153 ஸுபாலோபநிஷத்தில் 16 அத்யாய

त्र्यक्षादेरुपास्येऽप्ययमखिलधृतिं मुक्तिमव्यक्तभेदात्
नैयाच्यं बालकर्म क्षयिगुणमखिले दाह्यं शिष्यवृत्तम् ॥१५३
तृप्तोऽपर्याप्तनित्यामृतमखिलकरो निर्विकारोऽखिलज्ञः
सर्वात्माऽऽनन्दभूमा श्रितरम! तमसस्त्वं परस्तात् स्थितोऽसि ।
तद् विष्णोः सूरदृश्यं पदमुपलभतेऽव्यक्तपर्यन्तभेदी ;
नाभिन्नो न द्वितीयः स तव न मृतिमान् न मृतत्वत्समानः ॥१५४
त्र्यक्षः प्राग् भूतमृत्युस्त्वजनि, निविविशे यत्र भीते स, योऽपि

जन्म, प्रलयम्, उपास्यत्वं, हृदयगतप्राणकार्यं स्वप्नादिकं, अक्ष-तद्गोचर तदध्यक्षदेवत-नाडी-प्राण-बोध-मुख हृदयरूपाश्रस्थानगतया ध्येयत्वम्, सर्वस्य नारायणत्वम्, तस्यान्तर्यामित्वम्, देहेऽवतीर्णत्वम्, अक्षादेः परमात्मनि लयम्, धारकत्वम्, अव्यक्ताक्षरादिभेदनपूर्वकमोक्षम्, अयाचनेन जीवनं, सर्वस्य क्षयित्वं नाश्यत्वं शिष्यकृत्यञ्च। अत्र षष्ठाध्यायप्रभृते र्व्याख्यानमसंस्कृतम्।

154 तृप्तत्वादयो भगवद्गुणा अत्रोक्ताः। नाभिन्न इत्यादिना चतुर्थपादेन, "एकत्वं नास्ति द्वैतं कुतः? मर्त्यं नास्ति, अमृतं कुतः" इति श्रुतिवाक्यार्थ एकरूपेणोक्तः।

155 श्रीकान्त! त्वया त्र्यक्षः शूलपाणिरुत्पादितः। तं

ங்களில் 16 விசேஷங்கள் சொல்லப்படுகின்றன, விரிவு வடமொழியில். இது நாராயண பாரம்யம் சொல்லும். 5 அத்யாயங்களுக்கு ச்ருதப்ரகாசிகாசார்யரின் விரிவான உரை. அதற்குமேல் முழுமைக்கும் நமது உரை.

154 த்ருப்தி யுடையன் இத்யாதி குணங்கள் இங்கே பரமாத்மாவுக்குக் கூறப்பெற்றன. நான்காம் பாதம் ஒரு ச்ருதிவாக்யத்தின் பொருளை விளக்கும்.

155 முக்கண்ணனை சூலபாணி பகவானால்

क्रोधात् रुद्रं ललाटादसृजदमुमपि त्वं विधत्से विरिञ्चम् ।
स्रष्टा साक्षात् समष्टेः श्रितरम! तमसः पारवर्ती च विष्णुः
दिव्यो देवोऽन्तरात्मा पुरुष इति मितोऽप्यत्र नारायणश्च ॥१५५॥

अग्निरहस्यम्

हृद्यागं ह्यर्चनीये त्वयि नियतमुशन्त्यागमा बाह्ययागात्
भूयोभोग्योपक्लृप्तिप्रगुणितमितं श्रीनिधे! भावतुष्टे ।
बाह्यक्रत्वङ्गमुक्त्वेष्टकचितमथ वक्तयेवमग्ने रहस्यं
विद्यारूपाग्निशास्त्राद्यखिलपरिकरं धीक्रतुं तद्विशिष्टम् ॥ १५६ ॥

इष्टना ब्रह्मा भातः । ‹ब्रह्मणि तिरोभूतः। ब्रह्मा रुद्रमसृजत् ललाटात् इति अत्रोक्तम् । समष्टिस्रष्टृत्वादिकमपि तत्रैव ।

० अग्निरहस्ये विद्यामयः क्रतुरुक्तः । तेन स्पष्टमिदम्, यत् बाह्ययागापेक्षया मानसयागोऽतिशयेन । भगवत्तृप्तिकरः मनसोत्कृष्टवस्तुभावनसंभवात् । अत एव इष्टकाभिश्चितं स्थण्डिलमग्निशब्दवाच्यं क्रतुशेषभूतं प्रस्तुत्य तत्स्थाने मानसाग्निः तत्साध्यो मानसक्रतुश्चाप्योक्तः ॥

படைக்கப்பட்டான், நான்முகன் நடுங்கினான். அவன் நான்முகனுள் புகுந்தான் நான்முகன் நெற்றியினின்று ருத்ரனைப் படைத்தான் எனறவாறு பல விசேஷங்கள் இங்கே கூறப்பெற்றன.

156 அக்னிரஹஸ்யம்—யாகத்தில் அக்னிக்கு ஆதாரமாகச் செங்கற்களால் கட்டப்படும் மேடைக்கு பதிலாக மானஸமாக மேடைவகைகளையும் அவை மூலம் மானஸ யாகத்தையும் சொல்லிற்று. இதனால் வெளிச்செயலைவிட மானஸத்திற்கு ஏற்றம் எங்கும் விளங்கும்

षट्त्रिंशत् स्युः सहस्राण्यधिमहि पुरुषस्यायुषोऽह्नां तदेत-
द्वैशिष्ट्यात् वल्कमेदं भवति गदितसंख्यानचित्याग्निरूपम् ।
चेतो वाक्प्राणचक्षुश्श्रुतिषु किमपि वा कर्म यद्वाऽथवाऽग्निः
तत्रैकैकाग्निसाध्यः श्रितरम ! भवतः प्रीणनो धीक्रतुः स्यात् ॥१५७
चित्याग्न्यादौ धरित्रीप्रभृतिदृशियुताः सर्वभूताभिसंप
त्याप्त्यै लोकम्पृणायां श्रितरम ! विदधद्व्यग्निवाय्वादिदृष्टीः ।

---

157 अधिमहि-भूम्यां पुरुषस्य पूर्णायुषो दिनानि षट्त्रिंशत्सहस्रसंख्याकानि । तत्रैकैकदिनवैशिष्ट्यं मनआदौ कृत्वा तस्य चयनसंस्कृताग्नित्वेन भावनायां षट्त्रिंशत्संख्याकाः मनोरूपाग्नयः. एवं वाचः, प्राणस्य, चक्षुषः, श्रोत्रस्य, कर्मशब्दवाच्यस्य कायस्य, जाठराग्नेश्च दिनवैशिष्ट्यं कार्यम् । एवं प्रत्येकं तावत्संख्याकत्वम् । तत्र एकैकदिनावच्छिन्नमनोवागादिकिञ्चिद्व्यापारसंघोऽग्नित्वेन भाव्यः । तत्साध्यक्रतुरपि विद्यामयः । अयं धीक्रतुर्भगवत्प्रीणनः ।

158-159 पूर्वविकल्पाधिकरणे, 'परेण च शब्दस्य ताद्विध्यम्' इति सूत्रेण स्वतन्त्रविद्यामयक्रतुसद्भावे स्वतन्त्रविद्याप्रतिपादकं

157 புருஷனுடைய ஆயுளில் நாட்கள் 36 ஆயிரம். மனம் வாக்கு, ப்ராணன் கண் காது காயம் ஜாடராக்னி என்றவற்றில் ஒவ்வொன்றும் ஒவ்வொரு நாளுடன் சேர்க்கப்பட்டு ஒவ்வொரு நாளிலுண்டாம் மனம் முதலானவற்றிலொன்றின் வியாபாரத் திரள் அக்னிமேடையாக பாவிக்கப்பட்டால் மனம் முதலியவற்றில் ஒவ்வொன்றிலும் 36 ஆயிரம் மேடைகளாகும். அவற்றில் ஒரு மேடையை த்யானித்து அதில் யாகம் செய்ததாக பாவித்தால் இதே வித்யாமயமான க்ரது பகவானுக்கு உவப்பானது இது.

158-159 ப்ரஹ்மஸூத்ரத்தில் பூர்வவிகல்ப்

दुष्प्रापं दक्षिणावत्क्रतुभिरविदुषा तत्पदं विद्यया ते
त्वारोहन्त्यस्तकामा इति वदति परं ब्राह्मणं त्वत्प्रभावम् ॥ १५८॥
अन्नं स्याद् मण्डलं तद् वपुरिदमपि तत्तद्गतः पूरुषोऽत्ता
सर्वो भूत्वा च सोऽवत्यखिलमपि भवेत् तत्र यथोपासते तम् ।

परं ब्राह्मणं, चकारात् पूर्वं ब्राह्मणञ्चोपष्टम्भकं दर्शितमिति अनेन श्लोकेन परं ब्राह्मणम्, उत्तरश्लोकेन पूर्वब्राह्मणञ्च दर्श्यते। सर्वभूमाभिसम्पत्तिरूपफलाय लोकम्पृणानामिकायामिष्टकायामग्निवाय्वादिदृष्टयः चित्याग्न्यादिषु पृथिव्यादिदृष्टिरूपांगभूतदृष्टियुक्ताः प्रत्येकं विहिताः। ताः विद्याः स्वतन्त्राः। तन्मध्ये ज्ञानप्रभावोऽपि प्रोक्तः 'विद्यया तदारोहन्ति यत्र कामाः परागताः। न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विनः' इति। दक्षिणावत्क्रतुरिति बहुत्वमन्वगाद्यपेक्ष बाह्यक्रतुरुच्यते। अथ पूर्वब्राह्मणविषयः—आदित्यमण्डलमिदं शरीरञ्चान्नम्। तत्र तत्र पूरुषः परमात्मा अत्ता। तं यथायथोपासते

பாகிகரணத்தில் கீழ்க்கூறிய இடத்திற்குமேல் ப்ராஹ்மணம் இரண்டு குறிக்கப்பட்டிருப்பதால் அதன் பொருள் இரண்டு ச்லோகங்களால் அறிவிக்கப் படுகிறது. லோகம்ப்ருணை என்கிற இஷ்டகையில் அக்னிவாயு முதலானவற்றின் த்ருஷ்டிகள் அவற்றிற்கு அங்கமாக அக்னி மேடையில் பூமி முதலானவற்றின் த்ருஷ்டி பலன் ஸர்வப்ராணிகளும் தன்னைச் சேர்ந்திருக்கையாம் தக்ஷிணை யளித்து ருத்விக்குகள் மூலம் செய்யப்படும் வெளியாகத்திலுல் அடையப் படவாகாத உனது பதத்தை நிஷ்காமர்கள் பெறுவர் என்று பரப்ரஹ்மமான உனது ப்ரபாவமும் பணிக்கப் பெற்றது மேல் ப்ராஹ்மணத்தில். முன் ப்ராஹ்மண

इत्युक्त्वा त्रीष्टकैकाष्टकविधममृतोऽग्निश्च मृत्युश्च सूर्य-
स्वाक्षिस्थं तं विदंस्त्वामिति महितरम! ब्राह्मणं पूर्वमाह ॥१५९॥
मूर्धादौ ध्यातुरङ्गे कृतमिह चुबुकान्ते तु वैश्वानराङ्गं
सर्वं प्रादेशमाने तदवयवनियता नामक्लृप्तिस्तथाऽन्या ।
भाव्यश्चालापमृत्युं जयति च लभते चायुरित्यन्यदेवं
सत्यप्येषा त्वदाप्त्यै श्रितरम! विहिता साम्नि या सैव विद्या ॥

स तदेव भवति, सर्वं तद्भूत्वाऽवति इति श्रुतिरत्रत्या । यद्यद्रूपेण भगवन्तमुपास्ते, तत्तद्रूपो भूत्वा स उपासकं रक्षतीत्यर्थः । ऋग्यजुस्साममेदेन त्रीष्टकत्वमग्नेः; यजु प्राधान्याच्चैकेष्टकत्वम् । ईदृशाग्नित्वेन मृत्युत्वेन सूर्यमण्डल-स्वनेत्ररूपस्थानद्वयस्थत्वेन च परमात्मोपासनमत्रोक्तम् ।

த்திில் ஸூர்யமண்டலமும் இந்த உடலும் அன்னம், அங்கங்குள்ள புருஷன் புசிக்கிறவன், பகவானை எப்படி யுபாஸிக்கிறார்களோ அப்படியாகிறான் அவன் மூன்று வேதங்களாலான செங்கற்களால் செய்யப் படுவதால் மேடை மூன்று இஷ்டகையுளதென்னப் பெறும் யஜுஸ்ஸை ப்ரதானமாக்கி ஒரே இஷ்டகையென்பதுமுண்டு இத்தகைய மேடையாகவும் ஸூர்யன் கண் இரண்டிலுமிருப்பதாகவும் பரமாத்மாவின் உபாஸனமிங்கேயாம்

160 வைச்வாநரவித்யை முன்னமே சாந்தோக்யத்தில் ஓதப்பெற்றது, இங்கே தலையினின்று முகவாய்க்கட்டை வரையிலான ஒரு சாணிடம் வைச்வாநரபுருஷவுருவுக்கு இடமென்றது. அவனுடைய சிரஸ்ஸு முதலானவற்றிற்கு சிறிது வேறு

वेद्यादित्वं यथोरःप्रभृतिषु हि तथा ध्यातुरङ्घ्र्यादि तेऽङ्घ्र्या-
द्युक्तं ; प्रादेशमात्रस्तदसि मिततया त्वं द्यमुख्यैः प्रदेशैः ।
इत्थं छान्दोग्यगीतं यजुषि गदितमेतच्च वैकल्पिकं स्यात् ;
न्यायोऽसौ नामक्लृप्तावपि ; तदिह रमावास ! विधेयमेका ॥१६१॥
श्रीमन् ! अत्यान्नमेवं पृथगिति गदितं ह्यल्पमंशान्तरैश्चा-
युक्तं व्यस्तैकवेदिष्वित इह कथितप्रायमन्नं फलं तत् ।

விதமாகப் பெயரும் உளது. உபாஸன பலன் அப முருத்யு நீங்கப்பெற்று நீண்ட ஆயுளாம் ஆயினும் இது அவாந்தர பலன். முக்கியமான பலன் பரமாத்மாவை அடைவதே யென்று பாஷ்யாதிகளின் முடிவு. பரிஷ்காரத்தைப் பார்க்க.

161 சாந்தோக்யத்தில் உபாஸகனுடைய மார் முதலானவை வேதி முதலானவையாம் உபாஸகனுடைய தலையினின்று கால்வரையில் வைச்வாநரனின் தலைமுதல் கால்வரை பாவிப்பதாம் என்றதற்கும் அக்னிரஹஸ்யத்தில் தலையினின்று முகவாய்க்கட்டைவரையில் பாவனை என்றதற்கும் விகல்பமாம். ஆகப் பெயரில் மாறுதலிருப்பதையும் விகல்பமாகக் கொள்க.

162 **वेदमेदेन वैश्वानरविद्यायां फलभेद इति न : अग्निरहस्येऽपि पृथक् पृथगात्मोपासनादल्पाल्पमन्नमिति, 'पृथगन्नमघस्त' इति वाक्येनोक्तत्वात् समग्रोपासने समग्रान्नादनरूपं छान्दोग्यफल-**

162 ஒரே பலன் உபநிஷத்திலிரண்டிலுமென்பது பொருந்தும் அக்நிரஹஸ்யத்தில் அந்தந்த **அவயவத்தை** மட்டும் உபாஸித்தால் சொற்ப

यत् साम्युक्तं समग्रम् विकलभवदनुध्यानदोषापनुत्ते-
भङ्गी ; प्रादेशमात्रागुणफलकथनं वाऽऽयुराप्त्यादिवादः ॥१६२॥
एकेनोपास्यमुक्तं यदिह तदितरध्यातमुक्तं परत्र
प्रायो दृष्टः कथांशः श्रुतिषु बहुभिदो ह्रस्वबालाकिवाग्वत् ।

मुक्तप्रायम् । अपमृत्युजयादिकथनं तु समग्रोपासने व्यस्तोपासनापादितमृत्युप्रभृत्यभावकथनमात्रम् । यद्वा मूर्धादिचुबुकान्तरूपविकल्पणानुसंधानफलं तदस्तु ।

163 बहवो वैश्वानरविद्यायां विवदमानाः केकयेन शमितविवादा इत्यविवादम् । अथापि एकत्र येन योऽवयव उपास्य उक्तः, सोऽवयवस्तदन्येनोपास्यतयाऽन्यत्रोक्त इति भेदो दृश्यते । तत् बालाकिविद्यायां वेदभेदेन बालाक्युक्तिवैलक्षण्यवत् उपेक्ष्यम्

அன்னப்ராப்தி யென்றதால் பூர்ணமான உபாஸனத்தில் பூர்ணமான உபாஸனமென்பது தனிப் பலனல்ல, அவயவத்தை மட்டும் உபாஸித்தால் நேருகின்ற அபம்ருத்யு பூர்ணோபாஸனத்தில் கிடையாதென்றதாம். அல்லது அக்னிரஹஸ்யத்தில் தலையினின்று முதவாய்க்கட்டைவரையில் வைச்வாநரரூப பாவனைக்கும பலன் அதிகப்படி ஒதினதுமாம். ஆகையால் வைச்வாநரவித்யை எங்குமொன்றே யாகும்.

163 இந்த வைச்வாநரவித்யையில் ஓரிடத்தில் ஒருவன் உபாஸித்ததை மற்றொரு வேதத்தில் வேறொருவன் உபாஸித்ததாகச் சொன்னது பொருந்துமா என்னில், பாலாகிவித்யையில் ஒவ்வொரு வேதத்தில் ஒவ்வொரு விதமாகச் சொன்னது போலாகுக, அதாவது மொத்தத்தில் உண்மை நிலை

पूर्णोपास्त्यर्थवादः स इति न भवतु स्वार्थनैर्भेयमत्र ;
स्याद् वा तत् कल्पभेदात् घटितमुपदिश श्रीश ! नस्त्वं त्वदिष्टम् ॥
कामः कर्मापि गन्धो रस इति सकलाभ्याप्तिपूर्णो ह्यवाक्यो
स्यादादर्तव्यहानेरथ तु भविहृदि श्रीश ! सूक्ष्मे निविष्टः ।
आकाशात्मा च भारूद्वपुरसि धृतिसंकल्पयोः सत्य एवं
प्राणङ्गस्ताण्डिवाजिस्फुटघटितगुणाकृष्टशाण्डिल्यभोग्यः ॥ १६४ ॥
मानोमय्यादिरास्तां हृदयकुहरगस्त्यास्य दुःसंघटः स्यात्

वालाक्युक्तं यद्वा तद्वा भवतु ; तत्र तत्त्वमित्येव तात्पर्यात्। तद्वदि ह।
अथवा कल्पभेदेन प्राचीनशालादयः पुरुषाः भिन्नाः । तैरुपासितमपि
विभिन्नमिति ध्येयम् ।

164 शाण्डिल्यविद्या ताण्डिवेदे छान्दोग्ये, वाजिभेदे अग्नि-
रहस्ये च । सर्वरस इत्यादि परमात्मधर्मा एकरूपा उभयत्र ।
अवाकी स उक्तः कस्मादिति चेत्—परिपूर्णत्वा दादर्तव्याभावात् नत
न किञ्चित्मुफपल्लाप-कार्यं इत्युच्यते इतीति । सत्यकामस्सत्य-
संकल्पः सत्यधृतिः प्राणशरीरे । भारूप इत्यादि ।

1 सत्यकामः सत्यसंकल्प इत्यादिकं द्विरुक्तम्, तस्य

க்கு மாறுனது பாலாகியினுல் நினைக்கப்பட்டது ; அது தவறென்பதிலே நோக்கு அல்லது ஒரு கல்பத்திலே பிறந்த ப்ராசீனசாலரின் உபாஸனம ஒருவிதம் ; மற்றொரு கல்ப்பத்தில் வந்த வேறொரு ப்ராசீனசாலர் வேறுக உபாஸித்தாரென்று கொள்க.

164 சாந்தோக்யத்திலும் அக்னி ரஹஸ்யத்திலும் சாண்டில்யவித்யை ஒரேவிதமாச் சொல்லப்பட்டிருப்பதென்று பரமாத்ம குணங்கள் ச்லோகத்தில் சொல்லப்பெற்றன, விரிவு வேறிடத்தில்.

165 ஸத்யகாமத்வாதிகம் இருதரம் எதற்காகச்

धर्मोऽयं सर्वकामप्रभृतिरिति रमावास! शङ्कापनुत्त्यै ।
ज्यायस्त्वाभङ्गतस्ते सुघटितमखिलं प्राप्यरूपं गुणौघं
हार्दत्वेऽप्याह सामश्रुतिरथ सुलभत्वञ्च हृत्संगमोक्त्या ॥ १६५ ॥
ताण्डिप्रोक्तैर्गुणैस्त्वां युतमपि च मनोवेगिनं कामरूपं
सर्वाश्चानुप्रभूतं दिश इह भिनुमः सत्यधृत्यात्मकञ्च ।
सर्वं खल्वित्युपासा प्रथममभिहिता साग्नि ; तत्स्थान उक्ता
सत्यं ब्रह्मेत्युपासा श्रितरम! चिदचित्सर्वयन्तुस्तवात्र ॥ १६६ ॥

भात्र उच्यते—मनोमयत्वादिकमस्तु हृदयपरिच्छिन्ने दहराकाशे ; सर्वकामत्वादिकं कथमिति शंकायां प्राप्याकारस्य महत्तमत्वात् सर्वमुपपन्नमिति ज्ञापनार्थं पुनर्वचनमिति । हृदये तत्संनिधानकथनं सौलभ्यसद्भावख्यापनाय ।

சொல்லப்பட்டதென்னில், ஹ்ருதயமென்ற சொற்ப ப்ரதேசவளவிலிருப்பவனுக்கு ஸத்யகாமத்வாதிகள் கூடுமோ என்ற வினவுக்கு, உண்மையில் அளவற்றவனுகையாலே கூடுமென்று விடையளிக்கவாம். ஹ்ருதயத்திலிருப்பதால் அவனதுஸௌலப்யம் சொன்னதாம்.

166 छान्दोग्योक्तगुणापेक्षया मनोवेगित्वादयोऽधिका गुणा अग्निरहस्ये ज्ञापिताः । सर्वा दिशोऽनुभूतत्वमप्येकम् । सर्वं खल्विति छान्दोग्ये ; सत्यं ब्रह्मेत्यग्निरहस्ये । तत्र सत्यपदस्य सत्-ति-यमात चेतनाचेतनसर्वनियन्तृ इत्येवार्थः ।

166 அக்னிரஹஸ்யத்தில் சாண்டில்ய வித்யைச் சொன்னது அதிககுணங்களைக் கூறவாம் ஸத்யம் ப்ரஹ்ம என்ற ஸத்யபதத்திற்கு **सर्वं खल्विदं ब्रह्म** *என்றவிடத்திற் போல், ஸத்-தி-யம் என்று பிரித்து சேதநாசேதநஸர்வ ஆத்மா என்றே பொருளாம்.*

महोपनिषत्

ब्रह्मेशानौ निषिध्य प्रलय इतरवत्, प्रोच्य नारायणैक-
स्थैर्यं तस्मात् सहाङ्गैरुपजनिमनयोर्वर्णयन्त्यां महत्याम् ।
श्रीमन्! ब्रह्मादिमात्मन्! उपनिषदि कथं देवतापारमार्थ्यं
नेच्छेत् कश्चित् त्वयि ; स्यात् सुगममिह परं पाठयाथात्म्यविद्भिः ॥

अष्टाक्षरनारायणोपनिषत्

ब्रह्मा रुद्रः समष्टिस्त्वपि भवति यतो, यस्तदेतत् समस्तं
श्रीमन्! अन्तर्बहिः सन् अनघ! शुभ! तवैतस्य नारायणस्य ।
आदर्शं श्रीमदष्टाक्षरपदमखिलश्लाघ्य (मबहिर्भूत) तारं त्रिसन्ध्यं
जप्त्वा पापात् प्रमुक्ताः प्रणिहितमनसो भुक्तिमुक्ती भजन्ति ॥१६८

---

167 नाहो न रात्रिरित्यादिवत् न ब्रह्मा नेशान इति मूर्तिद्वयनिषेधो महोपनिषदि स्पष्टः। तथा तयोरुत्पत्तिश्च। अतस्त्वं नारायण एव परदेवता। अत्रोपनिषदि उपरि पाठभेदाः दृश्यन्ते। श्रीदेशिकग्रन्थाः रक्षादयोऽपि द्रष्टव्याः।

167 ப்ரஹ்மருத்ராதிகளை ப்ரளயத்தில் இல்லையென்று கூறும் மஹோபநிஷத்து. ஆகையால் ஸ்ரீநிவாஸனே பரதேவதை. இவ்வுபநிஷத்தில் மேல் பாகத்தில் பாடபேதம் பலவிதமாகையால் ஸம்ப்ரதாயப்படி பாடவிஷயம் ஆராய்க

१६८ सृष्टौ प्राग्भूतं समष्टितस्त्वं व्यष्टिरूपब्रह्मरुद्रादि च नारायणादित्युक्तम्। अखिलविषयप्रदर्शकत्वादष्टाक्षरं दर्पणतुल्यम्। त्रिसन्ध्यं जपादौ फलमपि सर्वमत्र।

168 ஸமஷ்டி வ்யஷ்டி எல்லாவற்றிற்கும் காரணமான நாராயணனைக் கூறும் அஷ்டாக்ஷரம்

(अथ व्याख्याता इव अव्याख्याता अप्युपनिषदः सन्ति समाम्ना इतीदं कतिपयोपनिषदर्थसंग्रहेण दिङ्मात्रेण प्रदर्श्यते ।

श्रीनृसिंहपूर्वतापनी

क्षीरोदे शेषभोगे शयितमहिपतिक्षोणिभृत्कल्पवृक्ष !
श्रीजुष्टं त्वां नृसिंहं मनसि कलयितुं मन्त्रराजं ब्रवीति ।
कल्याणत्वद्गुणौघप्रकटकममृतत्वादिसर्वार्थहेतुं
शक्तिन्यासाङ्गमन्त्राद्यखिलपरिकरं तापनीयश्रुतिर्नः ॥ १६९ ॥

दृष्ट्वाऽऽदौ मन्त्रराजं रविशशिशिखिभिर्नेत्रिणि श्रीनृसिंहे
ध्यात्वा च स्वात्महोमं शकनमधिगतो व्यक्तसृष्टौ विरिञ्चः ।
रुद्रेन्द्रादिस्तथैतन्मनुकृतमहिमेत्याह चाव्यक्तसंज्ञः
अत्यन्तः श्रीश ! तेऽस्य स्मरति मनुमहिर्बुध्न्य एनं महिष्ठम् ॥ १७०

பெரிய வுருக்களெல்லாம் காட்டும் சிறிய கண்ணுடியாம். முக்காலமும் இதை ஜபித்தால் எல்லாப் பலனுமாம்.

169 ந்ருஸிம்ஹதாபநீயோபநிஷத்தில் நரசிங்கம் திருப்பாற்கடலில் சேஷசயனத்தில் பள்ளி கொண்டதாக ஓதப்பெற்றது. நரசிங்க மந்த்ரம் விரிவாக விளக்கப்பட்டுள்ளது.

170 நான்முகன் மந்த்ரராஜமென்ற நரசிங்க மந்த்ரத்தை ஸூர்யன் சந்திரன் அக்னி என்ற முக்கண்கள் உடைய நரஸிம்ஹனிடம் கண்டு உபாஸித்து ஸ்ருஷ்டி சக்தி பெற்றான். ருத்ரன் இந்திரன் முதலானோரும் இதனால் மேன்மை பெற்றனர். அவ்யக்தோபநிஷத்து இவ்வாறு கூறிற்று. அஹிர்புத்ந்யஸம்ஹிதையில் இம் மந்த்ரத்திற்கு விரிவு.

सीतोपनिषत् श्रीरामोत्तरतापनी च

श्रीभूनीलात्मिका वाक् शशिरविशिखिभात्मा च येषाऽनपाया
भोगार्चात्मा च सीतोपनिषदि गदिता वीरलक्ष्मीश्च सीता ।
सा तारस्तत्र वर्णा अभिदधति च विश्वादिमान् लक्ष्मणादीन्
तद्युक्तं रामनाम श्रितरम ! भवतस्तारकं तारकं नः ॥ १७१ ॥
ध्येयश्चैषोऽविमुक्ते श्रितरम ! वरणानासिकासंधिमध्ये

---

171 सीतोपनिषदि सीता नानाविधभगवच्छक्तिरूपोक्ता। श्रीभूनीलारूपा वेदादिवाग्रूपा सूर्यचन्द्राग्न्यादिरूपा । भगवदवतारानुयायितयाऽनपाया, सर्वैर्निष्कामजनसमाराध्या। औपचारिकसांस्पर्शिकादिभोगैरर्चनीया, वीरलक्ष्मीरिति पृथग्विभवरूपा । श्रीरामतारके प्रणवः सीता तद्घटकवर्णाः लक्ष्मणादिरूपविश्वप्राज्ञतैजसरूपाः । ईदृशो मन्त्रस्तारकाख्यः संसरतां संतारक इत्युक्तम् ॥

171 ஸீதோபநிஷத்தில் ஸீதாதேவி ஸ்ரீபூமி நீளையாகவும் வேதவாக்காகவும் ஸூர்ய சந்த்ராக்னி யாகவும் விட்டுப் பிரியாதவளாகவும், பலவகை த்ரவ்யங்களாலே—குடை சாமரம், அர்க்யம் பாத்யம், வஸ்த்ரம் கந்தம், மாலை, தூபம் தீபம் நைவேத்யம் முதலானவற்றாலே — ஆராதிக்கப்படுகிறவளாகவும் வீர்ய லக்ஷ்மீ என்னும் விபவமூர்த்தியாகவும், ராம தாரகத்தில் ப்ரணவத்தின் பொருளாகவும், அதன் வர்ணங்கள் மூன்றின் பொருளாவர் லக்ஷ்மணாதிகள் வ்யூஹரூபங்களென்றும். இத் தாரகமந்த்ரம் ஸம்ஸார த்தினின்று விடுவிக்குமென்றும் ஓதப்பெற்றதாம்.

172 एषः=रामः । "आमनन्ति चैनमस्मिन्" इति सूत्रे

172 அவிமுக்தனவான் ஜீவன். வரணு என்பது

बारणस्याश्च रुद्रोऽप्युपदिशति मनुं तारकं संमुमूर्षोः ।
सेतुं सिन्धौ बबन्ध ; श्रितगतिममृतस्यैष सेतुः, पुमर्थान् ।
किं चित्रं मन्त्रराजो दिशति नतपरित्राणदीक्षस्य तेऽस्य ॥१७२॥

श्रीकृष्णोपनिषत् गोपालतापनी च

यः पुंसां मोहनं त्वां प्रणतमुनिगणो मैथिलीनिर्विशेषं
भोक्तुं सोत्कण्ठ आसीदनघविहरणानन्दधन्यं विधातुम् ।
धर्मात्मा सर्वशास्ता दशरथतनयो गोपकृष्णात्मनेच्छन्
रन्तुं गोप्यादिरूपं तमजनय इति श्रीश ! कृष्णश्रुतिस्थम् ॥१७३

एतत्समानरूपा जाबालश्रुतिःशांकरभाष्ये उदाहृता। तत्र भामत्यां अविमुक्त-:जीवात्मा ; वरणा =भ्रूरित्युक्तम् । तदत्र ग्राह्यम्। अविमुक्ताख्यं क्षेत्रं काशी। तत्र वाराणसी नदी वरणा नासीति नदीद्वयसंगमरूपेत्यर्थोऽपि ग्राह्यः। मन्त्रराजपदेनात्र तारकमन्त्र उच्यते । अमृतस्यैष सेतुरिति श्रुत्युक्तः परः पापहरं सेतुं हि बबन्ध। तन्मन्त्रस्य तारकत्वं सुतराम् ।

புருவம் அங்கே ஜீவாத்மாவில் ராமனை த்யானம் செய்க. வாராணஸியில் ருத்ரன் ராமதாரக மந்த்ரோபதேசம் செய்கிறான். ராமன் கட்டிய ஸேதுவும் பாபஹரம். அவனே மோக்ஷம் பெறுவிக்கும் ஸேதுவாவான் ஆக அவனது மந்த்ரம் மோக்ஷமளிப்பதில் வியப்பு ஒன்றுமில்லை.

173 ராமன் வநவாஸகாலத்தில் ஸீதா-தேவியைப் போலே அநுபவிக்க அவா கொண்ட ரிஷிகளுக்கு ஆனந்தம் பெறுவிப்பதற்காகத் தான் கோபாலக்ருஷ்ணனாகி அம்முனிவர்களை கோபஸ்த்ரீகளாக அவதரிப்பித்தான் என்றது ஸ்ரீக்ருஷ்ணோபநிஷத்து.

नित्यैर्जुष्टो, विनेता विधिगिरिशवृषादेश्च, गीतोपदेष्टा
स्रष्टा नष्टस्य, मात्रोः सुत इह मृतसंजीवनश्चित्रचर्यः ;
योऽसौ श्रीकृष्ण एतं मनुत उपगतः श्रीश! गोपीजनानां
गोविन्दं वल्लभं त्वां फलमखिलमुपैतीति वेदान्तघुष्टम् ॥ १७४ ॥

श्रीहयग्रीवोपनिषत् श्रीमहाभारते (शान्ति ५९१) उपबृंहिता—

वेदान् मूर्तान् अतानीदधिजलज (कमल) मविस्मर्तुकामोऽब्जजन्मा
नालद्वारैत्य पर्णस्थितजलकलितौ दानवौ तान् अहार्ष्टाम् ।
मध्वाभात् तोयबिन्दोर्मधुरिति, कठिनात् कैटभो राजसोऽयं ;
पूर्वोऽभूत् तामसस्तौ श्रितरम! भवतैवानिरुद्धेन सृष्टौ ॥ १७५ ॥

---

174 கருஷ்ணன் நித்ய ஸூரிகளோடு சேர்ந்தவன். ப்ரஹ்ம ருத்ர இந்த்ராதி சிக்ஷகன், கீதையை உபதேசித்தவன். அழிந்ததையும் படைப்பவன் இரு தாய்களுக்கு ஒரு மகன் மரணமடைந்ததற்கு உயிரளிப்பவன், விசித்ரமான செயலுடையவனை இந்த கோபிகளுக்கு ப்ரியனை கோவிந்தனை உன்னை த்யானம் செய்பவருக்கு எல்லாப் பலனும் உண்டென்றது ஓர் உபநிஷத்து.

175 महाभारते शान्तिपर्वणि (591) कथेत्थम्—ब्रह्मा भगवदुपदिष्टान् वेदान् अविस्मरणाय मूर्तिमतः कृत्वा स्वस्थाने कमले स्थापितवान् । कमलदलगतजलबिन्दू मधुकैटभरूपेण भगवतोत्पादितौ गदाभृतौ नालद्वारा उपर्यागत्य तान् अपाहरताम् ।

175 பகவான் உபதேசித்த வேதங்களுக்கு உருவளித்துப் பிரமன் தன்னிடமான தாமரைப்பூவில் வைத்திருந்தான். பகவான் தாமரையிலையில் நின்ற இரு நீர்த்துளிகளில் தேனின் நிறமான ஒன்றினின்று

अन्धीभूतो विधिस्त्वां स्वगुरुमखिलसंराध्यमाराध्य जप्यैः
वेदं चक्षुर्ययाचे ; त्वमपि हयशिरो बिभ्रदत्यन्तशुभ्रम् ।
आकण्ठं प्राच्यदिव्योज्ज्वलबृहदनुरूपाङ्गसंस्थानभोग्यं
तारोद्गीथस्वरञ्च व्यसृज उदधितः श्रीश ! यातो रसायाम् ॥१७६॥
विष्टोदक्पूर्वसिन्धुद्रुतदनुजरहोगुप्तवेदापहारी
हेषारम्भस्थलाभिद्रुतमुभयमदृष्ट्वेदमारान्निवृत्तः ।

मधुवर्णजलबिन्दूत्पादितत्वात् मधुनामा स तामसः । कठिनबिन्दूत्पादितः कैटभो राजसः ।

தாமஸமான மதுவையும் கடினமான மற்றொன்றி லிருந்து ராஜஸனை கைடபனையும் படைத்தான். அவர்கள் கதையென்ற ஆயுதத்துடன் தாமரைத் தண்டு வழியாக வந்து அவ் வேதங்களைக் கொள்ளை கொண்டனர்.

176 **अथ वेदचक्षुर्विहीनविधिप्रार्थनया भगवान् आकण्ठं प्राच्यनेजरूपः एव सन् तद्युक्तहयशिरोधारी अवतीर्य समुद्रे निमज्ज्य पाताले प्रविश्य प्रणवोद्गीथस्वरूपां हेषां चकार ।**

176 பிறகு பிரமன் வேதமாம் கண் இழந்தா னாய் வேண்டினதால் பகவான் ஹயக்ரீவனுருவ தரித்துக் கடலினுட்புகுந்து பாதாளம் சென்று ஸாமகானத்துடன் ப்ரணவகோஷம் செய்தான்

177 **असुरौ सिंधोरुदक्पूर्वभागे प्रविश्य वेदान् गुप्त्वा, हेषोत्पत्तिस्थानं प्रति गतौ । हयग्रीवः तत्र तावदृष्ट्वा वेदान्**

177 மதுகைடபர்கள் வேதங்களைக் கடலில் வடகிழக்கில் ஒளித்துவைத்துவிட்டு ஹயக்ரீவனின் ஒலியுண்டானவிடம் சென்றனர். ஹயக்ரீவன் அவர்

दत्वा धात्रे च शेषे शयित उपगतौ रोषणौ तौ जघन्य ;
श्रीशोदक्पश्चिमाब्धौ नियतहयशिराः हव्यकव्यादि भुङ्क्ते ॥१७७
साकं स्रष्ट्राऽथ देवा मुनय इह बलं लोकतन्त्रेऽधिगन्तुं
क्षीरोदं प्राप्य चेरुर्महितरम ! तपस्त्वद्वचः शुश्रुवुश्च ।
नित्यं मे यज्ञभागान् वितरथ यदि, वः श्रेय इत्येवम् ; एतैः
स्वं स्वं भागं ददद्भिर्वचनमनुसृतं वैष्णवं यज्ञमिष्ट्वा ॥ १७८ ॥
' यज्ञैराराध्यता वो भवतु भवसमृद्ध्यर्थिनां, लब्धभागैः

गृहीत्वा स्वस्थानं प्राप्य शेषशयने शिश्य . अथ तावागतौ जघान । स एष सिन्धुपश्चिमोत्तरभागे श्रीहयग्रीवरूपो हव्यकव्यभुक् सर्वदा सन्निधे ॥

களைக் காணுமல் வேதங்களை யெடுத்து வந்து சேஷ சயனத்தில் பள்ளிகொண்டிருந்தபோது அவர்கள் வந்தனர் அவர்களை வதைத்தருளினுர். எப்போதும் ஸ்ரீ ஹயக்ரீவமூர்த்தியாகக் கடலின் வடமேற்கில் ஹவ்யகவ்யங்களை யெல்லாம் உட்கொள்பவராய் விளங்குகின்ருர்

178 **देवाः ऋषयश्च लोकनिर्वहसामर्थ्यप्राप्तिकामाः ब्रह्मणा सह तपश्चेरुः क्षीरसागरसमीपे । वैष्णवं क्रतुमिष्ट्वा भागान् मह्यं वितरतेति त्वद्वाक्यं श्रुतवन्तः । अथ तथा तैः कृतम् ।**

178 பிரமனுடன் தேவர்களும் ரிஷிகளும் உலகத்தை நிர்வஹிக்க பெலன் வேண்டி பாற்கடல் சேர்ந்து தவம் புரிந்தனர். உன்விஷயமாக யஜ்ஞம் செய்யும்படி நீ அருள, அச்சொல் கேட்டவுடன் அவ்வாறே அனுஷ்டித்து தங்களாவியன்ற பாகங்களை ஸமர்ப்பித்தனர்.

179 **प्रपञ्चसमृद्धिकामिनो यूयं नरैर्यज्ञैराराध्या भवत ।**

भाव्यश्चाहं भवद्भिः, फलमभिमतमप्यस्तु देयं चरद्भ्यः ।
यस्तु स्यान्मुक्तिकामैः सनकमुखमतस्थायिभिश्चर्यमाणः
श्रेयान् धर्मो निवृत्तिः मम स' इति रमावास ! भागं व्यधास्त्वम् ॥
श्रुत्वा धर्मं निवृत्ते विहितवरबले शर्वमुख्ये सुरौघे
स्रष्टा सूनुः स यज्ञाग्रहर ! तव वपुर्द्रष्टुमिच्छन्नतिष्ठत् ।
तादृक्छुत्यर्थतत्त्वप्रवचनमखिलाम्नायसद्म त्वदीयं
मध्वादेर्हन्तृ लक्ष्मीरमण ! हयशिरोऽदर्शयस्त्वं वपुस्तत् ॥ १८० ॥
आत्मज्ञानस्य रोधादभिमतविहतौ देशिकः प्रादुरास्से ;

तैर्दत्ता भागा भवद्भिर्मह्यं निवेद्याः । तेभ्यः इष्टं फलञ्च दत्त । मुमुक्षुक्रियमाणैर्निवृत्तिधर्मैर्युष्माकं संबन्धो नास्तीति तेभ्योऽवोचः ।

179 உலகின் வளம் விரும்பும் உங்களை மனிதர் ஆராதிப்பர். அவர்கள் கொடுப்பதை நீங்கள் எனக்கு நிவேதனம் செய்து, அவர்களுக்கும் பலன் அளியுங்கள். மோக்ஷம் விரும்பும் நிஷ்காமர்களின் க்ரியைகள் எனக்கேயாம்; உங்களுக்கு ஸம்பந்தமில்லையென்று அவர்களுக்கு உணர்த்தினாய்.

180 यज्ञेष्वग्रभागग्राहिन् भगवन्! रुद्रादौ धर्मं श्रुत्वा वरबलमपि प्राप्य निवृत्ते सति चतुर्मुखाय त्वद्रूपं द्रष्टुकामाय त्वं तदर्थोपदेष्टृ हयग्रीवरूपमदर्शयः ।

180 ருத்ராதி தேவர்கள் வரன் பெற்றுப் போன பிறகு பிரமன் உன்னைக் காண விரும்பவே, முன் வேதார்த்தம் உபதேசித்ததும் ஸர்வவேத நிதியும் மதுகைடப ஸம்ஹாரியுமான உனது ஹயக்ரீவ திவ்யமங்கள மேனியைக் காண அருளினாய்.

181 देशिकः प्रादुरास्से = आचार्यरूपेणावतरसि । हय-

पाराशर्यः प्रभावं तव निखिलममुं पञ्चमे प्राह वेदे ।
शान्तः श्रेष्ठः कृतज्ञः परिचितसुलभः सूक्ष्मधीश्च प्रसिद्धो
वाजी श्रीमंस्तदास्यस्त्वमसि नरवपुः सर्ववागीश्वरेशः ॥ १८१ ॥
दैत्यावब्रह्मसृष्टौ रज इति तम इत्येव वित्तौ निहन्तुं
वीरौ निश्शेषवेदक्षपणरसमितैकार्णवौ श्रीनिवास !
दातुं ब्रह्माण्डसौख्यं मतिमपि महितामिष्ट एषोऽवतारः
ज्येष्ठः श्रेष्ठश्च मुक्तौ घटयति मधुजित् जायमानश्च पश्यन् ॥१८२

रूपग्रहणं कुत इति विमृश्य हयगुणान् गणयति शान्त इत्यादिना। श्रेष्ठः='अपशवो वा अन्ये गोअश्वेभ्यः; पशवो गोअश्वाः' इति श्रुतिः। गामपेक्ष्याश्वस्य बलाद्यतिशयः प्रसिद्धः।

181 ஆத்மஞானத்தை எல்லோருக்கும் அளிக்க ஹயக்ரீவனுன நீ ஆசார்யனுக அவதரிக்கிருய். ஹய க்ரீவ ப்ரபாவம் பாரதத்தில் (சாந்தி) ப்ரஸித்தம். குதிரை முகமாய் அவதரித்ததும் குதிரையின் குண ங்கள் சிறந்தவை என்பதாலாம்.

182 वित्तौ=प्रसिद्धौ। निश्शेषेति। सर्ववेदविनाशन-कामनया एकोदकसमुद्रं मितवन्तौ तत्र सर्वतः सञ्चरितवन्तौ। आदिमासुरहनन-पूर्णब्रह्माण्डसौख्यादिहेतुत्वात् ज्येष्ठः श्रेष्ठश्चायम्।

182 ரஜோகுண தமோகுணங்களே மதுகை டபர்கள் பிரமனுல் படைக்கப்படுமவர்களுக்கு மேற் பட்டவர் முழு ஸமுத்ரத்திலும் திரிந்தவர், எல்லா வேதமும் அழிக்க வந்தவர். அவர்களைக் கொல் வதற்கும் முழுப்ரம்மாண்டத்தின் நன்மைக்கும் காரணமாய் முதன்மையான சிறந்த அவதாரம் இது. இந்த ஹயக்ரீவ கடாக்ஷத்தை பிறக்கும்

व्याख्यामुद्रां कराब्जैर्दधतमरिदरे पुस्तकं चन्द्रभासं
ज्ञानानन्दस्वरूपं स्फटिकमणिनिभे श्रीश ! पद्मे निषण्णम् ।
सव्योरुस्थानलक्ष्मीरुचिरमखिलविद्येश्वरं मन्त्रराजा-
यर्च्यं त्वां भोगमोक्षप्रदमनघहयग्रीवमूर्तिं प्रपद्ये ॥ १८३ ॥

एतावता निखिलमप्यौपनिषदं वाङ्मयं निर्विचिकित्सप्रामाण्यं विवृतमासीत् ।

अप्रामाण्यं बहूनां स्फुटमुपनिषदां प्राच्यतत्तन्मतस्थ-
प्राज्ञप्रष्ठादृतास्वप्यकृतविवरणास्वन्यदन्यन्निविष्टम् ।

मधूसूदनत्वादस्यैतत्कटाक्ष एव जायमानदशायां भवन् मोक्षहेतुः ॥
போது பெற்றவனுக்கு மோக்ஷத்தில் முமுக்ஷுவாம்.

183 अरिदरे = चक्र शंखौ । चतुर्भिः करैश्चतुर्णां धारणम् ।

183 தாமரைபோன்ற திருக்கைகளில், வ்யாக்யான முத்ரை, சக்ரம் சங்கம் புஸ்தகம் இவற்றைக் கொண்டு, சந்த்ரன் போல் சுப்ரமாய், ஜ்ஞாநாநந்த ரூபமாய் படிகம் போன்ற வெண்தாமரையில் வீற்றிருப்பதாய், இடதுதொடையிலமர்ந்த லக்ஷ்மீ தேவியினால் அழகுற்றதுமான ஹயக்ரீவ மூர்த்தியை யுடைய, ஸர்வவித்யைக்கும் ஈச்வரனாய், மேன்மை கொண்ட மந்த்ரங்களால் அர்ச்சிக்கப்படும் பகவானை சரணமடைகிறேன்.

184 उक्तोपनिषदतिरिक्तासूपनिषत्सु अनेकासामप्रामाण्यं स्पष्टम् । प्रष्ठः = अग्रगामी । प्राज्ञाग्रगण्यसमादृतास्वपि प्रक्षिप्तं बहु- लक्ष्यते । यथा जाबाल ब्रह्मबिन्दु महोपनिषदादौ । अतस्तत्तदर्थ-

184 கீழ் உரைத்தவை நீங்கலாக மற்ற உபநிஷத்துக்களில் பல அப்ரமாணமாகையாலும் பல வற்றில் ப்ரக்ஷேபவாக்யம் புகுந்திருப்பதாலும்

जाबाले ब्रह्मबिन्दावुपनिषदि च महत्त्वाश्रयेऽन्यासु चैवं
दृष्ट्वा श्रीमंस्तवाहं स्तवमिह रचये नैतदर्थान् विमृश्य ॥ १८४॥

अथ पुरुषसूक्तार्थसंग्रहशेषतया उत्तरनारायणश्रुत्यर्थोऽप्युपनिबध्यते—

उत्तरनारायणश्रुतिः

अद्भ्यो जातोऽण्डपृथ्व्याः स्वयमधिकृतये ते च लीलारसार्थं
प्रागेकोऽवर्तताजस्तत्र निखिलसृजः व्यूहरूपात् परस्तात् ।
तत्सृष्टं देवमर्त्यप्रभृति च विदधत् रूपमेष्यञ्जनेश !
त्वष्टा त्वं व्यष्टिकृत्त्वात् तव निखिलमिदं नित्यमेवास्ति शेषम् ॥१८५

विमर्शपूर्वकस्ते स्तवो न मयात्र क्रियत ।
அவற்றின் பொருளைக்கொண்டு ஸ்துதி செய்யவில்லை.

185 "अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधत् रूपमेति । तत् पुरुषस्य विश्वमाजानमग्रे ॥" इति मन्त्रार्थः प्रथमे । ब्रह्मा पृथिव्यै-ब्रह्माण्डरक्षणाय । रसात् लीलारसाद्धेतोः । विश्वं कर्म=कार्यं यस्य तस्मात् विश्वसृजो व्यूहरूपात् अधि=परस्तादवर्तत । तस्य रूपं चतुर्मुखसृज्यं सर्वमपि वस्तु त्वष्टा=परमात्मैव विदधत्—सृजन् एति=प्रविशति । तत्—तस्मात् विश्वं पुरुषस्य तवैव शेषभूतमाजन्म=निसर्गतः ॥

185 முதன்மந்த்ரத்தின் பொருள்—ஏகோதக ஸமுத்ரத்தில் பிரமன் பிரம்மாண்டத்தையாள்வதற்கும் பகவானின் லீலாரஸத்திற்குமாக உலகம் படைக்கும் வ்யூஹபகவானுக்குப் பிறகு பிறந்து நின்றான் அவன் படைக்கும் வ்யஷ்டியையும் பகவானே படைத்துப்புகுகிறான். எல்லாம் அவனுக்கு இயற்கையாக சேஷமாம்.

हार्दस्सन्नन्तरात्मा निखिलपतिरसि त्वं स्वकर्मोत्थजन्मा-
ह्यस्पृष्टोऽप्यन्तरेवं बहिरपि बहुधा जायसे श्रीनिवास !
प्राज्ञास्ते तत्र हेतुं विदुरनघ ! नतत्राणदिव्यावतार-
स्वैरोद्युक्तत्त्व, ये ते निरुपधिकयशोभातमिच्छन्ति धाम ॥ १८६ ॥
देवेभ्यस्त्वं पुरस्सन् हित उदितवपुः पूर्वदेवान् तपन् स्याः
तद्द्वारा तद्धितश्च श्रितरम ! महितं तेऽवतारे रहस्यम् ।

---

186 वेदाहमिति मन्त्रार्थः स्पष्टः। प्रजापतिरिति मन्त्रार्थ उच्यते—प्रजापतिः= निखिलपतिः गर्भे चरति अन्तः—हार्दस्सन् अन्तरात्मा भवति। अजायमानः= स्वकीयकर्मोपाधिकजन्मरहितः बहुधा= हार्दवत् बहिर्विभवरूपेण च जायते। तस्य योनिं =कारणं धीराः= प्राज्ञा जानन्ति। आश्रितपरित्राणादिविषयकेच्छयोद्युक्तत्वात्। मरीचीनां पदं= निरवधिकयशोभातधाम वेधसः—धीराः ये इच्छन्ति।

186 'ப்ரஜாபதி:' என்ற மந்த்ரத்தின் பொருள்- ஸர்வஸ்வாமியாய் எல்லோருடைய ஹ்ருதயத்திலும் அவதரிக்கிறான். ஜீவனைப் போல் கர்மாதீனமான பிறவியில்லாதவன். தானாகவே பிறவியுடையவன்; அதற்குக் காரணம் உலக நன்மையிலுள்ள நோக்கென்று ஞானிகள் உணர்வர். அவர்கள் புகழ் நிறைந்த பரமபதம் விரும்புகின்றவர்.

187 यो देवानां पुरः =प्रत्यक्षतो हितः। तदर्थं जातः। पूर्वदेवान्= असुरान् तपतीति तदर्थमपि। तन्मुखेन परोक्षतया असुर-

187 தேவர்களுக்காகச் சிந்திக்கிறாய். அவர்களுக்கு ஹிதமாகத் தோற்றுகிறாய் அசுரர்களுக்கும் பின்னை ஹிதமாகிறாய். கீதையில் நான்காம் அத்யாயத்தில்

दिव्यत्वञ्जन्मकर्मस्थितिमननपरो ह्यन्तिमप्रत्ययान्त-
प्रज्ञानिष्पत्तितस्त्वां व्रजति हतपुनर्जन्मकर्मेति गीतम् ॥ १८७ ॥
दिव्यं वेदाहमेतं मम भवतु नमो ब्राह्मरूपाय देवाः
यत् प्रादुर्भावयन्तः स्तुवत इति वदंस्त्वां श्रुतिः श्रीश ! वक्ति ।
भूस्ते लक्ष्मीश्च पत्न्यौ दिनमुखसमयो देवसंघश्च देहः
नक्षत्राणि प्रकाशः फलमखिलमदोऽन्यच्च संकल्पयेति ॥ १८८ ॥

हितश्च । गीतायां जन्मकर्मचेति श्लोके अवताररहस्यफलमुक्त-मुत्तरार्धं ।

அவதார ரஹஸ்யமும் அதன் அறிவுக்குப் பலனும் கூறப்பெற்றது. பக்தியோகம் விரைவில் பூர்ணமாய் பலன் பெறவாகிறதென்பது

188 वेद एवमाह—अहमेनं महापुरुषं वेद ; ब्रह्मसंबन्धिने ज्योतीरूपाय नमः । ब्रह्मरूपाविर्भावपराः देवाः स्तुवन्ति । एतद्विदो विप्रस्य देवा वशे । हे भगवन् ! भूःश्रीश्च ते पत्न्यौ, अहः रात्रिः अग्निमुखा देवाश्च ते देहाः । नक्षत्राणि त्वत्किरणाः । ऐहिकमामुष्मिकञ्च संकल्पयेति । एवं देवा अग्रे इत्यादेरर्थः ।

188 வேதம் ஓதுகிறது—நான் அப்புருஷனை யறிவேன். ப்ரஹ்ம ஸம்பந்தியான சோதி ரூபத்திற்கு எனது நமஸ்காரம் தேவர்கள் அவதரிப்பிக்கின்றவர்களாய் துதிக்கின்றனர் இதனை யறிந்த அந்தணனுக்கு தேவர்கள் வசமாவர். பூமிதேவியும் லக்ஷ்மிதேவியும் உனக்கு பத்னிகள். இரவு, பகல் தேவர்களெல்லாம் தேஹம், நக்ஷத்ரங்கள் உனது ஒளி. இம்மை மறுமைப் பலன்களை நீ ஸங்கல்ப்பிப்பாயாக என்றவாறு.

पुरुषसूक्तम्

सूक्तं तत् सर्ववेदेष्वपि परिपठितं पौरुषं यस्य हि त्व-
य्येकान्त्यं स्पष्टघुष्टं स्मृतिषु, तव मितं वैभवं यत्र सर्वम् ।
एतत् नारायणाख्याप्रथितमपि यथाऽम्भस्यपारे तथाऽद्भ्य-
स्संभूतश्चेति भागौ पुरुष उपनिषत्त्वस्तु लक्ष्मीश ! कोऽन्यः ॥१८९

शक्तिर्मस्तिष्कसाध्या जगति भवति या ज्ञानकर्माक्षजैवं

---

189 पौरुषं सूक्तं=पुरुषसूक्तम् । 'अम्भस्यपारे' इति प्रश्नः अद्भ्यस्संभूत इत्यनुवाकश्च यथा, तथा पुरुषसूक्तमपि नारायणनाम्ना प्रथितम् । नारायणाख्यर्षिदृष्टत्वादिव नारायणपरत्वाच्च । औपनिषदं पुरुषमिति च श्रुतिः। अतः पुरुषपदमुत्तमपुरुषासाधारणम्; पूर्वोऽस्मात् सर्वस्मात् । सर्वान् पाप्मन औषत्=अदहत् इति पुरुष शब्दार्थोऽयमेव ।

189 புருஷஸூக்தம் எல்லா வேதங்களிலும் படிக்கப்பட்டிருக்கும். இது நாராயணனையே சொல்வ தென்று ஸ்ம்ருதிகளில் விரிவாக உள்ளது. நாராயண வைபவம் இங்கே தெளிவாம், 'அம்பஸ்யபாரே' என்ற ப்ரச்னம் போலவும் 'அத்ப்ய: ஸம்பூத:' என்ற அனுவாகம் போலும் இதுவும் நாராயணமென்ற பெயர் உடையது. உபநிஷத்தும் புருஷபதத்தி னாலே வெகுவாக நாராயணனையே சொல்லும். எல்லோருக்கும் முன்னேயிருப்பவன், எல்லா வினை களையும் போக்குகின்றவன் என்ற பொருள் அவனு க்கேயாம்.

190 अथार्थ उच्यते—शीर्षाक्षिपादानां सहस्रत्वमुक्तम् ।

190 பகவானுக்கு ஆயிரம் தலையும் கண்ணும்

लक्ष्मीकान्त! ह्यनन्ता त्वयि धुतकरणापेक्षणे सा सदैव।
इच्छायां विश्वरूपं कलयसि च भवत्यादिसर्गेऽप्यनन्ते
शीर्षाद्यं ते ह्यमुख्यम्, तत इह गदितोऽनन्तशीर्षाक्षिपात् त्वम्॥
व्याप्य ब्रह्माण्डभूमिं दशगुणितजलाद्याविभक्तं तमो यत्
क्रान्तो द्रव्यं तदन्तं दशविधमसि तद् विश्वमेतत् त्वमेव।

वस्तुतः शरीरेन्द्रियानपेक्षे भगवति तदभावेऽपि सर्वशक्तिरस्तीति तेन ज्ञाप्यते इति एको निर्वाहः। शीर्षादं मस्तिष्काख्यमांसपिण्डपरम्। पुरुषे तस्य मुख्यत्वात्। अक्षीति ज्ञानेन्द्रियं पादिति सर्वकर्मेन्द्रियं गृह्यत इति। यद्वा सृष्ट्यारम्भे विराट्पुरुषे अनन्तशीर्षादिसत्त्वात् सहस्रशीर्षत्वादि। अथवा, द्यौर्मूर्धा चक्षुषी चन्द्रसूर्यौ इत्यादिकल्पनाया दर्शनात् तेषाञ्चानन्तत्वात् सहस्रशीर्षत्वादीति विविधा व्याख्या॥

காலுமென்றதற்கு, தலைமுதலானவை இல்லாவிடினும் ஆயிரம் தலைமுதலானவை உள்ளவன்போல் எல்லாம் செய்ய சக்தி வாய்ந்தவனென்று பொருள் கூறுவர் ஆதிஸ்ருஷ்டியில் விராட்புருஷனுக்கு எண்ணற்ற தலைமுதலானவையும் உண்டென்றும் கூறுவர். ஸ்வர்க்கம் தலை, சந்த்ரஸூர்யர்கள் கண்களென்றவாறு செய்த கல்பனையைக் கொள்ளலாமென்பர் சிலர்.

19 स भूमिमित्यादेरर्थ उच्यते। ब्रह्माण्डभूमिं व्याप्य दशांगुलमत्यतिष्ठत् पुरुषः। दशांगुलमित्यस्य दशगुणितं जलादिद्रव्यमित्यर्थः। कार्यकारणभावापन्नं दशविधद्रव्यमिति वा। ब्रह्माण्डा-

191 அப் புருஷன் ப்ரம்மாண்டத்தையும் அதனைச் சூழ்ந்து பத்துமடங்கு பெரியனவான

श्रीश ! त्वं षड्गुणान्नप्रतिकलकलितद्रेश्च मुक्तेः प्रदाता
बद्धास्ते पादमात्रं दिवि तु तप सदा सन्ति नित्यास्त्रिपादः ॥१९१
तस्माद् दिव्यात्मरूपे दिवि तव भवति त्र्यंशमीदृग्विधस्त्वं
किं चित्रं भोक्तृभोग्ये यदिह परिगतोऽस्यञ्जनेशानिरुद्धात् ।

वरणभूतजलाग्निवाय्वाकाशाहंकारमहदव्यक्ताक्षरविभक्त- अविभक्तयोरूपाणि दश स्थितानि। एवं व्याप्त्या विश्वं त्वमेव । उतामृतत्वस्येत्यादिरर्थः उत्तरार्धे। यत् अन्नेन = षड्गुणान्न भूतभगवदनुभवाद्वर्धते, तस्य मोक्षस्य प्रदाता। पादोऽस्य प्रकृतिसंबन्धिनो जीवाः। दिवि नित्याः अमृतपदवाच्याः पादत्रयम् ।

ஜலம் முதலான பத்து த்ரவ்யங்களையும் வியாபித்துக் கடந்திருக்கிறான். உலகமே அவன். ஆறு குணம் உள்ள அந்த சிறந்த அன்னத்திலல் மோக்ஷம் என்றும் மேன்மை பெறுகிறது ப்ரக்ருதி ஸம்பந்தமுள்ள ஜீவர்கள் கால்பாகமென்னும்படியும் பரமபதத்தில் நித்யஸூரிகள் முக்கால்பாகமென்னலாம்படியுமிருக்கிறார்கள்.

92 **अमृतपदेन परमात्मस्वरूपग्रहणेऽपि तस्य दिवि त्रिपात्त्वं उत्करोत्येव। एवं भोग्यभोक्तृभयपरिगतत्वमुक्तम्। अनिरुद्धरूपात्**

192 ஆக அம்ருதமென்று நித்யஸூரிஸமுதாயத்தைச் சொன்னதாம், பரமாத்ம ஸ்வரூபத்தைக் கொண்டாலும் அதற்கு மூன்று கால் பாகங்கள் நித்யஸூரிகளே, போக்தாக்களைப் பணித்தது போக்யத்திரும் குறிப்பாகும். भूत பதம் அசேதந விசிஷ்டசேதந பரம போக்ய போகோபகரணங்களே மூன்று அம்சங்கள் என்பதுமுண்டு. பகவானிடத்

त्वत्तोऽसौ पद्मयोनिर्जनिमधित विराट् तत्त एवं मनुर्यः
पश्चाद् भूमौ पुरस्तादपि लसति निजैः सर्वतः सृष्टिभेदैः ॥१९२

ब्रह्माण्ड चेद् विराट् स्यात्, अधिकृतपुरुषस्तत्र जातोऽस्तु धाता
त्वत्तो जातोऽनिरुद्धस्त्वमसि यदि, विराट् स्यात् तदाऽप्येष एषः।
ब्रह्मा श्रीमन्! विराट् चेत्, मनुवचनबलात् तज्जनिः स्यान्मनुः सः
व्यूहान् संकर्षणाद्यान् क्रमत उपगतश्चाण्डसृष्टिं तनोषि ॥१९३॥

परमात्मनः विराट्=चतुर्मुखोऽजायत । तस्मात् अधिकारिपुरुषो मनुः प्राक्प्रत्यगिदग्व्याप्त आसीत् स्वसृष्टनानाविधप्राणिमुखेन।
திலின்று (அநிருத்தனிடமிருந்து) ப்ரஹ்மா பிறந்தான் அவனிடமிருந்து மனு உலகத்திற்கு அதிகாரி பிறந்தான் பல ப்ராணிகளாகி எல்லா வகையிலும் ப்ராணிகளைப் படைத்து அவைவாயிலாகக் கிழக்கும் மேற்கும் எங்கும் மனு பரந்தான்.

193 अर्थान्तरमुच्यते। विराट्छब्देन ब्रह्माण्डमुच्यत इति भागवतादौ व्याख्यानम्। तदा विराज उपरि जातः पुरुषः ब्रह्मा स्यात्। विराट् स्वराट् संराडिति व्यूहमूर्तीनां ग्रहणमिति पक्षे विराट् अनिरुद्धः। ततो जातः एषः=पुरुषः एषः=धातैव। मनुस्मृत्यानुसारे, विराट्=ब्रह्मा। ततो जातः पुरुषो मनुः। अथ पादोऽस्येति अनिरुद्ध उच्यते; त्रिपादिति पादत्रयं वासुदेवादिव्यूहत्रयमित्यपि।

193 விராட் என்ற சொல்லுக்கு பிரம்மாண்டம் பொருள் அங்கு உண்டான அதிகாரி புருஷன் பிரமனுவான் என்பர் விராட் என்று வ்யூஹ மூர்த்தியைச் சொன்னாலும் அங்குண்டான புருஷன் பிரமனே விராட் பிரமனென்றால் புருஷ பதத்தினால் அவனிடம் பிறந்த மனுவை மனுஸ்ம்ருதியின் படி

अग्नीन्द्रादीन् वृषाद्रीश्वर! सृजति भवान् यज्ञक्लृप्तेः परस्तात्
देवाः साध्यादयश्च व्यदधुरिह मखं प्रागितीदं विमृश्यम् ।
अक्षाद्यं देवशब्दाद्यभिहितमजसंबन्धि मन्यन्त एके
मन्ये पूर्वेऽपि केचित् कतिचन कथिताः स्युश्च यज्ञात् परस्तात्॥
इन्द्रो देवा मनुश्चर्षयश्च इह मनुपुत्रादयो ये विभिन्नाः

संकर्षणप्रद्युम्नानिरुद्धाः संहारसृष्टिस्थितिकर्तार इति श्रीपाञ्चरात्रम्। अतो विराट्पदेन व्यूहग्रहणं युक्तमेव। सोऽनिरुद्ध इह पादः।

யில் கொள்ளலாம். ஸங்கர்ஷண ப்ரத்யும்நாநிருத்த மூர்த்திகள் ஸம்ஹார ஸ்ருஷ்டி ஸ்த்திதிகளுக்குக் காரணமாகையால் அநிருத்தனைக் கொள்வது தகும்.

194 चतुर्मुखस्य सृष्टिसामर्थ्यसंपत्त्यर्थं यागं देवाः साध्या ऋषयश्चाकुर्वन्निति कथम्। सामर्थ्यप्राप्त्यनन्तरमेव तेषां सृज्यत्वादिति शंका। तत्रैकः परिहारः—देवादिशब्देन चतुर्मुखसंबन्धीन्द्रियादय उच्यन्त इति। परिहारान्तरमूह्यते मन्य इत्यादिना। ब्रह्मा विद्यमानसामर्थ्यानुगुणं कांश्चिद् देवादीन् सृष्ट्वा तन्मुखेनेष्ट्वा पूर्णसामर्थ्यमन्यदेवादिसृष्टियोग्यं लेभे इत्यपि भवति।

194 சதுர்முகயாகத்தை தேவஸாத்ய ரிஷி கணங்கள் செய்தார்களென்னலாமோ. அவர்கள் யாகத்தின் மூலம் ஸாமர்த்தியம் பெற்றுதானே பிறப்பிக்கப்படுவாரென்னில்—ஆம். தேவாதி சப்தத்திற்கு பிரமனின் இந்த்ரியாதிகள் பொருளென்பர். இனி, பிரமன் முதலில் தன் சக்திக்குத் தக்கவாறு சில தேவாதிகளைப் படைத்து யாகம் செய்து மற்ற தேவாதிகளைப்படைக்க வல்லமைபெற்றாரென்னலாம்.

195 ஒவ்வொரு கல்பத்திலும் இந்த்ரன்

तत्तन्मन्वन्तरेऽत्र प्रथममभिहितास्तत्र केचिद् भवेयुः ।
स्रष्टा पूर्वं प्रयस्य स्वयमपि विहितानेकसर्गः स्वशक्तेः
वैकल्यं वीक्ष्य खिन्नस्तत्र यजनविधौ व्यापृतः श्रीश ! यत् स्यात् ॥
यद्वा नानास्त्रभूषे त्वयि वृषशिखरिद्योतिरूप ! प्रथन्ते
ये ते तत्त्वाभिमानात् ऋषय इति सदाप्राप्यभावाच्च साध्याः ।
नित्या देवास्त्वदीयाः त इह विधिमुखाशक्तिदृष्ट्या तदर्थं
साक्षाद्वा तन्मुखाद्वा व्यदधत मखमित्यस्तु कस्तत्र दोषः ॥१९६॥
आदावाज्याद्यभावात् सुदलतरुमुखः क्लृप्त आज्यं वसन्तः
ग्रीष्मश्चेध्मोऽतिशोषी हविरपि नवधान्यागमार्हा शरत् सा ।

தேவர் மநுரிஷிகளெல்லோரும் வெவ்வேறு படைக்கப்படுகின்றனர். அவ்வாறு சிலர் முன்னே தன் சக்தியால் படைக்கப்பட்டிருக்கலாம்.

196 अथवा विष्णुपुराणे अस्त्रभूषणाध्याये उक्तरीत्या अस्त्रभूषणरूपनित्यसूरयो देवाः भविष्यद्देवाभिमानिनः । त एव प्राप्यत्वात् साध्याः, ज्ञानित्वात् ऋषय इति । ते एव चतुर्मुखस्य शक्तिजननाय स्वयं वा तन्मुखेन वाऽयजन्तेति ।

196 விஷ்ணுபுராணத்தில் அஸ்த்ர--பூஷணாத்யாயத்திற் கூறியபடி அபிமானி தேவதைகளான நித்ய ஸூரிகளே தேவர்கள் யாகம் செய்தவரென்னலாம்.

197 वसन्तोऽस्यासीदाज्यमित्याद्यर्थ उच्यते । सृष्ट्यारम्भे आज्यादेरभावात् वसन्त आज्यत्वेनोक्तः तत्र वृक्षादीनां पल्लवादि-

197 அப்போது நெய் இல்லாமையால் அதற்குக் காரணமான பாலை யுண்டும் தளிர்கள் நிறைந்த வஸந்த காலமே ஆஜ்யமென்றது. ஸமித்து உலர்

चत्वार्यक्षाणि चान्तर्दश च महदहङ्कारभूतानि देह-
स्थानि त्रिःसप्त मन्ये बहिरपि महदादीनि लक्ष्मीश! सप्त ॥१९७
ब्रह्मादिः पूर्वजातः पुरुष इह हविः कल्पितः तत्प्रसन्नो
भूयो यज्ञं व्यधास्त्वं श्रितरम! पृषदाज्यादि यज्ञोपयुक्तम्।
तेनाप्याराधितस्त्वं तदनु निजशरीरांशदेशाद् व्यतानीः
वेदान् अश्वादिकान् नॄन् विधुमुखकरणाद्यधिदेवांश्च लोकान्॥

मत्वात्। इध्मानां ग्रीष्मेणैव शुष्कतापत्तिरिति ग्रीष्म इध्मः। शरदेव नवधान्यप्राप्त्या शरत् हविरुक्ता। त्रिःसप्त=एकविंशतिः समिधः का इति चेत्—चतुर्दशाक्षाणि महदहंकार भूतपञ्चकानि च देहान्तस्स्थानि। देहबहिर्गतानि महदहंकारभूतपञ्चकानि सप्तास्या-सन् परिधयः।

வது க்ரீஷ்மத்திலாகையால் க்ரீஷ்மமே ஸமித்து. ஹவிஸ்ஸுக்கான தான்யங்கள் சரத்ருதுவிலாகையால் சரத்காலமே ஹவிஸ்ஸாம்; 21ஸமித்துக்களா 14இந்த்ரியங்களும் தேஹத்தினுள்ளிருக்கும் மஹத்வன—அஹங்கார பஞ்சபூதங்களும். ஏழு பரிதிகள் வெளியிலுள்ள மஹத் அஹங்கார பஞ்சபூதங்களென்றுகொள்க.

198 'यत् पुरुषेण हविषा इत्युक्तः पुरुषो ब्रह्मादिस्तदा स्थित एव। पृषदाज्यं (दधिमिश्रमाज्यं) भगवता संकल्पेन कल्पतमस्तु।

198 அப்போது ஹவிஸ்ஸான புருஷன் சதுர்முகாதிகளில் ஒருவனுகலாம். ப்ருஷதாஜ்யமென்ற த்ரவ்யம் பகவானுல் படைக்கப்பட்டிருக்கலாம். அதாவது தயிர் கலந்த நெய். ஆராதனத்தின் பிறகு பகவான் தனது மேனியினின்று வேதம் குதிரை

अज्ञातानेकसर्गोचितपथमखिलाम्नायहीनं कथञ्चित्
यज्ञेनाराध्य लक्ष्मीहयवदन ! वृषाद्रीश ! संपन्नवेदम् ।
तं त्वं त्वच्चिन्तनाभ्यादित इव बहुधा स्वाङ्गतोऽन्यानि सृष्ट्वा
नानासर्गे नियुङ्क्षे स्वयमपि विशास ज्येष्ठपुत्रं तथाऽन्यान् ॥१९९

संज्ञामूर्ती त्रिवृत्कृत् त्वमिह कुरुष इत्येष निष्कम्पितोऽर्थः
किन्तु ब्रह्मान्तरात्मा कुरुष इति विधेः स्पष्टतार्थेऽभ्यधायि ।
विस्पष्टे त्वत्कृतत्वे किमिति विधिरिह स्यात् प्रवेश्यस्तदेष
श्रीश ! त्वत्सृष्टभिन्नं सृजतु निजनिशान्तेषु चाज्ञादशेषम् ॥२००॥

तदाराधनानन्तरं भगवान् स्वशरीरांशतः वेदाश्वादिकं चन्द्रादि अभिमानिदेवताश्च ससर्ज ।

முதலானவற்றையும் சந்த்ராதி தேவர்களையும் படைத்ததாம்

199 पुरुषसूक्तोदिता विविधसृष्टिः परमात्मैककर्तृका वा चतुर्मुखकर्तृका वेत्यत्र विवादोऽस्ति । सर्गमार्गानभिज्ञं वेदविहीनं ब्रह्माणं वेदं प्रापय्य, एवमेवं सृजेति नानावस्तु मातृकारूपेणाऽऽदौ सृज्यते परमात्मना । यथा ब्रह्मा नाभ्यादितः साक्षादुत्पाद्यते तद्वदिति कश्चित् पक्षः । कल्पभेदेन चतुर्मुखस्य विभिन्न भगवदंगत उत्पत्तिः स्तोत्रभाष्यादौ द्रष्टव्या ।

199 புருஷஸூக்தத்தில் பணிந்த ஸ்ருஷ்டி யெல்லாம் பிரமனைப் படைப்பது போல் பகவானே செய்த படைப்பாகலாம்.

200 चतुर्मुखकृत व्यष्टिसृष्टावप्यन्तर्यामितया परमात्मा कर्तेति संमतम् । आदौ साक्षादेवास्तु । स्वारस्यभंगायोगात्

200 பிரமன் படைப்பதிலும் பரமாத்மா கர்த்தா. முதலில் பரமாத்மா படைத்துக் காண்

वेधाः श्रीधामवक्षः ! प्रभवति भवता नाभिनालीकसूतः
कल्पारम्भे महाम्भस्युपरि हि धरणौ स्थापितायां कृते च ।
तत्तल्लोके विधातुम् , तदुपकारियं युज्यतेऽस्याऽऽदिसर्गे
यद्वा तद्द्वारतस्त्वं सृज सकलमिदं सोऽपि ते शक्तिभूमा ॥२०१
प्रारम्भे प्रब्रवंस्त्वां पुरुष इति विराट्सृष्टिमुक्त्वाऽऽह जीवं
श्रीधामन् ! ब्रह्ममुख्यं पुरुषमथ मनुष्यादिदेह यदेवम् ।
तस्मादन्ते महान्तं पुरुषमिति विशिष्याऽऽह पुंसूक्तमेवं
त्वत्तो ब्रह्माऽश्ववक्त्रादधिगतमहिमेत्यादिमेष्टाऽस्यसृष्टिः ॥ २०२ ॥

तर्हि ब्रह्मा कदा करोतीति चेत्—मातृकादर्शनानन्तरम् आप्रलयम् । निजनिशान्तेषु-स्वकीयदिनेषु स्वशरीरात् ।

பிக்க அதுபோல் பிரமன் பிறகு தன் கல்ப்ப காலங்களிலே படைப்பதாகும்.

201 यद्वेत्यादिना सृष्ट्यारम्भेऽपि व्यष्टिसृष्टिः सर्वा चतुर्मुखस्यैवेति सौबालव्याख्यानुसारी पक्ष उच्यते ।

201 பூமியைக் கடலில் மேலே மிதக்கும்படி நிறுத்தி, உலகங்களையும் பகவான் படைத்த பிறகு பிரமன் எல்லாம் படைக்கலாம்படி முதலில் பரமாத்மா படைக்கலாம் இனி முதலிலும் பிரமனின் படைப்பே ஸ்ருஷ்டி யெல்லாமென்றாலும் இருக்கட்டும்.

202 முதலில் புருஷபதத்தினால் பரமாத்மாவைச் சொல்லி மேலே பிரமனையும் மானிட வுருவையும் புருஷபதத்தினால் சொன்னதால் மேலே 'மஹாந்தம் புருஷம்' என்று அடைமொழியைக் கூறிற்று. அநிருத்தன் குதிரைமுகனும் பிரமனின் மேன்மைக்

पुंसूक्तं मुद्गलाख्योपनिषदि विवृतम्, तेन ते श्रीश! भूमा,
चातुर्व्यूह्यं चतुष्पात् प्रकृतिपुरुषयोरुद्भवश्चानिरुद्धात्।
ध्यानात्मा सृष्टियज्ञो विधिकृत इदमक्षाणि यष्टार एवं
सृष्टेस्तस्योपदेष्टा यजनभुगनिरुद्धोऽयमित्यादिरुक्तः ॥ २०३ ॥
ईदृक्षं त्वां महान्तं दिव पुरुष! नमःपारदेशे विभान्तं
सूर्याभं नामरूपे विदधतमवयन् श्रीश! यज्ञैर्विशुद्धैः।
दृष्ट्वा सर्वान्तरं त्वाममृत इह भवद्वेदनादेव देशं
नित्यैर्जुष्टं तमेति त्वदनुभवरतब्रह्मशक्रादितुल्यः ॥ २०४ ॥

குக் காரணமானதால் குதிரையின் ஸ்ருஷ்டியை முதலிற் கூறிற்று.

203 **मुद्गलोपनिषदि पुरुषसूक्तव्याख्यानम्—'चतुष्पात्' इति चातुर्व्यूह्यम्; प्रकृतिपुरुषयोरनिरुद्धव्यूहादुत्पत्तिः, अत्रोक्तो यज्ञो न कायिकः, किंतु भावनारूपः। देवाश्च यष्टारः इन्द्रियाणि। सृष्ट्युपदेष्टा चानिरुद्ध इत्यादिर्भूमा उक्तः ॥**

203 முத்கலோபநிஷத்து 'புருஷஸூக்தத்திற்கு வியாக்யானமாகும். இதில் நாலுபாதங்களாவன நாலுவ்யூஹங்கள் பிரமனின் யாகம் த்யான ரூபம். இந்திரியங்களே அந்த யாகத்தைச் செய்த தேவர்கள். அநிருத்தன் அச்வமுகனாய் ஸ்ருஷ்டியை உபதேசித்தான் என்றவாறு கூறப்பெற்றது

204 **वेदाहमेतमित्यस्यार्थ उच्यते**—*தமஸ்ஸ: என்ற பிரக்ருதிக்கு மேலே ஸூர்யவர்ணமாயிருக்கும் மஹா புருஷனை யறிகிறேன்.* (**अवयन्**) *அறிகிறவன் நிஷ்காம யஜ்ஞத்தினால் ஆராதித்து உபாஸித்து இங்கே அம்ருதனாகிறான்-பாபங்களினின்று விடுபட்டவனா*

यज्ञं विष्णुं भवन्तं कृतयुगकलिता ये त्वदेकार्थयज्ञाः
तत्तच्छब्दोदितं तैरयजत परमैकान्तिधर्मैः सुरौघः ।
शीर्षाद्यानन्त्यशाली श्रितरम! भुवनात्मा चतुष्पात् विराडा-
द्याधाता धातुरर्थे कृतजगत् अनघज्योतिरत्रासि वेद्यः ॥ २०५ ॥
कालेऽर्चिर्घस्रशुक्लोत्तरगमन-समा-वायु-सूर्याब्जविद्यु-
त्पाथोनाथेन्द्रवेधोगमितम् अनुगतं वैद्युतामानवेन ।

கிறுஇய் பகவானை யனுபவிக்கும் பிரமன் இந்திரன் முதலானோரைப் போல் விளங்கி साध्याः देवाः என்னப் பட்ட நித்ய ஸூரிகளோடு கூடிய பகவானை யனுபவிக் கிறுன்.

205 यज्ञेन यज्ञमयजन्त देवा इत्यस्यार्थ उच्यते ।

205 க்ருதயுகத்தில் செய்கின்ற வண்ணமான சுத்தமான மந்த்ரங்களைக் கொண்டு தேவர்கள் பக வானை யாராதித்தனரென்றது முடிவில் புருஷ ஸூக்தத்தில் உபாஸிக்கப்படும் குணங்களாவன ஆயிரக்கணக்கான தலை முதலானவற்றை யுடைய வன் இத்யாதிகளென்கிறது உத்தரார்த்தம்.

206 परविद्याः प्रदर्शिताः। तन्निष्ठानामर्चिरादिगत्या भगवता क्रियमाणं परमपदप्रापणमुच्यते। काले - प्रारब्धावसानावसरे । अर्चिरादयो वेधोन्ता आतिवाहिकाः अग्निः अहः शुक्लपक्षः उत्तरायणं

206 பரவித்யைகள் குறிக்கப்பெற்றன. இவ் வித்யையை யனுஷ்டித்தவனை, ப்ராரப்தகர்மாவின் முடிவுகாலத்தில், அர்ச்சிராதி மார்க்கத்தாலே ப்ர க்ருதியைக் கடக்கச் செய்து, விரஜையின் கரை யில் ப்ரக்ருதி மண்டலத்திலேயே ஸூக்ஷ்மதேஹ

अव्यक्ते त्यक्तसूक्ष्मं व्यतिगतविरजं ब्रह्मदेहं विभूष्य
श्रीमन्! आनाय्य भक्तं श्रितपदमथ संभाष्य सायुज्यदोऽसि ॥२०६
छान्दोग्येशाख्य शुभ्राश्वतरकठशिखामुण्डकप्रश्नमुख्ये
प्रायः पुंसूक्तवत् त्वं पुरुष इति पदोक्तोऽसि विष्णुः कठादौ ।
सौबाले तैत्तिरीयादिषु च महति च श्रीश! नारायणाख्यः
ख्यातोऽसि ब्रह्मबिन्दौ वृषशिखरिपते! वासुदेवः सुदेवः ॥२०७॥

संवत्सरः वायुः सूर्यश्चन्द्रः विद्युत् (वैद्युतः) वरुण इन्द्रः प्रजापतिरिति द्वादश । अव्यक्ते = प्रकृतिमण्डले विरजातीरे सूक्ष्मदेहं त्यक्तवन्तं ब्रह्मदेहम् = ब्रह्मदेहसमानदेहविशिष्टम् विभूष्य अप्सरोद्वारा ब्रह्मालंकारैरलंकृत्य ।

த்தை விட்டு விரஜையைக் கடந்து அப்ராக்ருத தேஹம் பெற்றவனை ப்ரஹ்மாலங்காரங்களால் அலங்கரிப்பித்துத் தன் திருவடியை அணுகுவித்து ஸல்லாபம் செய்து ஸாயுஜ்ய மளித்தருளுகிறான்.

207 उपनिषदो विष्णुपारम्यदर्शिन्य इत्युच्यते— छान्दोग्ये श्वेताश्वतरे कठे अथर्वशिखायां मुण्डके प्रश्नेऽन्यत्र च पुरुषपदं प्रयुज्यते । तच्च, भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च ते वर्तें वासुदेवे सनातने इति भगवच्छब्दवत् सर्वैकरूपरूपपरवासुदेवपरत्वेन प्रसिद्धम् । कठवल्ल्यादौ विष्णुशब्दोऽपि ।

207 உபநிஷத்துக்களில் சாந்தோக்யாதிகளில் புருஷபதம் உள்ளது. அதற்குப் பரவாஸுதேவன் பொருளென்று ஸ்ம்ருதியில் சொல்லப்பட்டது. கடாதி யுபநிஷத்தில் விஷ்ணுபதமே யுள்ளது. ஸுபாலோபநிஷத்து முதலானவற்றில் நாராயணபதம் - ப்ரஹ்மபிந்துவில் வாஸுதேவபதம்-ஆகையால் விஷ்

द्वात्रिंशत् सन्ति विद्यास्तत्र पदभजनेऽत्रेति भूयान् प्रवादः
वेदेऽनन्ते तदर्थे त्वयि बहुजननेऽनन्तकल्याणपूर्णे ।
संख्याने कः समर्थः ; स्वयमिह नतरामद्य निष्कर्षशक्तिः ;
भीष्मान्तो भक्तियोगो भुवि बत यदि वा श्रीश ! नाथान्त एषः ॥
एकैवाऽऽद्यन्तमेकं प्रकरणमिति या नाचिकेताख्यविद्या
तन्मध्ये केचिदल्पप्रमितमुखवचस्त्वाहुरन्यान्यविद्याम् ।

ब्रह्मविन्दो वा सुदेवपदम् । अतो भूयस्त्वान्यायात् नारायण एवौपनिषदपुरुषः ।

ஞுவைக்கூறும் உபநிஷத்துக்களே பெரும்பாலும்

208 இனி ப்ரஹ்மத்யை எத்தனை என்கிற விசாரம் 32 வித்யை என்று பரம்பரையாகச் சொல்லுகிறார் வேதம் அனந்தம். அதன் பொருளான பகவானுடைய மூர்த்திகள் பர-வ்யூஹாதிகள். அவை குணங்களும் அனந்தம் பரவ்யூஹாதிகளெல்லாம் மோக்ஷம் தருமவை. இப்படியிருக்க 32 என்ற வரையிட வொண்ணுதென்றே தோன்றும். ஆராய்ந்தாலும் அதிகமே காண்கிறன. பக்திமார்க்கம் இது தான் என்று நிஷ்கர்ஷம் இப்போது செய்ய வியலாது. பீஷ்மரோடு ஜ்ஞானம் போய்விட்டது. அல்லது நாதமுனிகள் பக்தியை யனுஷ்டித்திருப்பதால் அது வரையில் பக்தியோக முறை தெரிந்திருந்த தென்னலாம். மேலே அதற்குத் தொடர்ச்சியில்லை.

209 अथ त्रिभिः श्लोकैः कतिपयविद्यापार्थक्यं नेत्युच्यते । कठोपनिषदुक्ता नाचिकेतविद्या आदित आन्तमेकप्रकरणमिति एके-

209 மூன்று ச்லோகங்களால் சில வித்யைகள் வெவ்வேருகா என்னப்படுகிறது. கடோபநிஷத்தில்

यां विद्यां चीर्णशीर्षव्रतनियमविधिर्नैव भिन्तेऽक्षराख्यां
ताञ्चान्यां केऽपि गार्ग्यक्षरमतित इति श्रीश ! किं युक्तमेतम् ? ॥
ज्योतिर्ज्योति र्द्वयमन्त्वं महितरम ! ततः पाञ्चजन्याश्रयोक्तिम्
प्राणादिप्राणतादेर्वचनमपि विभिन्नार्थताभ्रान्तियोग्यम् ।
मत्वा व्यासोऽसुसूत्रद् विनिगमकमुशन् एकवाक्यत्वरूपं
यं ह्यर्थम् , तं तदन्यं त्वपि वदति तव ज्योतिषांज्योतिरुक्तिः ॥२१०

वेति भाष्यादितोऽप्यवगम्यते। तत्र अत्राधिकरण-प्रमिताधिकरण-रूपानेकाधिकरणविषयवाक्यभेदमात्रेण विद्याभेदं केचिदाहुः। तथा मुण्डके शिरोव्रतं यैश्चीर्णं तैरेव तद्वेदस्याध्येयत्वेऽपि तत्रोक्ता, बृहदारण्यगार्गिब्राह्मणोक्ता च विद्यैकैकेति तृतीयतृतीयप्रथमे स्थितत्वेऽपि भेदं मन्यते। ईदृशो भेदो न कल्प्य इत्यर्थः।

நாசி கேத வித்யை யொன்றே அடியினின்று முடி வரையில். ஆகையால் அத்ராதிகரணம் ப்ரமிதாதிகரணமென்று அநேகாதிகரணத்தில் விசாரித்ததைக் கொண்டு வித்யை வேறென்னலாகாது; இவ்வாறே முண்டகத்திலும். முண்டகாக்ஷரவித்யையும் கார்கி ப்ராஹ்மணாக்ஷர வித்யையுமொன்றென்றது 3 3.1. அதிகரணம். ஆகையால் அங்கு பேதம் தகாது

10 ज्योतिषां ज्योतिर्विद्येति काश्चिदाहुः। बृहदारण्यके ज्योतिषां ज्योतिः, पञ्च पञ्च जनाः, प्राणस्य प्राणमिति मन्त्रत्रयमेकार्थकमिति संख्योपसंग्रहाधिकरणे निर्णीतम्। परिष्कारोऽपि

210 ஜ்யோதிஷாம் ஜ்யோதி என்று ப்ருஹதாரண்யகத்திலுள்ளது அங்கே இந்திரியங்களுக்கு நிர்வாஹகனென்று பொருள்—दहरविद्या ஸந்தர்ப்பத்தில் அது முண்டகத்தில் உள்ளதற்கு ஸௌர்யா

विद्या देवादिजुष्टा प्रकृतविसदृशी ज्योतिषां ज्योतिराख्या
ब्रह्मप्राबण्यसिद्ध्यै श्रितरम! कथिता मध्य इत्याशयीरन् ।
पुंविद्या तैत्तिरीये कथमपि न पृथग्भावमाप्नोति काम्या-
स्त्वादित्याकाशमुख्यास्तदिह न गणनं तत्तत् अत्यन्तहृद्यम् ॥२११
काम्याऽकाम्यात्मिका वा त्वयि भवतु मतिर्दृष्टयदृष्टयात्मिका वा
या इष्टाः ब्रह्मसूत्रे ष्विह तत इतराश्चापि विद्यास्त्रयीष्टाः ।

द्रष्टव्यः । मुण्डके ज्योतिषां ज्योतिरात सूर्यादिज्योतिरतशयि-तत्त्वदर्शि । प्रथमं दहरविद्याप्रकरणे । द्वितीयमक्षरविद्याप्रकरणे । अतः पृथग्विद्या न स्यात् ।

திஜ்யோதிஸ்ஸுக்கும் சோதியென்று பொருள். அங்கங்கு அக்ஷரவித்யாதிகளின் இடையிலிருப்பதால் தனி வித்யையாகாதென்று தோன்றுகிறது.

211 'तं देवा ज्योतिषं ज्योतिः' इति देवोपास्यतयोक्तत्वात् इदं वाक्यं प्रकरणात् पृथक्कृत्य पृथग्विद्यापरमस्त्विति चेत्—कामस्तु । तैत्तिरीयपुरुषविद्या न पृथग्विद्येति अधिकरणसिद्धम् । आदित्य-विद्या, आकाशविद्या प्राणविद्या च कैश्चित् परिगणिता दृष्टिरूप-त्वात् न मुक्तिविद्या ।

211 தேவர்களால் உபாஸிக்கப்படுமது ஜ்யோதிர்வித்யை வேறுதானென்றால் இருக்கட்டும். ஆயினும் தைத்திரீய புருஷவித்யை வேறாகா, சாந்தோக்ய புருஷவித்யை, ஆகாசவித்யை ஆதித்ய வித்யை. ப்ராணவித்யை இவையெல்லாம் முக்திக்கான வித்யைகளல்ல. ஆக பரவித்யையில் இவை சேரா.

212 अथ काम्या वा स्यात् अकाम्या वा दृष्टिरूपा वाऽन्या

212 காம்யமோ வேறோ த்ருஷ்டி ரூபமோ, தத்

शङ्के शारीरकोदाहृतविषयवचोमात्रमाद्यन्तमालो-
डचैता द्वात्रिंशदुक्ताः कथमपि बृहदारण्यकान्तश्रुतीर्वा ॥ २१२ ॥
इत्थं पुंसूक्तविद्याद्यनवधिनिगमोपज्ञविद्यैकलभ्यं
विख्याते ताण्डिकार्षीनक्विनलवकराद्युक्तनानाविशेषैः ।
दिव्ये धाम्न्यनन्ते सह सरसिजया भ्राजमानं भवन्तं
सन्तोऽद्य श्रीश ! गन्तुं द्रुयकरणभरन्यासविद्यां गृणन्ति ॥२१३॥

वा । परमात्मविषयकत्वे परावद्यैव ब्रह्मसूत्रोक्ता उपनिषद्दृश्यमाना अन्या चेति चेत्—अस्तु तथा । द्वात्रिंशदिति संख्या न घटते । इदं तु चिन्त्यम्—ब्रह्मसूत्रे विचारिता विद्याः द्वात्रिंशदिति । यद्वा दशोपनिषन्मात्रगताः विद्यास्तथेति । एतद्विवेचनमन्यत्र भूमिकायां कृतं द्रष्टव्यम् ।

துவ ஜ்ஞானமோ ; எதெனுமாகுக. பரமாத்ம விஷய மாளுல் பரவித்யை ; ப்ரஹ்ம ஸூத்ரத்தில் அத்தகைய வித்யை 32 விசாரிக்கப்பட்டிருக்கலாம், அல்லது பத்து உபநிஷத்தில் மட்டும் உள்ளவை 32 ஆகலா மென்று மாராய்க வேறிடத்தில் பூமிகையில் இதை விரித்துக் கூறியுளோம்.

2. भरन्यासविद्या प्रस्तूयते—पुरुषसूक्तादिविहितनानाविधभक्तिमार्गो गम्यः । तस्य दिव्यधामादि श्रीदेवी । असंख्याः परिजनपरिकरा इत्यादिकं छान्दोग्यादिबहूपनिषत्सिद्धम् । अद्यत्वे तु

213 இத்தகைய பரவித்யைகள் பல, அடைய படும் பகவானுடைய நித்யவிபூதி திவ்யமஹிஷீ பரி ஜநம் பரிகரமெல்லாம் சாந்தோகயாதிகளில் ப்ரஸித் தம். நமக்கு பக்தியோகாதிகாரமில்லை யாகையால் ந்யாஸவித்யையென்ற ப்ரபத்தி இப்போது ஆதரிக

पूर्णस्त्वं नित्यबन्धः पर इह निखिलानुग्रहेदम्परस्सन्
व्यूहं यातोऽवतारं विभवमपि हृदन्तःस्थमर्चामयञ्च ।
कारुण्यैकान्तधामन्! कलिकलुषहृदो वेङ्कटाद्रौ स्थितोऽस्मिन्
पासि प्रख्यापितात्मा शरणमुपयतः श्रीश! विश्राणितेष्टः ॥२१४॥
प्रज्ञा चर्या विरक्तिः परमतनिकृतिः स्वात्मसिद्धान्तरक्षा
निर्दुष्टस्पष्टहृद्यव्यवहृतिरपि यं ह्यञ्जसोपाश्रयन्त ।
सोऽयं श्रीरङ्गरामानुजमुनिरनघस्तद्गुरुस्तद्गुरुद्याः
सन्तोऽन्ये च त्वदङ्घ्रिप्रवणधियि मयि श्रीश! सन्तु प्रसन्नाः ॥

मंत्रयोगस्याशक्यतया न्यासविद्या संप्रदाय आगतः । तैत्तरीयादिप्रसिद्धेयम्। परं तु द्वयाख्यः करणमन्त्रः अन्योपनिषदादि प्रमाणान्तरमूलः ।

கப்படுகிறது அதற்கு ஸம்ப்ரதாயாதிகளிலுள்ள மந்த்ரம் த்வயமெனப்படும்

.. 4 इयं न्यासविद्या कलयुगदेवेन श्रीनिवासेन पाणिमुद्रया सम्यक् प्रदर्श्यते ।

214 கலியுக தெய்வமான திருவேங்கடமுடையான் தெரிவிப்பதும் இந்த ப்ரபத்தியே

.15 अथ स्वमाक्षादाचार्याणां प्रभावमुपवर्ण्य सर्वाचार्यसर्वभागवतानुग्रहोऽपि भगवति प्रार्थ्यते ।

215 ஜ்ஞானம் வைராக்யம் அனுஷ்டானம், பிறமத நிராகரணம் தம் ஸித்தாந்த ரக்ஷணம் என்பவற்றோடு, குற்றம் குறையற்றதும் விசதமாயும் மனத்துக்கு ப்ரியமுமான வ்யவஹாரம் என்ற போன்ற மேன்மைகள் எங்கு படர்ந்து ஓங்கி வளம் பெறுகின்றனவோ, அவ்வாசார்யன் ஸ்ரீமத்ரங்க ராமானுஜமஹாதேசிகன். அவரும் மற்ற மஹான்களும் அருள் புரிபவராகுக

यो यं तर्कार्णवाख्यां, बिरुदमनुपमं पूर्वतन्त्रादिकेऽपि
प्राप्य प्रौढनानाकृतिकरणयशाश्चासि हृष्टोऽद्य स त्वम् ।
वीरश्रीराघवं श्रीपरिबृढ ! कृपया प्रेर्य तं भ्राजते माम्
इत्थं वेदान्तपुष्पाञ्जलिविहितनिजप्रीतिभूमाभिरामः ॥ २१६ ॥

श्रीरस्तु

---

216 शिरोमणिविरुदसमनन्तरप्राप्ता तर्कार्णव इत्याख्या । अथ पूर्वमीमांसोत्तरमीमांसादिष्वपि अनुपमबिरुदप्राप्तिरासीत् । तर्के मीमांसायां वेदान्ते साहित्ये च नाना कृतयःकृताः । सर्वमिदं स्वयमेव कृत्वा हृष्टो भगवान् भवान् श्रीनिवासः संप्रति वेदान्तपुष्पाञ्जलिं कारयित्वा ततोऽतिशयितया प्रीत्याऽभिरामो लक्ष्यते ।

216 அடியேனுக்குத் தர்க்கார்ணவமென்ற பெயரையும் பூர்வோத்தர மீமாம்ஸாதிகளில் வேறு பிருதங்களையும அளித்துப் பல ட்ரௌட சாஸ்த்ர க்ரந்தங்களை இயற்ற சக்தியளித்து உவந்த ஸ்ரீ நிவாஸ ஞன நீயே இப்போது உபநிஷத்துக்களிலுள்ள விசேஷங்களைத் தன்னிடத்தில் நன்கு பொருந்தச் செய்ய வேதாந்த புஷ்பாஞ்ஜலி என்ற இந்த க்ரந்தத்தை இந்த வீரராகவனென்ற அடியேன் மூலமே யியற்றிச் சிறப்பான உவப்பு தோற்ற விளங்குகிருய்.

श्रीरस्तु । शुभमस्तु

इति श्रीमदभिनवदेशिककृतिः वेदान्तपुष्पाञ्जलिः

ஸ்ரீ அபிநவதேசிக (உத்தமூர்) திருமலை நல்லான்
சக்ரவர்த்தி வீரராகவாசார்யரின் வேதாந்த
புஷ்பாஞ்சலி க்ரந்தம முற்றும்.

श्रीनिवासपरब्रह्मणे नमः

—o—o—

परविद्यापरिगणनपरीक्षणम्

विद्या नाम विधिचोदितो ज्ञानविशेषः। त प्रतिपादकशब्दराशेरपि ताच्छब्द्यमुपचारादित्यन्यदेतत्। सा च मुक्त्यर्था भुक्त्यर्था चेति द्वयी। आद्या ब्रह्मविद्यैव मुख्या तत्त्वार्थगोचरा। अन्या पुनः मनसि ब्रह्मदृष्टिः, उद्गीथे प्राणदृष्टिरित्येवं ब्रह्माब्रह्मारोपरूपाऽपि भवति यथायथम्। तत्र, कुत्रोपनिषदि कति विद्याः कथिता इति विवेचनं वृथाविस्तरभियोपेक्ष्य विशिष्य वक्तव्यं परं विवक्षामः—

अद्वैतिभिः निर्गुणविद्या सगुणविद्येति द्वैधमध्यवसीयते। तत्र सगुणविद्या मुक्तिपर्यवसायिन्यपि न साक्षान्मुक्तये कल्पत इति चास्थीयते। तत्र निर्गुणविद्या नाम न काचिदस्तीति तदन्येषां निर्णयः। सामान्यतस्तावत् परमार्थविद्याः द्वात्रिंशदिति प्राच्यग्रन्थानारूढा पारम्परिकी साम्प्रदायिकी प्रसिद्धिरस्ति। का इमा द्वात्रिंशदिति विशिष्य निर्देशे तु न लक्ष्यत ऐकमत्यम्। तत्रास्माकं हस्तं गता काचित् पूर्वैर्लिखिता पट्टिका विद्या एवं निर्दिशति—

१ ईशावास्यविद्या-ईशावास्योपनिषत्; २ परमपुरुषविद्या कठ. ३. ऋतं पिबन्तौ; पुरुषान्न परम्; ३. सद्विद्या छान्दोग्यम् ६-२-७ ४. आनन्दमयविद्या तैत्तिरीयम्; ५. अन्तरा दित्यविद्या छान्दोग्यम्. १-६.६; बृहदा. ७ ५-१.; ६. आकाशविद्या छान्दोग्यम. १-९; ८-४.; ७ प्राणविद्या छान्दोग्यम्. १-११-५ ८. ज्योतिर्विद्या छान्दोग्यम. ३-१३-७; ९. प्रतर्दनविद्या कौषीत. ३-१; १०. शाण्डिल्यविद्या छान्दो—; बृहदा—; अग्निरहस्यम्। ११. पर्यङ्कविद्या कौषीत. १.१; १२. नाचिकेतविद्या कठ. २.; १३. उपकोसलविद्या

छान्दो. ४-१०. १४. उद्दालकान्तर्यामिविद्या बृहदा. ५-७१. १५. अक्षरविद्या मुण्डकोपनिषत् ; 16 वैश्वानरविद्या छान्दो. ५.११. १७. भूमविद्या छान्दो. ७-१.१;१८. गार्ग्यक्षरविद्या बृहदा.; १९. सत्यकामविद्या छान्दो ४-४. २०. दहरविद्या छान्दो. ८-१-८ ; तैत्ति. २३ ; नारायणोपनिषत् १०. ; २१. अङ्गुष्ठप्रमितविद्या कठ २-४-१२; २-६ १७ ; श्वेताश्वतर. ५-८ १; २२. मधुविद्या छान्दोग्य. 'असावादित्यो देवमधु' ३ : २३. संवर्गविद्या छान्दो. ४ १.१; २४. ज्योतिषां ज्योतिर्विद्या बृहदा. ६-४-१६.; २५. बालाकिविद्या बृहदा. ४ १; २६. मैत्रेयीविद्या बृहदा ४ ४; ६-५. ; २७. गायत्रीविद्या छान्दो. ३-११. ; २८. उषस्तकहोलविद्या बृहदा. ५-४-५ ; २९ पञ्चाग्निविद्या छान्दो. ५-३ ; बृहदा. ; ३०. अक्षिविद्या छान्दो. ४-१५; ३१. भार्गवी वारुणी विद्या तैत्ति. भृगुवल्ली. ; ३२. श्रीमन्न्यासविद्या तैत्ति. नारायण.४९-५२. इति ।

अन्यत्र अधिकरणक्रमानुसारिपट्टिकायां तु, सत्-आनन्द-अन्तरादित्य-आकाश-प्राण-गायत्रीज्योतिः-इन्द्रप्राण-शाण्डिल्य-अत्तृ-उपकोसल-अन्तर्यामि.अक्षरपर.वैश्वानर.भूमगार्ग्यक्षर.प्रणवोपास्यपरमपुरुष.दहर.अङ्गुष्ठप्रमित.देवोपास्यज्योतिः-मधु.संवर्ग.अजाशरीरकब्रह्म.बालाकि.मैत्रेयीद्रुहिणरुद्रादिशरीरकब्रह्म-पञ्चाग्नि.आदित्यस्थाहर्नामकब्रह्म-अक्षिस्थाहंनामकब्रह्म-पुरुष-ईशावास्य.उषस्तकहोल.व्याहृतिशरीरकब्रह्मपदघटनेन द्वात्रिंशत् विद्याः, त्रयस्त्रिंशी च न्यासविद्या परिगणिताः सन्ति।

अधिकरणरत्नमालापुस्तकसंयोजितायां पुनः अकारादिक्रमनिबद्धायां पट्टिकायाम्—, अक्षर-अक्षिस्थ-सत्यब्रह्म-अङ्गुष्ठप्रमित-अन्तरादित्य-आकाश.आनन्दमय.ईशावास्य-उद्दालकान्तर्यामि.उपकोसल-उषस्तक

होल-गायत्री.गार्ग्यक्षर-ज्योतिषांज्योतिः.त्रिमात्रप्रणव.दहर.नाचिकेत.न्यास. पञ्चाग्नि परज्योतिः.पर्यङ्क-प्रतर्दन-प्राण. बालाकि.भूम.मधु.मैत्रेयी.वैश्वानर. व्याहृति.शाण्डिल्य संवर्ग-सत्यकाम.सत् इत्येवंनामभिर्विद्याः द्वात्रिंशत् गणिताः सन्ति। अत्र पट्टिकायाम्, अन्यत्र स्थितो भेदोऽप्युदटङ्कि।

तत्र प्रथमपट्टिकां किञ्चित् परिशीलयेम — प्रसिद्धं व्याहृति-ब्रह्मविद्यात्रिमात्रप्रणवविद्यादिकं परित्यक्तमिह। परमपुरुषविद्या तु प्रश्नोपनिषदुदितत्रिमात्रप्रणवविद्यारूपा नात्राभिसंहिता; किंतु कठवल्ल्याम्, 'पुरुषान्न परं किञ्चित्' इत्युक्ता। अन्यदपि, नाचिकेतविद्या, अङ्गुष्ठप्रमितविद्येति विद्याद्वयमत्र परिगणितमस्ति। कृत्स्नाऽपि कठोपनिषत् नचिकेतसे एकां विद्यां मृत्यूपदिष्टामाहेत्येव स्वरसम्, तावतैव प्रश्नस्य पूरणात्। अत्त्रधिकरणे च, 'प्रकरणात् पूर्वोक्तः परमात्मैव अत्ता; तृतीयस्याम् ऋतवल्ल्यामपि स वर्णितः' इत्यसूत्रि। अभाषि च तत्र, "तद्विष्णोः परमं पदम्' इत्यन्तेन विद्यामुपदिश्य तदपेक्षितांश्च विशेषानुपदिदेश" इति। एवञ्च आनुमानिकाधिकरणे पृथग्विचारेऽपि न विद्याभेद इति प्रथमवल्लीत्रयमेकविद्याविषयमिति निर्विवादम्। द्वितीयेऽप्यध्याये वल्लीत्रयात्मके अङ्गुष्ठप्रमितवाक्यमादावन्ते च स्थितं गृहीत्वा प्रमिताधिकरणे जीवपरत्वेन प्रत्यवस्थाने परमात्मपरत्वं प्रत्यपादि। एवञ्च कठोपनिषदन्ते तृतीयवल्ल्युक्तरीत्या वशीकारविधां पुनरुपवर्ण्य, 'मृत्युप्रोक्तां नाचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्' इति श्राव्यमाणं कृत्स्नोपनिषदुपसंहारपक्षे स्वरसम्। एवञ्च प्रथमाध्यायोक्तार्थवैशद्यमेव द्वितीयेऽध्याये क्रियत इति साम्प्रतम्। 'पराञ्चि खानि व्यतृणत्' इत्युपक्रम

बलादपि द्वितीयोऽध्यायो योगविधिरूपार्थैदम्पर इति नाचिकेतविद्या-तद्योगविधिरूपार्थद्वयमध्यायद्वयेनाभिधीयत इति चावगम्यते। एवं विमर्शे च प्रथमाध्यायोक्तविद्यातोऽन्या अङ्गुष्ठप्रमितविद्या नाम कुतो भविष्यति, कुतस्तराञ्च परमपुरुषविद्या, नाचिकेतविद्या, अङ्गुष्ठप्रमितविद्येति तिस्रो विद्याः। अध्यायभेदेन विद्याभेद इत्यध्यवसानेऽपि न विद्यात्रैधमिति।

अथान्तरादित्यविद्या, आकाशविद्या, प्राणविद्येति यद्गणि विद्यात्रयम्, तत् ब्रह्मदृष्टिरूपम्, न परविद्येति छान्दोग्यप्रकरणपरामर्शिनां सुगमम्। नारायणप्रश्ने बृहदारण्यके च भणिता पुनरन्तरादित्यविद्या तदन्या। न खलु, 'सर्वलोककामेशत्व-उन्नामकत्व-कप्यासपुण्डरीकाक्ष-हिरण्मयदिव्यमङ्गलविग्रहविशिष्टत्व - आदित्यमण्डलान्तर्वर्तित्वाद्याश्चर्यनैक-विशेषणविशिष्टत्ववर्णनं केवलं ब्रह्मदृष्ट्यर्थे कथङ्कारं घटते' इति कृत्वाऽस्माभिरसंतुष्टैर्वचनमुल्लङ्घ्य परविद्यात्वमन्तरादित्यविद्याया अस्याः कल्प्येत। अभाषि च भगवता भाष्यकृता, "न वा प्रकरणभेदात् परोवरीयस्त्वादिवत्" इति सूत्रे, उद्गीथावयवे प्रणवे हिरण्मयदृष्टिविधिरिहेति। एवमपि केचिदन्तरादित्यविद्यागतम्, 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद' इति उन्नामविधानार्थवादं प्रकरणात् पृथक्कृत्य, सिद्धानुवाद-बलात् वाक्यान्तरं वा परिकल्प्य, दृष्टिरूपेव, अदृष्टिरूपा सती सकल-विशेषविशिष्टादित्यान्तर्वर्तिपुरुषविषयेयं परमपुरुषार्थसाधनी परविद्याऽपीति साधने प्रयस्यन्ति चेत्—अस्तु कामम्। अथापि आकाशप्राणविद्ययोः उद्गीथप्रस्तावगोचरयोः केवलदृष्टिविद्यात्वमेवेति न तद्गणनस्यावसरोऽस्ति। या तु भूमविद्याकुहरकथिता काचित् प्राणविद्या, सा जीवगोचरा; या

चेन्द्रियकलहप्रकरणभाविता, सा ज्येष्ठश्रेष्ठमुख्यप्राणवायुविषयिणी। तत-स्तयोः प्राणविद्ययोरिह गणनं नैव प्रसजति। ज्योतिर्विद्याऽपि, कौक्षेय-ज्योतिश्शरीरकद्यसंबन्धिज्योतीरूपपरमात्मविषयिण्यपि, आभिरूप्यकीर्ति-मत्त्वरूपफलार्थोपासनाविशेषः, न मोक्षार्थविद्या।

अथाक्षरविद्या। तत्र मुण्डकोक्ताक्षरविद्याविशेषात् बृहदारण्यक-गतगार्ग्यक्षरब्रह्मविद्या अन्येति कुतोऽध्यवसीयते? यावता—सर्ववेदान्त-प्रत्ययाधिकरणे, मुण्डके शिरोव्रतश्रवणाद् विद्या भिद्यत इति पूर्वपक्षं प्रवर्त्य तस्य व्रतस्याध्ययनार्थतया न वेदान्तरविद्याभिन्नेयं विद्येति राद्धान्तित-मिति वैश्वानरादिविद्यानामपि वेदभेदान्न भेद इति गमयदिदमधिकरणम्, शिरोव्रतं यत्र विद्यायां श्रूयते तस्या अक्षरविद्यायाः सर्ववेदान्तप्रतीतया ऐक्यं कथङ्कारं न गमयिष्यतीत्येव विमृश्यमस्ति। 'अक्षरधिया'मिति सूत्रे च भाष्ये उभयत्र मुण्डके बृहदारण्यके च स्थितं वाक्यजातमेकीकृत्यान्ववादि।

ज्योतिषांज्योतिर्विद्येति, याज्ञवल्क्येन जनकं प्रति क्रियमाणदहर-विद्योपदेशमध्यगतं श्लोकमवलम्ब्य गण्यते पट्टिकायाम्। तत्र पृथग्विद्यात्वे प्रमाणमन्वेष्टव्यम्। अन्यथा, 'य एवं विदुरमृतास्ते भवन्ति' इति पूर्व-वाक्येऽपि विद्यान्तरं किं न वर्ण्येत? यदि पुनः 'ज्योतिषांज्योतिरायु-र्होपासते' इति केनोपनिषदुक्तविद्यैवेहानूद्यत इति निरूपयितुं पार्यते, 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः' इति अत्रत्यमन्त्रे, 'श्रोत्रस्य श्रोत्रम्' इति केनोपनिषन्मन्त्रे चेषदर्थभेदेऽपि उभयत्र आयुषः=प्राणस्य इन्द्रियाणाञ्च ग्राह्यतया अन्तत एकार्थपर्यवसानं हि संभवतीति—तदा केनापि नाम्ना काममियं विद्याऽपि काचिद् गणनपदमध्यास्ताम्।

भार्गवी वारुणी विद्याऽपि यदि मोक्षफला, तदा आनन्दमयविद्यातो न भिद्यते इति कथं पार्थक्येन परिगणनमिति प्रश्नोऽवतरति।

एवं प्रथमपङ्क्तिकागते परिगणनप्रकारे दौःस्थ्यं परिशीलयद्भिः पङ्क्त्यन्तरगणितक्रमेऽपि विवेको यथायथं सहृदयीभूय स्वयं कार्यः। सर्वान्नानुमत्य प्रकरणसंदर्शितं विषयवाक्यमपहाय च अन्तराभूतप्रामाधिकरणदर्शितं विषयवाक्यं तत्प्रतिपादकं परिग्राह्यमित्यलमधिकेन।

तदिह प्रकारान्तरनिरीक्षणाय उपनिषत्सु दशसु श्रुताः प्रधानविद्याः परिगण्यन्ते—तदत्र एकहेलया निबध्यते—इयम्—

वेदान्तपुष्पाञ्जलिविषयसूची

			श्लो-सं
१. ईशावास्यविद्या - सर्वावासवासुदेवरूपविचित्रशक्तिपरमात्मविषयिणी	ईशोपनिषदि	1	7
२. प्राणप्राणविद्या - अत्र प्राणशब्दो मुख्यामुख्योभय-प्राणपरः	केनोपनिषदि	2	1
३ नाचिकेतविद्या-अध्यायभेदेन विद्याभेदे तु विद्याद्वयम्	कठोपनिषदि	3	3
४. त्रिमात्रप्रणवार्थपरमपुरुषविद्या - प्रश्नषट्कमध्येतदर्थम्	प्रश्नोपनिषदि	4	18
५. भूतयोन्यक्षरविद्या। बृहदारण्यकगार्गिब्राह्मणगताऽपि इयम्	मुण्डकोपनि.	5	20
६ अकारादिपादयुक्तप्रणवविद्या	माण्डूक्योप	6	2[illegible]
७ मनोमयामृतविद्या-व्याहृत्युपासनाङ्गिका	तैत्ति-शिक्षा.	7	28
८ आनन्दमयविद्या-भार्गवी वारुणी विद्या नान्या	तैत्ति आन.	8	29
९. दहरविद्या-छान्दोग्यबृहदारण्यकोक्ता	तैत्ति-नाराय.	9	36

वेदान्तपुष्पाञ्जलिविषयसूची.

एतावता दशोपनिषद्गताः 32 परविद्याः गणिताः । सूच्यां मुख्यविद्यारम्भश्लोकमात्रमदर्शि । अन्यत् सर्वं तदनुगतं स्वयमेव द्रष्टव्यम् । अथ वेदान्तपुष्पाञ्जलौ—

बृहदारण्यकगताः अक्षरविद्यादहरविद्याशाण्डिल्यविद्यापञ्चाग्निविद्याः वेदान्तरश्रुतपूर्वपरिगणितविद्यानतिरिक्ता इति कृत्वा न पृथक् गणिताः। एवं ज्योतिर्विद्याऽपि। अत्र कासुचिदुपासनविधेरश्रवणेन मोक्षार्थोपासनत्वानवधारणात्, अन्यासां कासाञ्चित् दृष्टिरूपत्वस्य फलान्तरार्थत्वस्य च विस्पष्टत्वात् परिशेषात् अत्र गणिता एव मोक्षार्थाः परविद्या भवन्तीति तासां द्वात्रिंशत्तया दशोपनिषदुपदिष्टाः परविद्यास्तावत्य इति द्वात्रिंशत्त्वप्रवादः संगमनीयः। परंत्वत्र परविद्या एवान्याः, पुरुषसूक्तविद्येव पर्यङ्कविद्याप्रतर्दनविद्यादयः सर्वसंमतकौषीतक्यथर्वशिखाऽथर्वशिरआद्यन्या-

न्योपनिषदुद्घुष्टा अशेषपरिगणनावसरे परिग्रहभाजनीभविष्यन्ति। सेयमेका गमनिका।

अथ शारीरकशास्त्रे कति विद्या भगवता बादरायणेन भणिता इति विषयवाक्यानि तत्र तत्राभिमतान्यनुरुध्य विमर्शे विधीयमाने इत्थं परिगणय्य कथनं संपद्यते—

आदौ शास्त्रारम्भार्थायां चतुःसूत्र्यां वृत्तायाम्—

१ सद्विद्या ईक्षत्यधिकरणे १-१-५

(गतिसामान्यसूत्रे ऐतरेयतैत्तिरीयादिविद्याः।)

२ आनन्दमयविद्या आनन्दमयाधिकरणे १-१-६;

३ अन्तरादित्यविद्या ४ अन्तरक्षिविद्या च १-१-७; ५ आकाशविद्या १-१-८; ६ प्राणविद्या १-१-९; ७ दिव्यकौक्षेयज्योतिर्विद्या ८ गायत्रीविद्या च १-१-१०; ९ प्रतर्दनविद्या; १-१-११; १० शाण्डिल्यविद्या १-२-१; ११ नाचिकेतविद्या १-२-२; १२ उपकोसलविद्या १-२-३; १३ अन्तर्यामिविद्या १-२-४; १४ भूनयोन्यक्षरविद्या १-२-५ १-३-१; १५ वैश्वानरविद्या १-२-६; (भूनयोन्यक्षरविद्या) १६ भूमविद्या १-३-२; (अक्षरविद्या १-३-३) १७ त्रिमात्रप्रणवपुरुषविद्या १-३-४; १८ दहरविद्या १-३-५; १९ मधुविद्या; २० ज्योतिर्विद्या १-३-८; २१ संवर्गविद्या १-३-९; (दहरविद्या १-३-१० नाचिकेतविद्या १-४-१) २२ श्वेताश्वतरविद्या १-४-२ (ज्योतिषां ज्योतिर्विद्या) १-४-३; २३ अव्याकृतब्रह्मविद्या १-४-४; २४ बालाकिविद्या १-४-५; २५ मैत्रेयीविद्या १-४-६; (सद्विद्या १-४-७ हिरण्यगर्भशिवादिपदघटित वाक्यगम्याः विद्याः; १-४-८) २६ पञ्चाग्निविद्या ३-१-१; २७ मूर्तामूर्तरूपब्रह्मविद्या ३-२-५; २८ उद्गातृप्राणविद्या; २९ उद्गीथप्राणविद्या ३-३-२; ३० ज्येष्ठ-

श्रेष्ठप्राणविद्या ३-३-२; ३१ व्याहृतिशरीरकादित्यब्रह्मविद्या;
३२ ,, अक्षिब्रह्मविद्या; ३३ पुरुषविद्या ३-३-९;
३४ पर्यङ्कविद्या ३-३-१२; ३५ उषस्तकहोलविद्या ३-३-१५;
(दहरविद्या ३-३-१६) ३६ उद्गीथविद्या ३-३-१७; ३७ प्रजा-
पतिविद्या ३-३-२१; ३८ ईशावास्यविद्या ३-४-१; ३९ ब्रह्म-
दृष्टिः ४-१-३; ४० आदित्यादिदृष्टिः ४-१-४.

अधिकरणान्तरगतानां न पृथक्परिगणना, पौनरुक्त्यात्। अथ संख्यातासु आसु कासां परिसंख्यानम्, कासां परिग्रहणमिति विमर्शे, प्रतिनियतस्थानगुणविशेषविशिष्टब्रह्मविषयकमुपासनं दृष्टिरूपं परमार्थिकं वा यत्, तत् सर्वं गण्यते; अन्यादृशं मनोब्रह्मदृष्ट्यादिरूपम्, तथा अब्रह्मगोचरञ्चोपासनं न परिग्राह्यमिति विचिन्त्य कतिपयत्यागे द्वात्रिंशत् संपद्यन्ते। सर्वव्याख्यानाधिकरणे उक्तानुक्तविद्यानां हिरण्यगर्भरुद्राद्यनेक-गोचराणां विद्याविधायकविलक्षणानाञ्च तत्त्वमात्रप्रतिपादनपराणां वाक्य-जातानां ग्रहणान्न तत्र विशिष्य किञ्चिद्विद्याग्रहणावधारणावकाशः। पूर्वविकल्पाधिकरणगुणसूत्रखण्डेन, 'मृत्युवन्न हि लोकापत्तिः' इत्यनेन दृष्टान्ततया दर्शितमस्ति किञ्चित् आदित्यमण्डलस्थपुरुषविषयनमहस्य-विहितमुपासनम्। तत्र कीदृशवस्तुगोचरम्, किं मुक्त्यर्थम्, आहो अन्यार्थमिति विचार्य निर्णेयम्; न सूत्रे प्राधान्येन मीमांसितम्, केवलं तु तत्रत्यं मृत्युपदमेकं न्यदर्शीति, न तदुपासनं गणनीयकोटिमाटीकते। पराधिकरणे उन्मानपदेन षोडशकलब्रह्मविद्यैव विशिष्य ग्राह्येति न स्पष्टम्। पादोऽस्य सर्वाभूतानि इत्येवं गणितगायत्रीविद्यादिदर्शितोन्मान

विषयतयाऽपि यतस्तदुपपद्यत इति न षोडशकलब्रह्मविद्या तत इह विशिष्य गणनमर्हति । पुरुषविद्याधिकरणगृहीतयोश्च विद्ययोः तैत्तिरीयोक्तायाः पुरुषविद्यायाः मुक्तिविद्याङ्गताप्रयुक्तायाः मुक्त्यर्थतायाः, छान्दोग्योक्तायाः पुरुषविद्याया अनुष्ठातुः उपायान्तरेण देहावसाने मुक्त्यवगमेन मुक्तिपर्यवसायितायाश्च स्थितावपि न काऽपि पुरुषविद्या साक्षात् परविद्येति न तद्गणनं प्रसजति । पुरुषार्थाधिकरणे, 'नाविशेषात्', 'स्तुतयेऽनुमतिर्वे'ति सूत्रद्वयी यद्यपि स्वतन्त्रकर्मनियमनिषेधपरा, न पराविद्याविशेषविषयविचारात्मिका, अथापि विद्यास्तुतिवर्णनात् प्रकाणे विद्यां विधेयां सूचयतीति ईशावास्यविद्यायास्तत्र संख्यानं साम्प्रतम् । यथाकथमपि द्वात्रिंशत्त्वमुपपाद्य स्थाप्यमिति अभिनिवेशमपसार्य औचित्यपरिशीलनया एवंरीत्या विमृशतामिदं निष्पद्येत, यत् विशिष्टब्रह्मविषयिण्यो विद्याः द्वात्रिंशद् भगवता बादरायणेन शारीरके मीमांसनमार्गमानायिषतेति तदनुरोधी प्राचाम्, 'विद्याः द्वात्रिंशत्' इति व्याहार इति । अत्र दृष्टिविद्याः काश्चिदन्तर्निविशन्ते ; माण्डूक्यैतरेयादिगताः परविद्याः परिगणनाद् भ्रश्यन्तीति च नेयं पूर्णवास्तवविद्यागणना ; किन्तु शारीरकमादाय द्वात्रिंशत्त्वोपपादनमात्रम् ।

यदि कश्चिदत्रोपपादनसरणौ मनाग् विमनायमानः गृहीतकिञ्चिद्विद्योपेक्षणेन उपेक्षितविद्यान्तरग्रहणेन संख्यानं विधाय विधान्तरेण द्वात्रिंशत्त्वं विवक्षेत्, कामं कथयतु । सर्वथा दशोपनिषन्मात्रदर्शनेन वा शारीरकशास्त्रस्पृष्टसंकलनेन वा स्यादयं प्रवादः प्राप्त इति परिशीलनप्राप्तरूपम् ।

एतावता सर्वासूपनिषत्सु, सर्वत्र वा श्रुतौ द्वात्रिंशदेव विद्या विहिता इति तु नियन्त्रयितुं नैव पारयामः। सत्यं विभिन्नशाखाविहितानामैक्यं संभाव्यते। समर्थितञ्च अक्षरदहरशाण्डिल्यवैश्वानरादिविद्यासु प्रत्येकं शाखाभेदेप्यैक्यं गुणोपसंहारपादे—अथाऽनन्तमहाविभूतेः असंख्येयकल्याणगुणगणमहार्णवस्य अपरिसंख्येयव्यूहविभवहार्दादिविविधदिव्यरूपस्य स्वाभिमतानुरूपरूपरमाद्यनन्तपरिग्रहादिपरिवृत्तस्य परस्सहस्रनाम्नः परस्यः पुंसः प्रतिवेदविभक्ताभिः परिगणनदूराभिः सर्वाभिः शाखाभिः द्वात्रिंशदेव परविद्याः प्रतिपादिता इति निष्कर्षणं हि दुष्करमेव प्रतिभाति। न च किञ्चित् प्रमाणवचनं पश्यामः। अत एव वेदान्तपुष्पाञ्जलावस्माभिरेवमभ्यधायि—

"द्वात्रिंशत् सन्ति विद्यास्तव पदभजनेऽत्रेति भूयान् प्रवादः
वेदेऽनन्ते तदर्थे त्वयि बहुजननेऽनन्तकल्याणपूर्णे।
संख्याने कः समर्थः स्वयमिह नतरामद्य निश्शेषशक्तिः
सीष्मान्तो भक्तियोगो भुवि बत यदि वा श्रीश नाथान्त एषः॥"

इति। एवमसङ्ख्यासु परविद्यासु वेद्यं परं ब्रह्म सगुणं श्रियःपतिर्नारायण इति विशिष्टाद्वैतिनां निर्णयः।

तत्र ब्रह्मजिज्ञासेत्युपक्रम्योपनिषदो मीमांसमानो भगवान् बादरायणो ब्रह्म प्रधानप्रतिपाद्यमिति स्पष्टमेव प्रदर्शयामास। तद् ब्रह्म निर्गुणं सगुणं वा, सगुणमप्यरूपं सरूपं वा, सरूपमपि चतुर्मुखादिरूपं विष्णुर्वेत्येवंरूपा विवादास्तावदनन्तरमनूद्गच्छन्ति। एषां शमनं विष्णुपास्यत्वञ्च शारीरक एव सिद्धम्।

औपनिषदभगवन्नामावलिः–

एवमयं वेदान्तपुष्पाञ्जलिर्यस्मै परस्मै ब्रह्मणे श्रीनिवासाय सादरं समर्प्यते, तस्यैवास्य औपनिषदपुरुषस्यार्चनोपयुक्तानि पावनतमानि औपनिषदानि नामानि परिगणयितुमादौ उपनिषत्सु दशसु शब्दतोऽर्थतश्चोपलब्धानि यथार्हं परिशील्य क्रमेणेह निर्दिशामः—अत्यन्तसूक्ष्मेक्षिकायाम् अन्यान्यपि नामानि निर्देष्टव्यानि भवेयुः, अथापि अनतिस्थूलया दृष्ट्या क्रियते इयं गणनेति भाव्यम् । **अत्र मुख्यानि स्वयं गण्यन्ताम् ।**

ईशोपनिषदि ईट् अनेजत् एकम्, मनसोजवीयः, पूर्वमर्षत्, तिष्ठत्, दूरस्थम, अन्तिकस्थम्, अन्तःस्थम्, बहिःष्ठम्, आत्मा, (अकायम्) अव्रणम्, अस्नाविरम्, शुद्धम्, अपापविद्धम्) कविः, मनीषी, परिभूः स्वयम्भूः, विधाता अमृतम्, पूषा, एकर्षिः, यमः, सूर्यः, प्राजापत्यः, कल्याणतमरूपः, पुरुषः, क्रतुः, अग्निः, देवः, विद्वान् ॥

केनोपनिषदि (देव,) श्रोत्रम्, मनः, वाक्, प्राणः, चक्षुः, वागाद्यवशम्, वागाद्याविर्भावकम्, ब्रह्म, अमतम्, मतम्, अविज्ञातम्, विज्ञातम्, प्रतिबोधविदितम्, यक्षम्, वनम्, ज्येयस्स्वर्गप्रतिष्ठितम् ॥

कठोपनिषदि अनन्तः श्रेयः श्रवणदुर्लभः शृण्वद्वेद्यः कुशलानुशिष्टकुशलगम्यः दुर्दर्शः गूढः गुहाहितः गह्वरेष्ठः, पुराणः अध्यात्मयोगाधिकयोगगम्यः, पदम्, ओम्, अणोरणीयान् महतो महीयान् धातुः आसीनः दूरगामीः शयानः सर्वयायी मदामदः अशरीरः महान्

विभुः ब्रह्मक्षत्रौदनः मृत्यूपसेचनः ऋतपाः गुहाप्रविष्टः आतपः ईजानसेतुः, अक्षरम्, अभयपारम्, विष्णुः, पराकाष्ठा, परागतिः, सर्वभूतगूढः अग्र्यबुद्धिदृश्यः शान्तात्मा, नित्यं शब्दादिरहितः अनाद्यनन्तः महतः परः ध्रुवः अन्तरात्मा प्रत्यगात्मा भूतभव्येशानः पूर्वजः परमानुग्राही अदित्यात्मा अग्न्यात्मा, सूर्यात्मा इहचामुत्रचस्थित अङ्गुष्ठमात्रपुरुषः विमुक्तात्मा बृहद्तम्, गुह्यम् सनातनम् सुप्तभोग्यनिर्माता शुक्रम् सर्ववस्तुप्रतिरूपः निर्लेपः वशी आत्मस्थः नित्यैकचेतनः अनिर्देश्यपरमसुखम् तेजोभिभावी भाप्रदः सर्वकम्पनः व्यापकः अलिङ्गः अदृश्यरूपः हृन्मनीषाभिक्लृप्तः अस्तीत्येवोपलब्धव्यः॥

प्रश्नोपनिषद्—ब्रह्म प्रजापतिः वैश्वानरः विश्वरूपः अग्निः हरिः जातवेदाः परायणम् ज्योतिः सूर्यः, आत्मा, प्राणानामायतनम् अभयम् विरजोब्रह्मलोकः पर्जन्यः मघवान् वायुः पृथिवी रयिः देवः सत् असत् परात्मा अक्षरात्मा अच्छायम् अशरीरम् अलोहितम् शुभ्रमक्षरम् परपुरुषः परात्परः पुरिशयः, शान्तम्, अजरम् परम्॥

मुण्डकोपनिषदि—सर्वविद्याप्रतिष्ठाविद्यावेद्यः अक्षरम् अदृश्यम् अग्राह्यम् अगोत्रम् अवर्णम् अचक्षुःश्रोत्रम् अपाणिपादम् नित्यः विभुः सर्वगतः सुसूक्ष्मः भूतयोनिः सर्वपरः अणिष्ठः ज्येष्ठः पूर्णसर्वः सर्वज्ञः सर्ववित् ज्ञानमयतपाः सूर्यरश्मिनेयस्थलाधिवासः देवानां पतिः एकः तप अमृतः अव्ययात्मा अकृतः दिव्यः अमूर्तः अजः अप्राणः अमनाः शुभ्रः अक्षरात्परतःपरः द्युलोकादिमूर्धादिः सर्वभूतान्तरात्म मतमृारप गुहानिहितम् आविःसंनिहितम् सदसद्वरेण्यम् विज्ञानात्

परम् वरिष्ठम् अर्चिमत् सत्यम् अमृतसेतुः बहुधाजायमानः दिव्यब्रह्मपुरप्रतिष्ठितः मनोमयः प्राणशरीरनेता अन्नप्रतिष्ठितः आनन्दरूपः परावरः परापरविद्यावेद्यः विरजः निष्कलम् ज्योतिषांज्योतिः, चन्द्रार्कवपुः कृतभूतभवनः सुपर्णः सखा सयुक् अनश्नन् जुष्टः रुक्मवर्णः कर्ता ईशः ब्रह्मयोनिः ज्योतिर्मयः सत्यपरमनिधानम् बृहत् दिव्यम् अचिन्त्यरूपम् सूक्ष्मतरम् परमंधाम सर्वगः परामृतम् दिव्यपुरुषः॥

माण्डूक्योपनिषदि—जागरितस्थानः बहिःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुक्, वैश्वानरः स्वप्नस्थानः अन्तःप्रज्ञः प्रविविक्तभुक् तैजसः सुषुप्तस्थानः एकीभूतः प्रज्ञानघनः आनन्दमयः आनन्दभुक् चेतोमुखः प्राज्ञः सर्वेश्वरः सर्वज्ञः अन्तर्यामी सर्वयोनिः प्रभवः अप्ययः नान्तःप्रज्ञः नबहिःप्रज्ञः नोभयतःप्रज्ञः नप्रज्ञानघनः नप्रज्ञः नाप्रज्ञः अदृष्टम् अव्यवहार्यम् अग्राह्यम् अलक्षणम् अचिन्त्यम् अव्यपदेश्यम्, ऐकात्म्यप्रत्ययसारम्, प्रपञ्चोपशमम् शान्तम् शिवम्, अद्वैतम् अः, उः मः ओम् अमात्रः अव्यवहार्यः प्रपञ्चोपशमः शिवः अद्वैतः आत्मा ब्रह्म ॥

तैत्तिरीयोपनिषदि—विष्णुरुरुक्रमः, विश्वम् अमृतम् ब्रह्म मनोमयः पुरुषः अमृतः हिरण्मयः इन्द्रः सत्यात्मप्राणः सत्यम् ज्ञानम् अनन्तम् ब्रह्म विपश्चित् आत्मा आनन्दमयः शारीरः असत् सत् सुकृतम् रसः आकाश-आनन्दः अदृश्यः अनात्म्यः अनिरुक्तः अनिलयनः पुरुषादित्यवर्ती अन्नमयात्मा प्राणमयात्मा मनोमयात्मा विज्ञानमयात्मा, सर्वभूतजनिजीवनसंवेशनहेतुः परमव्योम आनन्दः अन्नम्, अन्नादः

प्रथमजाः अमृतस्य नाभिः अम्भस्यपारेऽभिव्यक्तः भुवनस्याधिपतिः नाकस्य पृष्ठेनिषण्णः, महतो महीयान् ज्योतिरनुप्रविष्टः प्रजापतिः अन्तश्चारी सृष्टिस्थितिलयस्थानम् अक्षरपरमव्योमवासी कविवेद्यः विद्युत्पुरुषः, कालकल्पकः, अग्राह्यः, अनीशकः, महायशाः, अदृश्यरूपः, हिरण्यगर्भः, विश्वतोमुखः, विश्वतश्चक्षुः, विश्वतोहस्तः, विश्वतस्पात्, जनयिता, विद्वान्, गन्धर्वः, त्रिपात्, बन्धुः, जनिता, विधाता, विश्ववेदी, सदसस्पतिः अद्भुतः प्रियः काम्यः जातवेदाः नारायणः वासुदेवः विष्णुः भूम्युद्धारकः वराहः कृष्णः शतबाहुः वशी धाता गोप्ता ज्योतिः समुद्रः इन्दुः पृतनाजित् सनात् अक्रतुः सवप्रभवः ब्रह्मा पदवीः ऋष्यादिरूपः स्वधितिः सोमः हंसः वसुः होता अतिथिः नृषत् वरसत् ऋतसत् व्योमसत् अब्जादिरूप षोडशी विधर्ता सविता नृचक्षुः घृतम् देवजिह्वा वृषभः त्रिधाबद्धः वेनः विश्वाधिकः रुद्रः महर्षिः अनन्यपरः अणीयोरहितः महीयोरहितः परामृतम् दहगगनम्, विशोकः वेदादिस्वरपरः महेश्वरः सहस्रशीर्षः दिश्वाक्षः विश्वशम्भुः अक्षरदेवः परमप्रभुः विश्वपतिः आत्मेश्वरः शाश्वतशिवः अच्युतः महादेवः विश्वात्मा परायणम् परब्रह्म परतत्त्वम् परज्योतिः अनन्तः अव्ययः कविः समुद्रेन्तः परमात्मा ब्रह्मा शिवः इन्द्रः अक्षरपरमस्वराट् ऋतम् सत्यम् कृष्णपिङ्गलः विरूपाक्षः ऊर्ध्वरेताः अङ्गुष्ठमात्रः अङ्गुष्ठसमाश्रितः सर्वेशः प्रभुः विश्वभुक् सद्योजातः भवोद्भवः वामदेवः रुद्रः कालः कलविकरणः बलप्रमथनः सर्वभूतदमनः मनोन्मनः

सर्वविद्येशानः सर्वभूतेश्वरः ब्रह्माधिपतिः सदाशिवः मधु, दुःस्वप्नहा, दुरुस्वहा हरिः आदित्यपुरुषः परमेष्ठी ब्रह्मात्मा पञ्चविधः पञ्चात्मा जिज्ञासु(स) क्लृप्तः ऋतजाः रयिष्ठाः श्रद्धासत्यः महस्वान् वसुरण्य (ण्व): संधाता विश्वसृक् तेजोदाः वर्चोदाः द्युम्नोदाः, महः ओम् ॥

ऐतरेयोपनिषदि—अः (आत्मषट्के) आत्मा ब्रह्म इदन्द्र इन्द्रः प्रज्ञानम् प्रज्ञः ॥

छान्दोग्ये—हिरण्मयपुरुषः, हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात्सुवर्णः कप्यासपुण्डरीकाक्षः उत् ऋक्सामगेष्णः अन्तरादित्येपुरुषः अन्तरक्षिणपुरुषः ऊर्ध्वलोकदेवकामेशः अर्वाग्लोकमनुष्यकामेशः सर्ववीणागीयमानः आकाशः भूतोत्पत्त्यस्तमयहेतुः ज्यायान् परायणम् अनन्तः परोवरीयान् प्राणः विशोकनाकस्थानः ब्रह्म मध्वादित्यः वस्वादिरूपः उदयास्तमयरहितः एकलः सत्यम् चतुष्पदषड्विधगायत्री, भूतपृथिवीशरीरहृदयचरणः सर्वभूतगाता, सर्वभूतत्राता सर्वभूतप्रतिष्ठा सर्वभूतानतिवर्त्यः प्राणप्रतिष्ठा प्राणानतिवर्त्यः पुरुषः पूर्णम्, अप्रवर्ति पञ्चस्वर्गद्वारपब्रह्मपुरुषः परज्योतिः द्युस्थज्योतिः कौक्षेयज्योतिरात्मा स्वजलानसर्वम् मनोमयः प्राणशरीरः भारूपः सत्यसंकल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस सर्वमिदमभ्यात्तः अवाकी अनादरः आत्मा अणीयान्, ज्यायान् अच्युतम् अक्षितम् प्राणसंशितम् प्रत्नादिः उत्तरज्योतिः उत्तमज्योतिः चतुष्पाद्ब्रह्म आदित्यब्रह्म अग्न्यादिसंवर्गवायुः वागादिसंवर्गप्राणः एकदेवः देवात्मा प्रजाजनयिता हिरण्यदंष्ट्रः बभसः

अनसूरिः अनद्यमानः अनन्नादी कृतम् विराट् चतुश्चतुष्कलपदः प्रकाशवत्पात्, ज्योतिष्मत्पात् आयतनवत्पात् षोडशकलब्रह्म प्राणब्रह्म कखब्रह्म अक्षिपुरुषः संयद्वामः वामनीः भामनिः अर्चिरादिगम्यः पञ्चाग्निपुरुषरूपः वैश्वानरात्मा सुतेजोमूर्धा विश्वरूपचक्षुः पृथग्वर्त्मप्राणः बहुलसंदेहः रयिवस्तिः प्रतिष्ठापात् प्रादेशमात्रः अभिविमानः पुरुषेऽन्तः-प्रतिष्ठितः प्राणाग्निहोत्रसमाराध्यः सत् आदेश सर्वविज्ञानविज्ञानः एकम् अद्वितीयम् परादेवता अणिमा आत्मा सत्यम सर्वात्मा उपासकात्मा कार्यात्मा जगद्धेतुः समष्टिकृत् त्रिवृत्कृत् व्यष्टिकृत् चिदचिल्लयभूमिः नानाबीजलयस्थानम् चिन्नदीनिर्गमाम्भोधिः अविनाशिचिदाश्रयः सूक्ष्मः स्थूलहेतुः व्यापी, आचार्यवद्वेद्यः संपन्नाभिमानहन्ता अपुनर्बाधकृत् नामादिब्रह्म भूमा भूमसुखम् सत्यम् स्वमहिमप्रतिष्ठितः सर्वोत्पत्तिस्थानम् मृत्युरोगदुःखशमनदर्शनः सर्वदृष्टिसर्वानुभूहेतुः मुक्तनानाविग्रहहेतुः शुद्धलभ्यध्रुवस्मृति स्मृतिमोच्याखिलग्रन्थि देहपुरवासी दहरपुण्डरीकवेश्मा दहराकाश सर्वाधारमहाकाश अपहतपाप्मा विजर विमृत्यु विशोकः विजिघत्स अपिपासः सत्यकामः सत्यसंकल्प समाहितसर्वकाम अजीर्यन् अहन्यमानः सत्यपुरम् अनृतापिधानसत्यकाम अहरहर्गच्छद्वेद्य हृदयात्मा संप्रसादसंपद्यमान सत्तियरूपसत्यम् सेतु विधृति सकृद्विभातब्रह्मलोक अरार्णवस्थान ण्यार्णवस्थान ऐरम्मदीयसरस्थान् सोमसवनाश्वत्थस्थान अपराजिताधिष्ठाता, प्रभुविमितविद्योती उत्तमपुरुष श्यामः शबल अकृतलोक आकाश नामरूपनिर्वोढा यश प्रजापति सभावेश्मसमास्थितः ।

बृहदारण्यकोपनिषदि—अश्वः, मृत्युः अशनाया, अर्चन् अर्कः, अदितिः प्रजापतिः सत्, ज्योतिः, अमृतम्, आत्मा, पुरुषविधः अहन्नामा, पुरुषः, सृष्टिः; विसृष्टिः, अतिसृष्टि, अव्याकृतम्, व्याकृतम्, आनखाग्रप्रविष्टः प्राण, प्राणन् वदन् वाक् पश्यन् चक्षु, शृण्वन्, श्रोत्रम्, मन्वानः मनः, पदनीयम्, सर्वप्रेयः ब्रह्म अहं मनुः सूर्यः, लोकः पिता, अक्षितिः, ऊर्क् सत्यस्यसत्यम् मूर्तामूर्तरूप सत्यरसः माहारजनरूपः पाण्ड्वाविकरूपः इन्द्रगोपरूपः अग्न्यर्चीरूप पुण्डरीकरूपः सकृद्विद्युत्तरूप अनन्यपर महद्भूतम् अनन्तम्, अपारम, विज्ञानघनः विज्ञाता मधु तेजोमय अमृतमय शारीर रैतस वाङ्मयः प्राण चाक्षुषः श्रौत्रःप्रतिश्रुत्क मानस तैजसः शाब्द हृद्याकाश धाम सात्य मानुषः सर्वभूताधिपति सर्वभूतराजः पक्षी पुरिशय प्रतिरूप इन्द्र हरि अपूर्वम् अनपरम् अबाह्यम् अनन्तरम् सर्वानुभू साक्षादपरोक्षाद् ब्रह्म सर्वान्तरः आत्मात्मा अशनायादिषट्कातिग अनार्त अन्तर्यामी सर्वस्थ सर्वान्तरः सर्ववेद्य सर्वशरीर सर्वान्तर्यन्ता, अदृष्टो द्रष्टा, अश्रुत श्रोता अमतो मन्ता अविज्ञातो विज्ञाता अनन्यद्रष्टृक अनन्यश्रोतृक अनन्यमन्तृक अनन्यविज्ञातृक स्वप्रोताकाशम् अक्षरम् अनणु अह्रस्वम्, अदीर्घम् अलोहितम् अस्नेहम् अच्छायम्, अतम अवायु अनाकाशम् असङ्गम् अरसम् अगन्धम अचक्षुष्कम्, अश्रोत्रम् अवाक् अमन अतेजस्कम् अप्राणम् अमुखम् अमात्रम् अकिञ्चिदशिता अकिञ्चिदश्नीय सर्वप्रशासकः अन्तवत्फलापादकावेदन अनन्तफलहेतुवेदन एकदेव अष्टविधपुरुषात्मा समानप्रतिष्ठा नेतिनेत्यादेश्य अगृह्य

अशीर्य असित आयतनाष्टकातिग लोकाष्टकातिग देवाष्टकातिग पुरुषाष्टकातिग ओपनिषदपुरुष मूलम् विज्ञानम् आनन्दम् रातिः परायणम् वाग्ब्रह्म चक्षुर्ब्रह्म श्रोत्रब्रह्म मनोब्रह्म हृदयब्रह्म इन्धः दक्षिणाक्षिपुरुष इन्द्र विराडन्त लोहितपिण्डान्न जालकमयप्रावरण उर्ध्वनाडीसृति प्रविविक्ताहारतर, अभयम् पुरुषज्योति स्वाप्नकर्ता सलिलम्, परमागति परमासंपत् परमोलोक परमानन्द शतगुणनकाष्ठाप्राप्तानन्द ब्रह्मलोक प्राज्ञात्मा अनुवित्त विश्वकृत्, सर्वकर्ता, ज्योतिषां ज्योति भूतभव्येशान पञ्चजनप्रतिष्ठा पुराणम् अग्र्यम्, एकधानुद्रष्टव्यम् अप्रमेयम्, ध्रुवम् विरज आकाशात् पर अज महान् महात्मा सर्वस्यवशी सर्वस्येशान सर्वस्याधिपति साध्वसाधुकर्मायत्तोत्कर्षनिकर्षरहित सर्वेश्वर भूताधिपति भूतपाल सेतु विधरण वेदानुवचनादिवेद्य अन्नद वसुदान अज अजर अमर अमृत स्वनिःश्वसितप्रायसर्व प्रज्ञानघन पूर्णम् यक्षम् प्रथमजम् सत्यम् मण्डलपुरुष भूराद्यवयवक अहर्नामा अक्षिपुरुष अहन्नामा मनोमय भा सत्य विद्युद्ब्रह्म अन्नब्रह्म प्राणब्रह्म विरब्रह्म गायत्रीतुरीयपदप्रमेय वैद्युतमानसपुरुषप्रायणीय अपुनरावृत्तिस्थानलोक । ७।

श्वेताश्वतरोपनिषदि—कारणं ब्रह्म देवात्मा एकनेमि त्रिवृत् षोडशान्त शतार्धार अष्टकषट्कयुक्त विश्वरूपैकपाश त्रिमार्गभेद द्विनिमित्तैकमोह सर्वाजीव सर्वसंस्थ बृहन् ब्रह्मचक्रम् प्रेरिता ईश ज्ञ अनन्त आत्मा विश्वरूप आत्मसंस्थ सर्वव्यापी सविता मही देव तत्त्वम् अज ध्रुव विशुद्ध जालवान् रुद्र गोपा विश्वाधिक महर्षि गिरिशन्त विश्वपरिवेष्टिता महापुरुष आदित्यवर्ण उत्तरतरम् अरूपम्

अनामयम् सर्वाननशिरोग्रीव सर्वभूतगुहाशय भगवान् सर्वगत शिव महाप्रभु सत्त्वप्रवर्तक ईशान अव्यय अङ्गुष्ठमात्र सर्वजनहृदय-संनिविष्ट हृन्मनीषाभिक्लृप्त, सहस्रशीर्षः सहस्राक्ष सहस्रपात् अमृतस्येशान सर्वत पाणिपाद सर्वतोक्षिशिरोमुख सर्वतश्श्रुतिमान् सर्वेन्द्रियविवर्जित सर्वप्रभु सर्वशरणम् सर्वसुहृत् अपाणिपाद जवन ग्रहीता अचक्षु अकर्ण वेदिता वेदितृविहीन अग्र्यपुरुष अजर पुराण धाता अणोर-णीयान् महतो महीयान् गुहानिहित सुपर्ण सखा अनश्नन् जुष्ट मायी महेश्वर वरद ईश देवाधिप विश्वस्रष्टा अनेकरूप विश्वकर्मा वरेण्यम् अप्रतिम हृदिस्थ अनाद्यनन्त अनेकरूप भावग्राह्य भावा-भावकर कालकाल गुणी सर्वविद्य धर्मावह पापनुत् भगेश आत्मस्थ विश्वधाम ईश्वराणांपरम देवतानांपरम पतीनांपति भुवनेश अकार्यकरण निःसमाभ्यधिक परविविधशक्ति परविविधस्वाभाविक-ज्ञानबलक्रिय अपति अनीश अलिङ्ग करणाधिपाधिप जनकादिरहित सर्वभूतान्तरात्मा, कर्माध्यक्ष सर्वभूताधिवास साक्षी चेता केवल निर्गुणः सर्वचेतनकामविधाता नित्यचेतन एकहंस विश्वकृत् विश्ववित् आत्मयोनि प्रधानक्षेत्रज्ञपति गुणेश संसारमोक्षस्थितिबन्धहेतु ब्रह्मविधायी वेदोपदेष्टा, आत्मबुद्धिप्रकाश निष्कल निष्क्रिय शान्त निरवद्यः निरञ्जन अमृतपरसेतु.

मन्त्रिकोपनिषदि—अष्टपात्-शुचि त्रिसूत्र अणु निर्गुणः अजाध्यासक स्वच्छन्द उदासीन षड्विंश सप्तविंश अद्वैतम् द्वैतम्, त्र्यात्मा पञ्चात्मा सप्तात्मा भगवान् ।

सुबालोपनिषदि—नासन्नसन्नसदसत्, सहस्रशीर्षः, सहस्राक्ष सहस्रपात

महद्भूतम् वैश्वानर परदेव असत् अजातम् अभूतम् अप्रतिष्ठितम् अशब्दम् महान् बृहन् अप्राणत्वादिमत् अपारम् अनिर्देश्यम् अनपावृतम् अप्रकाश्यम् असंवृतम् चक्षुरादिकरणादिनिविष्ट सर्वज्ञ सर्वेश्वरः सर्वाधिपति अन्तर्यामी सर्वयोनि सर्वसौख्योपास्यमान वेदशास्त्रोपास्यमान सर्वान्न अनन्नम् सर्वनयन प्रशास्ता अन्नमयो भूतात्मा प्राणमय इन्द्रियात्मा मनोमय संकल्पात्मा विज्ञानमय कालात्मा आनन्दमयो लयात्मा ऐक्यरहित द्वैतरहित मर्त्यभावरहित मरणसंबन्धविलयप्रसंगरहित नान्तःप्रज्ञःनबहिःप्रज्ञः नोभयतःप्रज्ञ नप्रज्ञानघन नप्रज्ञ नाप्रज्ञ विदितवेद्यरहित अमूलम् अनाधारम् दिव्य देव एक नारायण धाता विधाता कर्ता, विकर्ता उद्भव संभव माता पिता भ्राता निवास शरणम् सुहृद् गते विष्णु परमपदवासी पुरुष अमृतत्वस्येशान अव्यक्ताक्षरमृत्युप्रभृतिसर्वशरीरी सर्वान्तर सर्वसंचारी सर्ववेद्य सर्वभूतान्तरात्मा अपहतपाप्मा, अचिन्त्यरूप असङ्ग तेजस्काय विभ्राजमान अशोकम् अनन्तम् अभयम् निर्बीजम् निर्वाणम् सत्य श्रीमन्नारायणः ॥

आम्रेडितानीह पदानि यानि तत्तत्स्थलस्थानि समाहृतानि ।
विहाय तान्यन्ततदीयनामसंख्यानमर्थैरवधाय कार्यम् ॥

उपनिषदन्तरेषु दृश्यमानानि नामानि प्रायेणैवंरूपाण्येवेति न पृथङ्निर्दिश्यन्ते । तत्र महोपनिषदादिकमकृतभाष्यमपि अस्मत्तीर्थकरसमादृतमवश्याध्येयतया संकलितम् । परं तत्र प्राचीनाचार्यप्रदर्शितया रीत्या साम्प्रतं पाठो नोपलभ्यत इति यावदुपलब्धग्रहणेन तत्रापि विसंवादबहुलोत्तरभागोपेक्षणेन च महोपनिषन्मुद्रणं तदर्थप्रकाशश्च विषयनिरूपणादिकं च

व्यधायि । श्रीमन्निगमान्तमहादेशिकैः सच्चरित्ररक्षायां महोपनिषद्वचनानि बहून्युदाहृतानि । यथा—सुदर्शनपाञ्चजन्यधारणविधौ—"आथर्वण-महोपनिषदि ब्रह्मसूक्ते—दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् । सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः" इति; "अत्र ब्रह्मसूक्तमिति महोपनिषन्मध्यगता सहस्रशीर्षा इत्याद्या एकानविंशतिमन्त्राः । अष्टौ मन्त्राः 'सर्वस्य वशिनम्' इत्याद्याः । तत्र, 'दक्षिणे तु भुजे' इति पञ्चमो मन्त्रः । 'एक एव नारायण' इति महोपनिषदाद्यो मन्त्रः ।" इति । एवं महोपनिषन्मन्त्राणां बहुशाञ्चरात्रपरिगृहीततया परमं प्रामाण्यं प्रदर्शयद्भिरुच्यते—"अत्रापि ब्रह्मसूक्तपरमात्मसूक्ताभ्यां महोपनिषत्पठि-तमेकोनविंशतिमन्त्रात्मकं ब्रह्मसूक्तमेव परिगृहीतम् शब्दतोऽर्थतश्च प्रत्यभिज्ञानात्" इति ; अथ भगवद्रामानुजमुनिभिरिव भगवद्यामुन-मुनियादवप्रकाशाचार्यतदनुयायिनारायणार्यादिभिरपि महोपनिषत् आद-रेणोदाहृतेत्यदर्शि । तथा ऊर्ध्वपुण्ड्रधारणविधौ—"तत्र तावत् महोप-निषदि—"धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं साङ्ख्ययोगाधिगम्यम् । ज्ञात्वा विमुच्येत नरः समस्तैः संसारपाशैरिह चैव विष्णुम्" इति । एवमुपर्यपि द्रष्टव्यम् । इत्थं पञ्चरात्रप्रकृष्टादरभाजनं महोपनिषत् इतोऽन्या चेत्—न किञ्चित् । इयमेव चेत्, अधिकपाठभ्रंशोऽ-नुमन्तव्यः । एवं निर्विवादत्तदंशनिरूपमणत्र । पुरुषसूक्तं तु उपनिष-द्भिन्नमपि अवश्यवेद्यमिति तदर्थो विशदमदर्शि ॥ अवशिष्टमन्यत्र वेदान्तपुष्पाञ्जलिना स्वविद्यासख्याविमर्शेन तथा स्वनाम्नाम् । वेदान्तगानां परिशीलनेन प्रीतोऽस्तु देवः परमो रमेशः ॥ शुभमस्तु

Due Date	Return Date	Due Date	Return Date